स्वतन्त्रतायाः अमृतमहोत्सवः

ISSN : 0975-1769

# संस्कृतविमर्शः

( यू.जी.सी. केयर-मानिता विद्वत्परिशीलिता अन्ताराष्ट्रीया शोधपत्रिका )

(An UGC-CARE Listed Peer-Reviewed International Research Journal)

## नवाचारः

अङ्कः 20 ( जनवरी 2021 - जून 2021 ) वर्षः 2022

प्रधानसम्पादकः

प्रो. श्रीनिवास वरखेड़ी

कुलपतिः

सम्पादकौ

डॉ. मधुकेश्वरभट्टः

डॉ. देवानन्द शुक्लः

केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

देहली

# संस्कृतविमर्शः

( An International Refereed & Peer-Reviewed Research Journal, UGC-CARE Listed )

## नवाचारः

अङ्कः 20 ( जनवरी 2021 - जून 2021 ) वर्षम् 2022

प्रधानसम्पादकः
**प्रो. श्रीनिवास वरखेड़ी**
कुलपतिः

सम्पादकौ
**डॉ. मधुकेश्वरभट्टः**
**डॉ. देवानन्द शुक्लः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**संसदः अधिनियमेन स्थापितः**
**देहली - 110 058**

प्रकाशकः
कुलसचिवः
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
(संसदः अधिनियमेन स्थापितः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058
011-28524993, 28521994, 28520977
emial : registrar@csu.co.in
website : www.sanskrit.nic.in

© **केन्द्रीयसंस्कृतविश्वविद्यालयः**

ISSN : 0975-1769

संस्करणम् : 2022

प्रत्यङ्कम् - 50.00

मुद्रकः
डी.वी. प्रिंटर्स
97-यू.बी. जवाहर नगर, दिल्ली-110007

# SAṂSKṚTA-VIMARŚAḤ

(An International Refereed & Peer-Reviewed
Research Journal, UGC-CARE Listed)

## NAVĀCHĀRAḤ

**Vol. 20** **(January 2021 - June 2021)** **Year 2022**

General Editor
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

Editors
**Dr. Madhukeshwar Bhat**
**Dr. Devanand Shukl**

**CENTRAL SANSKRIT UNIVERSITY**
(Established by an Act of Parliament)
**Delhi**

Publisher:
Registrar
**Central Sanskrit University**
56-57, Institutional Area, Janakpuri,
New Delhi - 110058 (India)
e-mail : registrar@csu.co.in
website : www.sanskrit.nic.in

© Central Sanskrit University

ISSN : 0975-1769

Edition : 2021

Rs. 50.00

Printed by :
D.V. Printers
97-U.B., Jawahar Nagar, Delhi-110 007

# परामर्शदातृ-समितिः

1. **प्रो. वी. कुटुम्बशास्त्री**
   36, एवरग्रीन अपार्टमेण्ट, प्लॉट न. 9,
   सेक्टर-7, द्वारका, नई दिल्ली-110075

2. **प्रो. के.बी. रामकृष्णमाचार्युलु**
   4-45 अपोजिट सत्य साांई मंदिर,
   सत्य साांई नगर, साांई नगर पंचायत,
   तिरुपति (आन्ध्र प्रदेश) - 517503

3. **प्रो. हृदयरञ्जन शर्मा**
   बी-24/31 के, कश्मीरीगंज, वाराणसी,
   पिन-221010 (उ.प्र.)

4. **प्रो. किशोरचन्द्रपाढ़ी**
   पुरी (उड़ीसा)

5. **प्रो. आजादमिश्रः**
   2/239, विरामखण्डः-2, गोमतीनगरम्
   लखनऊ, (यू.पी.) 226010

6. **प्रो. जिन.एस्.आर. कृष्णमूर्तिः**
   राष्ट्रियसंस्कृतविश्वविद्यालयः,
   तिरुपतिः - 517507 (आन्ध्रप्रदेशः)

7. **प्रो. श्रीपादभट्टः**
   राष्ट्रियसंस्कृतविश्वविद्यालयः,
   तिरुपतिः - 517507 (आन्ध्रप्रदेशः)

# Advisory-Board


1. **Prof. V. Kutumba Sastry**
   36, Evergreen Appartment Plot-
   Sector-7, Dwarka, New Delhi-110075

2. **Prof. Ram Chandra Pandey**
   4-45 opp. Satyasai Mandir
   Stayasai Nagar, Satya Sainagar Panchayat
   Triupati (A.P.) - 517503

3. **Prof. Ram Chandra Pandey**
   38, Manas Nagar, Durgakund
   Varanasi (U.P.)

4. **Prof. Kishor Chandra Pandey**
   Puri (Odisha)

5. **Prof. Azad Mishra**
   2/239, Viramkhand-2
   Gomatinagar, Luknow-226010

6. **Prof. G.S.R. Krishnamurty**
   National Sanskrit University
   Triupati-517507 (A.P.)

7. **Prof. Shripada Bhat**
   National Sanskrit University
   Tirupati - 577507 (A.P.)

## समीक्षा-समितिः

1. **प्रो. जयकान्तसिंह शर्मा**
   आचार्यः, श्रीला.ब.शा.राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
2. **प्रो. रामकुमार शर्मा**
   आचार्यः, जयपुरपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरम्
3. **प्रो. विष्णुपद महापात्रः**
   आचार्यः, श्रीला.ब.शा.राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
4. **प्रो. सुकान्तकुमार सेनापतिः**
   निदेशकः, एकलव्यपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालय, अगरतला
5. **डॉ. मन्था श्रीनिवासु**
   परियोजनाअधिकारी केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली
   लखनऊ, (यू.पी.) 226010

## सम्पादक-मण्डलम्

1. **प्रो. ए.पी. सच्चिदानन्दः**
   निवृत्तप्राचार्यः, श्रीराजीवगान्धीपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः, शृङ्गेरी
2. **प्रो. अर्कनाथ चौधरी**
   निवृत्त निदेशकः, जयपुरपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरम्
3. **प्रो. आर.जी. मुरलीकृष्णः**
   निदेशकः योजना, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली
4. **डॉ. देवानन्द शुक्लः**
   उपनिदेशकः, शैक्षणिकम्, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली

## Review Committee

1. **Prof. Jaykant Singh Sharma**
   Professor, S.L.B.S. National Sanskrit University, New Delhi
2. **Prof. Ramakumar Sharma**
   Professor, Jaipur Campus,
   Central Sanskrit University, Jaipur
3. **Prof. Vishnupad Mahapatra**
   Profeesor, S.L.B.S. National Sanskrit Univesity, New Delhi
4. **Prof. Sukantkumar Senapati**
   Director, Ekalavya Campus,
   Central Sanskrit University, Agartala
5. **Dr. Mantha Sriniwasu**
   Project Officer, Central Sanskrit University, Delhi

## Editorial Board

1. **Prof. A.P. Sacchidananda**
   Retd. Principal, Shri Rajeev Gandhi Campus,
   Central Sanskrit University, Sringeri
2. **Prof. Arknath Chodhary**
   Ex-Director, Jaipur Campus,
   Central Sanskrit University, Jaipur
3. **Prof. R.G. Murlikrishna**
   Director, (Schemes),
   Central Sanskrit Univesity, Delhi
4. **Dr. Devananad Shukl**
   Deputy Director, (Academic),
   Central Sanskrit University, Delhi

# संपादकीयम्

समग्रे विश्वे भारतस्य कीर्तिः आध्यात्मिकक्षेत्रसम्बद्धा विद्यते इति जानते मनीषिणः। आध्यात्मिकश्रेत्रे भारतं समग्रस्यापि विश्वस्य गुरुस्थाने विद्यत इति तु नातिशयोक्तिः। भारतस्य आध्यात्मिकं तत्त्वं श्रुतिशास्त्रादिप्रतिपाद्यम्। आध्यात्मिकतत्त्व-प्रतिपादकानि श्रुत्यनुसारीणि शास्त्रादीनि संस्कृतभाषायामेव विराजन्ते। भारतीयाध्यात्मिक-तत्त्वज्ञानाय संस्कृतवाङ्मयं शरणीकरणीयमेव। अमरभारतीसमुपासकानां कामधेनुरसौ गैर्वाणी।

सर्वस्याः अपि भाषायाः चत्वारि सोपानानि श्रवणभाषणपठनलेखनाख्यानि विद्यन्ते। एभिः सोपानैरेव काचिदपि भाषा समूलमधिगता आत्मसात्कृता च भवति बुद्धिश्च वैशारद्यं प्राप्नोति। यथा अनुश्रूयते-

**यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपाश्रयति।**
**तस्य दिवाकरकिरणैर्नलिनीदलमिव विकास्यते बुद्धिः॥**

एतेषु श्रवणं पठनं च किञ्चित् सुकरम्। भाषणं तु ईषत् परिक्लमसाध्यम्। परं लेखनं नितान्तं श्रमसाध्यं क्लेशकरं व्यवसायात्मकं कर्म। तत्रापि शोधपूर्णं लेखनम् असिधारव्रतमिव। किन्तु शोधपूर्णलेखः एव विद्वत्तायाः निकषायते अन्तर्निहिततत्त्वं प्रकाशयति। अमुं विषयम् अवमत्य केन्द्रीयसंस्कृतविश्वविद्यालयः **संस्कृतविमर्शः** नाम्नीं शोधपत्रिकां प्राकाशम् आनयति। अस्याः पत्रिकायाः अभिनवाङ्कः भवतां पुरस्तात् समायातीति अमन्दानन्दस्य विषयः। अत्र प्रकाशिताः लेखाः शास्त्रेषु निहितानि निगूढानि तत्त्वानि प्रकाशयितुं समर्थाः स्युः इति भावयावः। अस्य प्रकाशकर्मणः प्रेरणास्रोतोभ्यः प्राचीनार्वाचीनविद्यायाः पारदृश्वभ्यः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलपतिवर्येभ्यः **प्रो. श्रीनिवासवरखेडी**महाभागेभ्यः नमःसुमाञ्जलिं समर्पयावः। सन्ततम् अस्मिन् कर्मणि प्रेरितवद्भ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिवेभ्यः प्रो. रणजित कुमार बर्मन्-वर्येभ्यः अनन्तान् धन्यवादान् वितन्वः। अस्य अङ्कस्य त्रुटिसंशोधनं विदधानेभ्यः डॉ. शक्तिशरणमहोदयेभ्यः, नितेशकुमारद्विवेदी महोदयेभ्यश्च तथा शोधप्रकाशनविभागस्यस्य सहायकनिदेशकेभ्यः श्रीजितेन्द्रकुमार-प्रभृतिभ्यः, मुद्रकेभ्यश्च साधुवादान् निवेदयावः।

**-संपादकौ**

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| | **परामर्शदातृ-समितिः** | | *v* |
| | **Advisory Board** | | *vi* |
| | **समीक्षा-समितिः/सम्पादक-मण्डलम्** | | *vii* |
| | **Review Committee/Editorial Board** | | *viii* |
| | **संपादकीयम्** | | *ix* |
| 1. | **न्यायमते वादस्वरूपम्** | -डॉ. खोकनभट्टाचार्य्यः | 1 |
| 2. | **आधुनिकसंस्कृतवाङ्मये बुद्धविजयकाव्यस्य स्थानं प्रासङ्गिकता च** | -डा. प्रफुल्लगडपालः | 13 |
| 3. | **जातेरस्त्रीविषयादयोपधात् सूत्रविचारः** | -डॉ. मधुकेश्वर भट्टः | 20 |
| 4. | **शाब्दव्यञ्जनायाम् अभिधानियामकाः संयोगादयः** | -डॉ. पठान् महम्मद् वलि खान | 26 |
| 5. | **व्याकरणदर्शनाभिमतप्रमाणसामान्यलक्षणविमर्शः** | -बद्रीनारायणगौतमः | 36 |
| 6. | **वरदराजपञ्चाशत्यवतारवर्णनम्** | -डॉ. ल. सम्पत्कुमारः | 44 |
| 7. | **कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते परिभाषार्थविचारः** | -डॉ. नितेश कुमार द्विवेदी | 49 |
| 8. | **वेदान्तदर्शनस्य आधुनिकयुगे प्रासङ्गिकता** | -के. मनोग्ना | 56 |
| 9. | **मोक्षसाधनविचारः** | -डॉ. जि. नरसिंहुलु | 60 |
| 10. | **एजाद्योः किम्? प्रेदिधत् इत्यत्र नागेशकृतखण्डनस्य औचित्यानुशीलनम्** | -शम्भुनाथ भट्टः | 68 |
| 11. | **वैशेषिकदृशा शब्दार्थयोस्सम्बन्धविचारः** | -डॉ० विश्वेशः वाग्मी | 74 |
| 12. | **पूर्वरङ्गे प्रस्तावनाविमर्शः** | -डॉ. शक्ति शरण शर्मा | 84 |
| 13. | **न्यायव्याकरणयोः शाब्दबोधविचारः** | -राम किशोरः | 89 |

14. **अच्युतानन्ददासकृतशून्यसंहितायाः योगतत्त्वविश्लेषणम्** **98**
–डॉ. सुव्रतषडङ्गी

15. **विवेकविलासे प्रतिपादितानाम् आयुर्वेदतत्त्वानां समीक्षणम्** **103**
–डॉ. भवानी शंकर शर्मा

16. **विंशशताब्दीयबलभद्रप्रसादशास्त्रिविरचिते सिन्धुराजवधमहाकाव्ये रसाभिव्यञ्जना** **112**
–पूजा

17. **प्राच्यपाश्चात्त्यमते व्यक्तित्वविमर्शः** **118**
–डॉ. मदनकुमारझा

18. **पण्डित मधुसूदन ओझा विरचित अपरवाद में सृष्टिमूलक चतुर्वाद मीमांसा** –डॉ. मङ्गलाराम **126**

19. **स्त्री पुनर्विवाह : श्रुति, स्मृति और वर्तमान विधान के सन्दर्भ में** –डॉ. शैलेश कुमार मिश्र **136**

20. **महावीर के संदेशों का प्रचार : श्रावकाचार ( गृहस्थाचार ) में भरा हैं सार** **154**
–डॉ. धर्मेन्द्र कुमार जैन

21. **काव्यशास्त्रपरिभाषा : पूर्वी और पश्चिमी विमर्श** **161**
–अजय कुमार मिश्र

22. **Teaching of Spoken Sanskrit at Samskrit Bharti : A Case Study** **166**
- Dr Braj Mohan

23. **Exploring True Knowledge from a Scientific and Philosophical Standpoint** **176**
- Dr. Dinesh Kumar Das
- Dr. Abhijit Sen

24. **ज्योतिष शास्त्र के दृष्टि से शिक्षा - तत्त्व विमर्श** **186**
–डॉ. चक्रधर कर

25. **'यत्र विश्वं भवत्येकनीडम्' और वैश्वीकरण** **198**
–डॉ. अरुणिमा रानी

26. **पूर्वत्रासिद्धमिति शास्त्रतत्त्वविमर्शः** **206**
–डॉ. श्रीमन्तचटर्जी

27. **वररुचिकृते प्रयोगविवेकसंग्रहे तिङ्कृत्प्रयोगौ** **216**
–देवानन्द शुक्ल, प्रीति शुक्ला

✦✦✦

 ISSN : 0975-1769

# न्यायमते वादस्वरूपम्

**डॉ. खोकनभट्टाचार्य्यः***

**उपोद्घातः** - महर्षिगौतमप्रणीतस्य समग्रस्य न्यायशास्त्रस्य मूलमुद्देश्यं हि निःश्रेयसम्। सांख्यादिसकलदर्शनशास्त्राणामपि लक्ष्यं तत् निःश्रेयसमेव। तद्धि मुक्तिमोक्षापवर्गनिर्वाणादिभिः शब्दैः दर्शनान्तरे अभिधीयते। अपवर्गो नाम दुःखस्य आत्यन्तिकी निवृत्तिः। तस्मादेव कारणात् समग्रमपि दर्शनप्रस्थानं मोक्षशास्त्रत्वेनोच्यते। गौतमप्रणीते न्यायदर्शने यद्यपि प्रमाणप्रमेयादिषोडशपदार्थानामालोचनं वैशद्येन प्रपञ्चितं तथापि तदालोचनं मोक्षनिमित्तमेवेति तत्रैव प्रथमे सूत्रे सूत्रकारेण निर्देशितम्। तथा च सूत्रम् - "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद-जल्पवितण्डा-हेत्वाभासच्छलजाति- निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।"[१] (१।१।१) इति।

आत्मज्ञानलाभादेव मुक्तिरिति मुक्तौ पुरुषस्य आत्मनस्तत्त्वज्ञानमपेक्षते। जगतः तत्त्वज्ञानमपि आत्मज्ञानलाभे भवति साहायकम्। आत्मनो जगतश्च स्वरूपोद्घाटने न्यायदर्शने या विचारपद्धतिरनुसृता सैव न्यायशास्त्रस्य विशेषः। वादादयो हि विचारपद्धतिविशेषाः। तत्त्वनिर्णयार्थं वादादीनां महदुपयोगदर्शनात् न्यायशास्त्रे वादो जल्पो वितण्डा चेति कथात्रयं पृथक्पदार्थत्वेन गृह्यते।

**निःश्रेयसे वादस्वरूपज्ञानोपयोगित्वम्** - ननु यदुक्तं सूत्रे प्रमाणादीनां तत्त्वज्ञानान्मुक्तिरित्यत्र वादस्वरूपज्ञाने किमपवर्गः स्यादिति चेन्न, आत्मतत्त्वज्ञानादेव तत्सम्भवात्। मुक्तौ आत्मज्ञानलाभे विचारविशेषस्य वादस्य पारक्ष्येण अपवर्गलाभे तदुपयोगः। न हि स्वातन्त्र्येण मोक्षे वादोपयोगः।

**वादलक्षणविमर्शः** - न्यायमते कस्तावद् वादः? तत्रोच्यते तत्त्वबुभुत्सुकथा वादः इति। यत्र विचारे वादिप्रतिवादिनोः मूलमुद्देश्यम् एकमेव तत्त्वनिर्णयः स

---

* सहायकाध्यापकः संस्कृतविभागे श्रीगोपालब्यानार्जिमहाविद्यालयस्य।

1. गौतमः, 1971, *न्यायदर्शनम्* (1), फणिभूषणतर्कवागीशसम्पादितम्, पृष्ठा - 18, कलिकाता, पश्चिमबङ्गराज्यपुस्तकपर्षद्।

विचारो वादः। तत्त्वं नाम सतः सद्भावोऽसतश्च असद्भावः। अर्थात् सतो वस्तुनः सद्रूपेणासतश्चासद्रूपेण निश्चयः तत्त्वनिर्णयः। तत्त्वनिर्णयार्थमेव स्वस्वपक्षमादाय विचारे प्रवृत्तिः वादिप्रतिवादिनोः। तत्र विचारे जयपराजयौ स्तः, किन्तु तयोर्मध्ये कापि अपरपराजयेच्छा स्वविजिगीषा वा न विद्यते। एष हि वादसामान्यपरिचयः। तथा च वादस्वरूपप्रतिपादकं गौतमीयं न्यायसूत्रम्–"प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।"[1] (१।२।१) इति।यत्र विचारे प्रत्यक्षादिभिः प्रमाणैस्तर्केण च साधनं स्वपक्षस्थापनं तथा उपालम्भः परपक्षखण्डनञ्च भवतः, एवम्विधः सिद्धान्ताविरुद्धः पञ्चावयवोपेतो वादिप्रतिवादिभ्यां स्वीकृतो विरुद्धधर्मद्वयरूपपक्षप्रतिपक्षनियमो वादः।

**पक्षप्रतिपक्षपरिचयः** – वादे पक्षः प्रतिपक्षश्चोभौ विद्यमानौ। पक्षो नाम कस्मिंश्चिद्विषये निर्दिष्टो धर्मविशेषः। प्रतिपक्षश्च तस्मिन्नेव विषये पूर्वधर्मविरुद्धो धर्मः। पक्षप्रतिपक्षौ सर्वदा समानाधिकरणौ, समानकालीनौ तथा परस्परं विरुद्धौ स्तः। किन्तु भिन्नाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ कदापि न भवतः। यथा नित्य आत्मा अनित्या बुद्धिरिति। तथाहि भाष्यकार आह – "एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ प्रत्यनीकभावात्, अस्त्यात्मा नास्त्यात्मेति। किन्तु भिन्नाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ कदापि न भवतः। यथा नित्य आत्मा अनित्या बुद्धिरि "ति[2]। न्यायमञ्जर्यां निर्णयलक्षणव्याख्यानावसरे जयन्तभट्टेनापि भणितम्–

> **"एकाधिकरणौ धर्म्मौ तुल्यकालौ विरोधिनौ।**
> **पृथक्परिग्रहौ पक्षप्रतिपक्षावुदाहृतौ।।"[3] इति।**

उद्योतकरेण न्यायवार्तिके कथितं पक्षप्रतिपक्षौ वस्तुधर्मौ अनवसितौ च स्तः। उक्तञ्च–"कौ पुनरेतौ पक्षप्रतिपक्षौ? वस्तुधर्मावेकाधिकरणौ विरुद्धावेककालावसितौ"[4] इति। वस्तुधर्मौ नाम वस्तुविशेषौ। धर्मशब्दोऽयं विशेषार्थकः वस्तुनः सामान्येनाधिगतत्वाद् विशेषतश्चानधिगतत्वात् विशेषावगमनिमित्तो विचारः। अतो वस्तुधर्म्मौ विशेषाविति। नानाधिकरणौ वस्तुविशेषौ विचारं न प्रयोजयतः, न उभयोः प्रमाणोपपत्तेः। अतः एकाधिकरणाविति। अपि च यौ विरुद्धौ तावेव विचारं प्रयोजयतः, न कदाप्यविरुद्धौ। यथा 'क्रियावद् द्रव्यं गुणवच्चे'ति। अत्रोदाहरणे 'द्रव्यं क्रियावद् उतः द्रव्यं गुणवत्'

---

1. तत्रैव, पृष्ठा – 367
2. तत्रैव, पृष्ठा – 369
3. जयन्तभट्टः, १९८४, *न्यायमञ्जरी* (३), गौरीनाथशास्त्रिसम्पादिता, पृष्ठा – ११५, वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
4. गौतमः, २००३, *न्यायदर्शनम्* (वृत्तिभाष्यवार्तिकतात्पर्ययुतम्), तारानाथ– न्यायतर्कतीर्थ–सम्पादितम्, पृष्ठा – ३३६, नवदेहली, एम्. मनहरलाल पावलिशरस्।

इति संशयो विरोधो वा नास्तीत्यत्र विचारसम्भवाभावः। भिन्नकालयोरपि वस्तुविशेषयोः विचारप्रयोजकत्वं नास्ति, प्रमाणोपपत्तेः। यथा हि क्रियावद् द्रव्यं कालभेदे निष्क्रियं भवितुमर्हति। अपिच वस्तुविशेषौ, अनवसितौ स्तः। अनवसितौ नामानिश्चिताविति। अनिश्चितावेव वस्तुविशेषौ विचारं प्रयोजयतो न तु निश्चितौ, निर्णयोत्तरकाले विचारासम्भवात्। अतो विचारप्रयोजकत्वात् पक्षप्रतिपक्षौ वस्तुविशेषौ एकाधिकरणौ परस्परं विरुद्धौ समानकालौ अनिर्णीतौ च स्याताम्।

**परिग्रहशब्दार्थः** - तावेतौ विरुद्धौ एवम्विधविशेषणौ धर्मौ पक्षप्रतिपक्षौ तयोः परिग्रहः वादः। परिग्रहो नामाभ्युपगमव्यवस्था, इत्थम्भावनियमो वा। स च नियमो वादे स्वोद्देश्यभूततत्त्वनिर्णयैकसाधनत्वसम्बन्धेन वादे तिष्ठति। अतः पक्षप्रतिपक्षाभ्युपगमव्यवस्था वाद इति। यथा अयमेवंधर्मा धर्मी, नैवंधर्मा धर्मी अयमिति। अत्रादिमः पक्षः, अपरश्च प्रतिपक्षः, तयोः परिग्रहो वादः।

**जल्पवितण्डयोः अतिव्याप्तिनिरासः** - ननु पक्षप्रतिपक्षपरिग्रहो वादश्चेत् जल्पवितण्डयोरपि वादलक्षणमतिव्याप्तं स्यात्। तत्रापि पक्षप्रतिपक्षपरिग्रहविद्यमानत्वादिति चेन्न, तथाहि उक्तं वार्तिके-"वादे प्रमाणतर्कसाधनोपालम्भस्य नियतत्वात् प्रमाणतर्कसाधनोपालम्भ एव वादे, छलादिसाधनोपालम्भे जल्पवितण्डे। यथा विषाणित्वं गवि गवये समानमपि संवृत्तकण्ठतया सास्नादिमत्त्वया च विशिष्यमाणमुभौ गोगवयौ विशिनष्टि तथा। प्रमाणतर्कसाधनोपालम्भः।"[1] इति। अर्थात् पक्षप्रतिपक्षवत्त्वं वादादिकथानां समानमपि प्रमाणतर्कसाधनोपालम्भत्वं वादस्यैव , वीतरागकथात्वेन तत्त्वनिर्णयावसानत्वात्। छलादिसाधनोपालम्भत्वं च जल्पवितण्डयोः। तेन च जल्पवितण्डाभ्यां वादस्य व्यवच्छेदः। वादलक्षणे पक्षप्रतिपक्षपरिग्रहपदस्य प्रमाणतर्कसाधनोपालम्भेति विशेषणयुक्तत्वात्। यद्यपि जल्पे पक्षप्रतिपक्षसाधनमस्ति, तथापि न प्रमाणमूलैरवयवैस्तर्केण च साधनोपालम्भाविति। वितण्डायाञ्च पक्षप्रतिपक्षग्रहोऽस्ति, किन्तु तत्र पक्षसाधनं नास्ति तस्याः साधनहीनत्वात्। अनेन प्रमाणतर्कसाधनोपालम्भग्रहणेन जल्पवितण्डाभ्यां व्यवच्छेदो बोध्यः।

**प्रमाणतर्कसाधनोपालम्भपदतात्पर्यम्** - प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् विचारे क्रियते इति प्रमाणतर्कसाधनोपालम्भः। साधनं स्थापना, उपालम्भश्च प्रतिषेधः। अस्मिन् क्रियते अस्मिन् विचारे भवतीत्यर्थः। अस्मिन्निति सप्तमीनिर्देशो विषयज्ञापनार्थः। तौ साधनोपालम्भौ उभयोरपि पक्षयोर्व्यतिषिक्तावनुबद्धौ च यावदेको निवृत्तः अन्यतरश्च व्यवस्थित इति निवृत्तस्योपालम्भो व्यवस्थितस्य च साधनमिति।

---

1. तत्रैव, पृष्ठा - ३३९

**अप्रमाणात्मकस्य तर्कस्य साधनोपालम्भयोः कारणत्वापत्तिः** - ननु कथं तर्केण साधनमुपालम्भश्च, तस्याप्रमाणत्वात्। प्रमाणानुग्राहकत्वाच्च न प्रमाणसंगृहीतस्तर्को न प्रमाणान्तरम्। सोऽयमप्रमाणात्मकः सन् कथं सिद्ध्युपालम्भयोः कारणं भविष्यतीति चेत् उच्यते सत्यम्, न तर्कः साधनोपालम्भयोः कारणं भवति, किन्तु प्रमाणविषयविवेचनात् तर्कः प्रमाणानि अनुगृह्णातीति प्रमाणानुग्राहकत्वात् सोऽयं तर्कः प्रमाणसहितो वादे उपदिष्टः। तात्पर्यटीकायान्तु तर्कस्य साधनोपालम्भहेतुभावः स्वीकृत एव। तथा चोक्तं वाचस्पतिमिश्रपादेन-"तर्कस्येतिकर्तव्यतारूपस्य प्रमाणानु-ग्राहकतया प्रमाणमूला अवयवास्तर्कमूला अपि भवन्ति, तथा च तर्कस्यापि-साधनोपालम्भहेतुभावः सिद्धो भवति"[1] इति।

**साधनोपालम्भपदस्य भावव्युत्पन्नपक्षः** - अपरे तु आक्षिपन्ति यद् साधनोपालम्भौ हि विवक्षितौ परं प्रति, न तु प्रमाणतर्काभ्याम्, तयोः स्वप्रतिपत्तिहेतुत्वात्। तेन च साधनोपालम्भयोः कारणत्वापत्तिः तर्कस्य न स्यात्। तथा च साध्यते इति साधनम् उपालम्भ्यते इति उपालम्भः। एवं साधनोपालम्भशब्दौ भावसाधनौ चेत् तदा प्रमाणैस्तर्केण च भवतः, प्रमाणानां तर्कस्य च पराप्रतिपादकत्वात् प्रमाणान्यात्म-प्रतिपत्तिसाधनानि, परप्रतिपादनार्थश्चायं विचारः, तस्मात् प्रमाणतर्काभ्यां सिद्ध्युपालब्धी न भवतः।

**करणव्युत्पन्नपक्षः** - अथ यदि साध्यतेऽनेनेति साधनोपालम्भ्यतेऽनेनेति उपालम्भेत्यनेन साधनोपालम्भशब्दौ करणसाधनौ स्तः। तथात्वे तु वादलक्षणे 'पञ्चावयवोपपन्न' इति पदं पृथग् न पठितव्यम्। प्रमाणतर्कसाधनोपालम्भ इति करणसाधनेन पदेनावयवशब्दार्थस्योक्तत्वादिति चेन्न, तस्य पञ्चावयवपदस्यान्य-प्रयोजनत्वाद्। एतदन्यप्रयोजनं तावद् यथास्था मालोचयिष्यते।

**भावव्युत्पन्नवादे विषयप्रश्नः** - अथ साधनोपालम्भशब्दौ भावसाधनौ चेत् तौ प्रमाणतर्काभ्यां किंविषयौ भवतः? उच्यते पक्षप्रतिपक्षविषयाविति। पक्षविषयं साधनं प्रतिपक्षविषयश्चोपालम्भः। ननु तथात्वेऽपि युक्तिहानिः स्यात्। प्रमाणतर्कसाधना सिद्धिः पक्षस्य भवति किन्तु उपालम्भस्य विषयः प्रतिपक्षः कथं स्यात्? न तु प्रतिपक्षविषय उपालम्भः, किन्तु साधनविषयः, प्रतिपक्षस्य यत् साधनं तद्विषय एवोपालम्भ इति। कथं पुनः प्रतिपक्षसन्निधावुद्दिश्यमान उपालम्भशब्दः प्रतिपक्षव्यतिरेकेण साधनेन सम्बध्यते? तदुच्यते सामर्थ्यादसमर्थाच्चेति। यदुपालम्भयोग्यं तदुपालभ्यते, यदुपालम्भायोग्यं तन्न। अतः प्रतिपक्षो नोपालम्भयोग्यः। उपालम्भमानस्य चानुपालम्भ-मानस्य च वस्तुनस्तथाभावात्। तथाभूतमेव वस्तूपालम्भमानं तथाभूतमेवानुपालम्भमानम्।

---

1. तत्रैव, पृष्ठा - ३३७

किन्तु तथा सति साधनमपि उपालम्भयोग्यं न भवति। साधनञ्च करणं कदापि स्वरूपं न कदाचिज्जहातीति साधनस्यापि उपालम्भो न युक्तः। अतो मिश्रपादेन टीकायामुक्तम् –"न प्रतिपक्षविषय उपालम्भो नापि तत्साधनविषयः, तयोर्वस्तुनोः स्वकारणादुत्पन्नयोः सदा तद्रूपत्वेन पुरुषधर्मोपालम्भनास्पदत्वाद्।"[1] इति। धर्मी नाम धर्मविशिष्टः पक्षः प्रतिपक्षो वा कर्म, तस्य विषयः तस्य धर्मिणो वास्तवं तादृशत्वमतादृशत्वं वा। अपि च कर्मणः स्वविषये सामर्थ्यात् सर्वमेव कर्म स्वविषये समर्थमेव। करणस्य च कर्मैव विषयः। करणमप्येवं तस्य तु विषयान्तरे न सामर्थ्यम्। स्वविषये तु सामर्थ्यमस्त्येव। यच्च विषयान्तरेऽसमर्थं, न तेन कर्मणः करणस्य वा दोषः। अतो नोपालम्भः कर्मणि करणे वा। तर्हि कस्यायमुपालम्भः? यो निगृह्यते तस्य पुरुषस्यैवायमुपालम्भः। पुरुषस्यैव अप्रतिपत्तिर्विप्रतिपत्तिर्वा, न तु कर्मकरणयोः। प्रतिपादयिता पुरुष एवासमर्थयोः कर्मकरणोरुपादानान्निगृह्यते। पुरुष एवान्यविषये ते कर्मकरणे नियुञ्जानोऽसमर्थीकरोति। यथाकाशे निशातमसि व्यापारयतः पुरुषस्यापराधः, न तु शब्दे समर्थस्याकाशस्य, न च निशातस्यासेर्वा दारुणि समर्थस्यापराधः। तस्मात् साधनस्योपालम्भोऽयमौपचारिकः, न मुख्यः। मुख्य उपालम्भस्तु पुरुषस्य, सोऽयं पुरुषधर्मो वचनद्वारेणोद्भाव्यत इति वचन उपचर्य पुरुषधर्मी वचनमुपालभ्यते इति बोध्यम्।

**प्रमाणतर्कसाधनोपालम्भपदस्य विग्रहः** – तथा चायमार्थः सूत्रादेव लभ्यते। तत्र 'प्रमाणतर्कसाधनोपालम्भ' इति पदस्य विग्रहवाक्यं द्रष्टव्यम्। तथा हि प्रमाणैस्तर्केण च साधनः प्रमाणतर्कसाधनः, साधनस्योपालम्भः साधनोपालम्भः प्रमाणैस्तर्केण साधनोपालम्भः प्रमाणतर्कसाधनोपालम्भः प्रमाणतर्कसाधनश्च प्रमाणतर्कसाधनोपालम्भश्च प्रमाणतर्कसाधनोपालम्भः इति। दर्शितमेतत्तावत् उद्योतकरेण –"प्रमाणतर्कसाधनः प्रमाणैस्तर्केण साधनोपालम्भः प्रमाणतर्कसाधनश्च प्रमाणतर्कसाधनोपालम्भश्च प्रमाणतर्कसाधनोपालम्भः, एकस्य साधनशब्दस्य गम्यमानार्थत्वाल्लोपः, यथोष्ट्रमुखीति।"[2] इति।

वस्तुतस्तु अत्रेदमवधेयं यत् उक्तं विग्रहवाक्यमर्थकथनमात्रम्। समीचीनं विग्रहन्तु साधनञ्चोपालम्भश्चेति द्वन्द्वसमासात् साधनोपालम्भाविति। उपालम्भपदमत्र साधनोपालम्भपदम्। अत्र गम्यमानार्थत्वाल्लोप इति अवधेयम्। ततः प्रमाणतर्कैः साधनोपालम्भौ यत्रेति बहुव्रीहिसमासे प्रमाणतर्कसाधनोपालम्भः इति। अत्र द्वन्द्वात् पूर्वं परं वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यत इति न्यायेन 'प्रमाणतर्कैः' इति पदं साधनपदे उपालम्भपदे चान्वेतीति उक्तार्थलाभः।

---

1. तत्रैव, पृष्ठा – ३३७
2. तत्रैव, पृष्ठा – ३३८

**सिद्धान्ताविरुद्धपदतात्पर्यम् ( भाष्यकारमतम् )**– सूत्रकारेण जल्पलक्षण-मुक्तम्– "छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः"[1] (१।२।२) इति। यत्र कथायां छलजातिनिग्रहस्थानैः साधनोपालम्भौ भवतः सा कथा जल्प इत्यर्थः। यतो हि जल्पे छलजातिनिग्रहस्थानानां प्रयोगः भवति, तस्मात् वादे एतेषां प्रतिषेधो बोध्यः। किन्तु कस्यचिद् निग्रहस्थानस्यापि प्रयोगो वादे स्यादेवेति ज्ञापनार्थं सिद्धान्तविरुद्धमिति पदं सूत्रे उपात्तम्। तथा च भाष्यम् –"जल्पे निग्रहस्थानविनियोगाद् वादे तत्प्रतिषेधः। प्रतिषेधे कस्यचिदभ्यनुज्ञानार्थं सिद्धान्तविरुद्ध इति वचनम्।"[2] इति।

**वादे विरुद्धहेत्वाभासः** – वादे विरुद्धहेत्वाभासस्य प्रयोगः भवितुमर्हति। विरुद्धहेत्वाभासलक्षणं तावत् "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः"[3] (१.२.६) इति। तं विरुद्धीति तद्विरोधी। अभ्युपेतं स्वीकृतं सिद्धान्तं व्याहन्तीति स्वीकृत- सिद्धान्तविरोधी हेतुः विरुद्धः विरुद्धो हेत्वाभासः। न खलु अचेतनो हेतुः सिद्धान्तमभ्युपगच्छति, यश्चाभ्युपगच्छति चेतनो नासौ अन्यतमेन हेतुलक्षणेन न युज्यत इति न हेत्वाभासः। न च पक्षः सिद्धान्त इति न तद्विरोधी हेत्वाभासः स्यात्। अतः तद्विरोधीत्यनेन अभ्युपगतार्थविरोधी विरुद्धो हेत्वाभास इति बोध्यम्। अपि चात्र हेतुद्वारेण पुरुषस्य कस्यचिदभ्युपगमो हेतावुपचरितः। अभ्युपगममात्रविवक्षया सिद्धान्तशब्दः प्रयुक्तः, न पुनः सिद्धान्त एवेह विवक्षितः। तेन पक्षोऽभ्युपगमविषय इति तद्विरोधी हेत्वाभासः संगृहीतो भवति।

**विरुद्धहेत्वाभासस्योदाहरणम्** – यथा सोऽयं महदादिः विकारः अभिव्यक्ते-रपैति नित्यत्वप्रतिषेधात्, न हि नित्यो विकार उपपद्यते। अपेतोऽपि विकारोऽस्ति विनाशप्रतिषेधात्, सोऽयं नित्यत्वप्रतिषेधादिति हेतुः व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन विरुध्यते। वस्तुतस्तु, सर्वेऽपि हेत्वाभासा विरुद्धा एव, तेषां पञ्चविधत्वन्तु सव्यभिचारत्वादिविशिष्टत्वम् अवलब्यैव। अतः भाष्यकारमते वादे सर्वेऽपि हेत्वाभासाः प्रयोगार्हा इति अवगन्तव्यम्।

**वार्तिककारमतम्–** भाष्ये यदुक्तं "जल्पे निग्रहस्थानविनियोगाद् वादे तत्प्रतिषेध[4]" इति। वार्तिककारमते तदप्ययुक्तम्। वादः प्रमाणतर्कसाधनोपालम्भ इत्यनेन उपालम्भग्रहणात् वादेऽपि निग्रहस्थानानि भवितुमर्हन्ति। अतः उपालम्भग्रहणात्

---

1. गौतमः, १९७१, *न्यायदर्शनम्* (१), फणिभूषणतर्कवागीशसम्पादितम्, पृष्ठा – ३७८, कलिकाता, पश्चिमबङ्गराज्यपुस्तकपर्षद्।
2. तत्रैव, पृष्ठा – ३६९
3. तत्रैव, पृष्ठा – ४००
4. तत्रैव, पृष्ठा – ३६९

समस्तनिग्रहस्थानप्रसक्तौ संज्ञाभेदमात्रोपदिष्टम्। तथात्वे किं तर्हि वादे तथा जल्पे उभयत्र निग्रहस्थानानि स्यु:? उच्यते न, वादलक्षणस्य उत्तरयो: पदयोर्नियमार्थत्वात्। यत हि उभयत्र उपालम्भपदेन सर्वाण्यपि निग्रहस्थानानि लभ्यन्ते, तस्मात् निग्रहस्थानानां नियमार्थे सिद्धान्ताविरुद्ध: पञ्चावयवोपपन्नश्चेति उत्तरे पदे आरभ्यते। सिद्धान्ताविरुद्ध इति पदेन विरुद्धहेत्वाभासो नोपलभ्यते, अन्यत एव तस्याधिगतत्वात्। तथा चोक्तं तेन – "नानर्थकमपसिद्धान्तावरोधात् – 'सिद्धान्तमभ्युपेत्य अनियमात् कथाप्रसङ्गोऽप सिद्धान्त:' इति। सोऽनेनावरुध्यते"[1] इति।

**पञ्चावयवोपपन्नपदतात्पर्यम्** – भाष्यमते 'पञ्चावयवोपपन्न:' इत्यनेन न्यूनाधिकयो: निग्रहस्थानयोरभ्यनुज्ञा वादे भवत्येव। भाषितञ्च तेन – "पञ्चावयवोपपन्न इति 'हीनमन्यतमेनाप्यवयवेन न्यूनम्' 'हेतूदाहरणाधिकमधिकम्' (५.२.१२,१३) इति चैतयोरभ्यनुज्ञानार्थम्"[2] इति।

किन्तु पञ्चावयवोपपन्न इत्यत्र पञ्चग्रहणात् यदि न्यूनाधिके लभ्येते पुनश्चावयवग्रहणात् अवयवाभासा लभ्यन्ते, तर्हि लभ्यमानस्यार्थस्य पुनरभिधाने पिष्टपेषणमेव स्यात्। अतो वार्तिककार: आह – "वादे अवयवाभासोऽपसिद्धान्तश्च निग्रहस्थानमिति।"[3] इति।

**अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणप्रयोजनम्** – ननु अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कपदग्रहणमनर्थकमिति चेन्न, तस्य साधनोपालम्भव्यतिषङ्गज्ञापनार्थत्वात्। वादलक्षणे केवलं पञ्चावयवोपपन्न इति पदोपादाने प्रमाणतर्कपदापादाने च यत्र उभावपि पक्षौ स्थापनापरौ भवति तत्रापि वाद: स्यात्। अपि चान्तरेणापि अवयवसम्बन्धं प्रमाणान्यर्थं साधयन्तीति दृश्यते एव। तेनापि कल्पेन साधनोपालम्भौ वादे भवत इति ज्ञापितम्।

**प्रमाणतर्कपदग्रहणस्य प्रयोजनानन्तरम्** – पूर्वं वादलक्षणमुक्तं 'प्रमाणतर्क-साधनोपालम्भ:' इति। ततश्च छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प: इत्यनेन वादगतो निग्रहो न जल्पे जल्पगतश्च निग्रहो न वादे इति नावगन्तव्यम्। जल्पे वादगतो निग्रह इष्यते एव। सोऽयमिष्टार्थो ग्रन्थाधिक्यात् प्रमाणतर्कग्रहणात् लभ्यते। अतो भाष्यकार आह – "छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति वचनाद्विनिग्रहो जल्प इति मा विज्ञापि, छलजातिनिग्रहस्थानसाधनोपालम्भ एव जल्प: प्रमाणतर्क-

---

1. गौतम:, २००३, *न्यायदर्शनम्* (वृत्तिभाष्यवार्तिकतात्पर्ययुतम्), तारानाथ- न्यायतर्कतीर्थ-सम्पादितम्, पृष्ठा – ३४०, नवदेहली, एम्. मनहरलाल पावलिशरस्।
2. तत्रैव, पृष्ठा – ३४०
3. तत्रैव, पृष्ठा – ३४०

साधनोपालम्भो वाद एवेति मा विज्ञापीति एवमर्थं पृथक् प्रमाणतर्कग्रहणम्"[1] इति।

**वादक्रमः** – वादिविनोदाख्ये ग्रन्थे शङ्करमिश्रपादेन वादक्रमः प्रदर्शितः। तत्र वादे एकस्तत्त्वबुभुत्सुः स्वपक्षमुपस्थापयति 'शब्दोऽनित्यः' इति। अपरः शब्दस्य नित्यत्वं कथयति 'शब्दो नित्यः' इति। अतः शब्दोऽनित्यो नित्यो वेति संशयो भवति। वादी शब्दस्यानित्यत्वं प्रतिष्ठापयितुं कृतकत्वं हेतुमुपस्थापयति कृतकत्वादिति। 'यत् यत् कृतकं तत् तद् अनित्यमि'ति व्याप्तिः। 'अनित्यत्वव्याप्यकृतकत्ववान् अयमि'ति उपनयः। अतः शब्दोऽनित्यः इति निगमनम्। एवं सिद्धान्ते कृते वादी स्वपक्षे प्रयुक्ते हेतौ सव्यभिचारादिदोषा न सन्तीति कण्टकोद्धारं करोति। दृष्टान्तेऽपि दोषो नास्तीति प्रदर्शनीयमिति शङ्करमिश्रमतिः। तदुक्तं मिश्रपादेन – "एवं दृष्टान्तकण्टका अपि साध्यसाधनविकलत्वादयो यथास्फूर्ति निरासनीयाः।"[2] इति। ततश्च प्रतिवादिना वादिनो यस्मिन् वक्तव्ये आपत्तिरुत्थापनीया तदनुभाषणपूर्वक-मापत्तिरुत्थाप्येत। तदा प्रतिवादी वादिना उपस्थापिते हेतौ दोषमुद्भावयन् स्वपक्षमुपस्थापयति। तस्मात् परं वादी स्वपक्षे उत्थापितायाः आपत्तेः खण्डनपूर्वकं प्रतिवादिनः पक्षे आपत्तिमुत्थापयति। पुनश्च प्रतिवादी स्वपक्षे उत्थापितामापत्तिं दूरीकृत्य वादिनः पक्षे कृतामापत्तिं दृढीकरोति। क्रमेणानेन सिद्धान्तमुपैति अयं वादः।

**बौद्धमतम्** –बौद्धनिकाये वादस्य यल्लक्षणं प्राप्यते तद्धि वसुबन्धुकृतं लक्षणमिति ज्ञायते। वसुबन्धोः न कोऽपि ग्रन्थोऽस्माभिः लब्धः। किन्तु तस्य मतं न्यायवार्तिकादिषु ग्रन्थेषु खण्डनमुखेन प्राप्यते। तथा च बौद्धमते वादलक्षणम् – "स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः"[3] इति। स्वपक्षस्य सिद्ध्यर्थं तथा अपरपक्षस्यासिद्ध्यर्थं यत् वचनं क्रियते यो विचारः क्रियते वा स एव वादः इति बौद्धमतिः। अर्थात् स्वपक्षमण्डनं तथा परपक्षखण्डनं क्रियते यत्र स विचारो वादः।

**जैनमतम्** – जैनाचार्येण हेमचन्द्रेण स्वकृतायां प्रमाणमीमांसायाम् वादलक्षणमुक्तम् "तत्त्वसंरक्षणार्थं प्राश्निकादिसमक्षं साधनदूषणवचनं वादः"[4] इति।३०। यत्र स्वपक्षसिद्ध्यर्थं वादिनः साधनं भवति तथा तत्साधनप्रतिषेधाय प्रतिवादिनः दूषणं भवति। अपरतः

1. तत्रैव, पृष्ठा – ३४२
2. शङ्करमिश्रः, १९१५, *वादिविनोदः*, गङ्गानाथझासम्पादितः, पृष्ठा – ३, प्रयागः, इन्डियान् प्रेस्।
3. गौतमः, २००३, *न्यायदर्शनम्* (वृत्तिभाष्यवार्तिकतात्पर्ययुतम्), तारानाथ-न्यायतर्कतीर्थ-सम्पादितम्, पृष्ठा – ३४२, नवदेहली,एम्ण मनहरलाल पावलिशरस्।
4. हेमचन्द्रः, १९३९, *प्रमाणमीमांसा,* जिनविजयमुनिसम्पादिता, पृष्ठा– ६३, कलिकाता, सिंघी जैन ज्ञानपीठम्।

प्रतिवादिनोऽपि स्वपक्षसिद्धये साधनमुपस्थापयति तथा तत्प्रतिषेधाय वादिनो दूषणमुपस्थापयति। तादृशं वादिप्रतिवादिभ्यां साधनदूषणात्मकं वचनं वाद इत्यर्थः। तद्वचनं भवति प्राश्निकादिसमक्षमेव। प्राश्निकाः सभ्याः। आदिपदेन सभापतिवादि-प्रतिवादिपरिग्रहः। तेन च वादस्य चतुरङ्गता सिद्धा।

**आयुर्वेदमतम्** - न्यायादिषु शास्त्रान्तरेषु या नाम कथा सात्रायुर्वेदशास्त्रे तद्विद्यसंभाषात्वेनोच्यते। तद्विद्यसंभाषा संधायविगृह्यभेदेन द्विविधा। संधायसंभाषा अनुलोमसंभाषात्वेनोच्यते। विगृह्यसंभाषा तु प्रतिलोमसंभाषारूपा। उक्तञ्च चरकसंहितायाम् - "द्विविधा तु खलु तद्विद्यसंभाषा भवति - संधायसंभाषा, विगृह्यसंभाषा च।"[१] इति। आयुर्वेदमते या संधायसंभाषा सैव न्यायादिनये वादः इत्युच्यते। आयुर्वेदे या हि विगृह्यसंभाषा, सा जल्पवितण्डारूपा। अपि च सैवात्र वादशब्देनाख्यातः। अतश्चरकसंहितायामुक्तं स्पष्टमेव यत्र शास्त्रपूर्वकं विगृह्य कथयति कोऽपि तत्र वादो भवति। तथा चोक्तम् - "तत्र वादो नाम स यत् परेण सह शास्त्रपूर्वकं विगृह्य कथयति। स च द्विविधः संग्रहेण जल्पो वितण्डा चेति।"[२] इति (वि.८।२८)। अतः दीपिकायामुक्तम् शङ्कानिरासाय "संधायसंभाषा नये संवाद इत्युच्यते। विगृह्यसंभाषा तु जल्पवितण्डारूपा ज्ञेयेति।"[३] (वि.८।१५)।चरकसंहितायां संधायसंभाषालक्षणं तावत् नोक्तम्। किन्तु तद्विधिः निर्दिष्ट एव। यः खलु सामान्यविशेषज्ञानवान् प्रश्नोत्तरक्षमः अकोपनः,अनुपस्कृतविद्यः, अनसूयकः, विनयी, क्लेशक्षमः, प्रियम्वदश्च तेन एवम्विधगुणविशिष्टेन सह सन्धायसंभाषा भवति। उक्तञ्च - "तत्र ज्ञानविज्ञानवचन-प्रतिवचनशक्तिसम्पन्नेनाकोपनेनानुपस्कृतविद्येना-नुनयेनानुनयकविदेनक्लेश-क्षमेण प्रियसंभाषणेन च सहसन्धायसंभाषा विधीयते"[४] इति (८।१७)। अतः ज्ञानविज्ञानवचन-प्रतिवचनशक्तिसम्पन्नत्वादिगुणविशिष्टकृतसंभाषात्वम् सन्धाय-संभाषात्वम् इति वक्तुं शक्यते।

**उपसंहारः** -उपर्युक्तप्रबन्धे दृष्टं यत् नैयायिका बौद्धा जैनास्तथायुर्वेदाचार्याः सर्वे एव वादरूपां कथामङ्गीकुर्वन्ति। किन्तु वादफलविषये समस्ति तेषां मतभेदः। न्यायमते तत्त्वबुभुत्सुकथा वादः। तत्त्वनिर्णय एव तस्य फलम्, तस्मात् न्यायभाष्ये उक्तम् - "न्यायः खलु नानाप्रवक्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णायावसानो वाक्यसमूहः पृथगुद्दिष्ट उपलक्षणार्थम्। उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवती"ति।[1]

---

1. अग्निवेशः, २००६, *चरकसंहिता,* आयुर्वेददीपिकासमेता, पृष्ठा -२६४, वाराणसी,कृष्णदास अकादेमी।
2. तत्रैव, पृष्ठा - २६६
3. तत्रैव, पृष्ठा - २६४
4. तत्रैव, पृष्ठा - २६४

न्यायपरिशुद्धौ चोक्तम् – "वादे स्वसाधनस्थितौ परसाधननिवृत्तौ च तत्त्वनिर्णयो न विपर्यये।"[2]इति। सौगतनयेऽपि प्रपञ्चकथायां तथा वादे तत्त्वनिर्णय एव फलमिति स्वीकृतम्। विजिगीषुवादस्तत्र प्रत्यक्षेन निषिद्धः। किन्तु निग्रहस्थानप्रयोगेन धर्मरक्षणार्थं प्रतिपक्षस्य पराजयोऽपि अपेक्षितः। अतः, तन्मते तत्त्वनिर्णयः जयपराजयौ च वादफलमिति प्रतिपद्यते। तथाहि जयपराजयव्यवस्था निर्दिष्टा वादन्यायग्रन्थे – "तस्मात् परानुग्रहाय तत्त्वख्यापनं वादिनो विजयःक्क भूतदोषदर्शनेन मिथ्याप्रतिपत्तिनिवर्तनं प्रतिवादिनः।"[3] (१।३७) इति। आर्हतसम्प्रदाये तु तत्त्वाध्यवसायसंरक्षणार्थः वादः। तथाहि कुमुदचन्द्रे उक्तम् – "वाद एव एकः कथाविशेषः तत्त्वाध्यवसायसंरक्षणफल लाभपूजाख्यातिहेतुः निःश्रेयसशास्त्रेऽभ्युपगन्तव्यः न पुनर्जल्पवितण्डे तद्विपर्ययात्।"[4] इति। तत्त्वाध्यवसायसंरक्षणं तु स्वजयं तथा प्रतिपक्षपराजयमपेक्षते। अपि च निग्रहस्थानवत्त्वात् वादो नाविजिगीषुविषयः। तस्मात् जैननये वादस्यावान्तरं जयपराजयाविति। आयुर्वेदशास्त्रेऽपि उक्तम् – "तद्विद्यसंभाषा हि ज्ञानाभियोगसंहर्षकरी भवति।"[5] इति। (वि.८।१४)।

अत्र वादफलविषये न्यायादिदर्शनसम्प्रदायेषु वैमत्यसत्येऽपि वस्तुतः तेषां स्वकीयं मतमपरमतसायुज्यं भजते। केवलं तेषां दृष्टिभङ्गिभेदः एवात्र तत्कारणम्। यथा हि एकः सहोदरः कथयति ममोद्याने पञ्चाशत् वृक्षाः सन्ति। अपरश्च वदति उद्याने मे त्रिंशत् आम्रवृक्षाः विंशतिः नारिकेलवृक्षाश्च सन्तीति उभयोर्मतं यथा समीचीनम् तथात्र दर्शनसम्प्रदायानां मतं द्रष्टव्यम्। यतो हि बौद्धास्तथार्हताः परमाहिंसकाः,तस्मात् प्रत्यक्षेण ते विवादरूपं जल्पादिकं पृथक्तया न स्वीकुर्वन्ति। ते यत् वादस्वरूपं कथयन्ति, तत्रैव नैयायिकानां जल्पस्यान्तर्भावो भवति। नैयायिकास्तु वादजल्पवितण्डाभेदेन कथात्रैविध्यं स्वीकरोति।तस्मात् न्यायमते वादफलं तत्त्वनिर्णयः। जल्पवितण्डाफलञ्च जयपराजयौ इति। सौगतार्हतनये जल्पस्य वादान्तर्भावत्वे वादफलं तत्त्वनिर्णयः जयपराजयौ चेति ज्ञेयम्।

अत्रेदमवधेयं यत् सर्वास्वेव कथासु जयपराजयौ भवत एव। यत्र गुरुशिष्ययोर्मध्ये

1. गौतमः, २००३, *न्यायदर्शनम्* (वृत्तिभाष्यवार्तिकतात्पर्ययुतम्), तारानाथ-न्यायतर्कतीर्थ-सम्पादितम्, पृष्ठा -३४२, नवदेहली, एम्. मनहरलाल पावलिशरस्।
2. उदयनाचार्य्यः, १९६१, *न्यायपरिशुद्धिः,* अनन्तलालठाकुरसम्पादिता, मिथिला इनस्टिटिउट्।
3. धर्मकीर्तिः,१९३६, *वादन्यायः,* राहुलसंकृत्यायनसम्पादितः, पाटना, दि विहार एन्ड औरिशा रिसर्च सोसाइटि।
4. प्रभाचन्द्राचार्यः, १९३८, *न्यायकुमुदचन्द्रः* (१), पृष्ठा - ३३९, प. महेन्द्रकुमारन्याय-शास्त्रीसम्पादितः, काशी।
5. अग्निवेशः, २००६, *चरकसंहिता,* आयुर्वेददीपिकासमेता, पृष्ठा - २६४, वाराणसी, कृष्णदास अकादेमी।

वादः प्रचलति तत्रापि साधनोपालम्भद्वारा आचार्यस्य शिष्यस्य वा जयपराजयौ भवतः स्वत एव। किन्तु न्यायानुमतवादे वादिप्रतिवादिनोः कयोरपि जयेच्छा न विद्यते। जिगीषाभावात् तत्र फलमपि जिगीषा न भवति।अपि च ख्यातिलाभादयः सौगताः न वादफलत्वेन कथयन्ति। आर्हताः आयुर्वेदाचार्याः कुत्रचित् यशोलाभादिकं वादफलत्वेन वदन्ति। वस्तुतः यदि वादे कोऽपि जयमाप्नोति, तथात्वे तस्य ख्यातिः स्वयमेव सर्वत्र भवति विस्तृता। अतः ख्यातिलाभादयः वादस्यानुषङ्गिकाणि गौणफलानीति ज्ञायते। भाष्ये तदेतद्विद्यापरिपालनार्थं न तु लाभपुजाख्यात्यर्थम्" इत्युक्तम्।

आर्हतमते वादश्चतुरङ्गः। तथाहि उक्तं प्रमेयकमलमार्तण्डाख्यटीकायाम् – "ततो सिद्धश्चतुरङ्गवादःस्वाप्रेतार्थव्यवस्थापनफलत्वाद्वादत्वाद्वा लोकप्रख्यातवादवत्। एकाङ्गस्यापि वैकल्ये प्रस्तुतार्थापरिसमाप्तेः।"[1] इति। न्यायमते जल्पवितण्डयोः सभापतिः, सदस्याः, वादी, प्रतिवादी चेति अङ्गानि सन्ति। अतस्तत्र सभापतिः नियमः कथितः तार्किकरक्षायाम् – "सभापतिरपि वादिप्रतिवादिनोः सदस्यानाञ्च सम्मतेः रागादिरहितो निग्रहानुग्रहसमर्थः स्वीकरणीयः।"[2] इति। किन्तु तत्त्वार्थनिर्णयफलः वादः न चतुरङ्गः, तत्र सभापतिसदस्यानाञ्च उपस्थितिर्नावश्यिकी। दैवात् आगताः सदस्याः तिष्ठन्ति चेत् तेषामपि न निषेधः। वस्तुतस्तु आर्हतनये यदुक्तं वादश्चतुरङ्ग स च वादः नैयायिकानां जल्परूपः। जैनाचार्यैर्यद्यपि न्यायसम्मतः जल्पः नाङ्गीकृतस्तथापि जयपराजयफलत्वात् जैनवादः जल्पस्वरूप इति अनुमीयते। अतः तन्मतानुसारी वादस्चतुरङ्गो भवत्येव।

न्यायमते वादे चत्वारि निग्रहस्थानानि भवन्ति। 'पञ्चावयवोपपन्नः' इति सूत्रोद्धृतस्य पदस्य पञ्चपदेन न्यूनाधिके, अवयवपदेन चावयवाभासः, सिद्धान्ता-विरुद्धपदेन चापसिद्धान्तः च वादोऽनुज्ञायते। अवयवाभासपदेन हेत्वाभासानाञ्च ग्रहणम्। बौद्धमते तु द्विविधं निग्रहस्थानं वादे अनुज्ञातम् – असाधनाङ्गवचनम् अदोषोद्भावनञ्चेति। तथाहि उक्तं वादन्यायग्रन्थे –

> **"असाधनाङ्गवचनमदोषोद्भावनं द्वयोः।**
> **निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते।।"** (१।१)।।[3] इति।

---

1. प्रभाचन्द्रः, १९४१, *प्रमेयकमलमार्तण्डः,* महेन्द्रकुमारन्यायाचार्यसम्पादितः, पृष्ठा – ६४८, मुम्बइ, निर्णयसागर प्रेस।
2. वरदराजः, १९०३, *तार्किकरक्षासारसंग्रहः,* विन्धेश्वरीप्रसादत्रिवेदीसम्पादितः, वाराणसी।
3. धर्मकीर्तिः, १९३६, *वादन्यायः,* राहुलसंकृत्यायनसम्पादितः, पृष्ठा – २, पाटना, दि विहार एन्ड ओरिशा रिसर्च सोसाइटि।

अपि चोक्तं साधनदोषविषये तत्रैव – “साधनदोषा: पुन: न्यूनत्वम् असिद्धि: अनैकान्तिकतावादिन: साधयितुमिष्टार्थस्य विपर्ययसाधनम्, अष्टादश दृष्टान्ताभासाश्च, तेषामनुद्भावनमप्रतिपादनं प्रतिवादिन: पराजयाधिकरणम्” इति। बौद्धमते एतानि षट् निग्रहस्थानानि वादे पतन्ति।वस्तुत: नैयायिकानाम् अवयवाभासे एव असिद्धे: अनैकान्तिकताया: अष्टादशदृष्टान्ताभासानाञ्च अन्तर्भावो भवति। असिद्धिस्तथा अनैकान्तिकता च प्रत्यक्षेण न्यायस्य हेत्वाभासौ। दृष्टान्तश्च अवयवोदाहरणान्तर्गत:। इष्टार्थस्य विपर्ययसाधनञ्च वादिन: अपसिद्धान्तरूप:। तेन च वादे निग्रहस्थानप्रयोगविषये न्यायबौद्धमतयो: नामतो विभेदेऽपि परमार्थतया नास्ति किमपि वैमत्यमिति शम्।

✦✦✦

 ISSN : 0975-1769

# आधुनिकसंस्कृतवाङ्मये बुद्धविजयकाव्यस्य स्थानं प्रासङ्गिकता च

- डा. प्रफुल्लगडपालः

बुद्धविजयकाव्यम् आधुनिकसंस्कृतसाहित्यस्य अमूल्यो निधिः वर्तते। संस्कृतसाहित्यस्य बौद्धविद्यायाश्च विशिष्टेन विदुषा सुगतकविरत्नेन आचार्येण शान्तिभिक्षुशास्त्रिणा बुद्धविजयकाव्यं व्यरचि। बुद्धविजयकाव्यस्य प्रकाशनम् आचार्यशान्तिभिक्षुशास्त्रिणः पत्नी श्रीमती सुजाताशास्त्री राजनिवासात् सोलनतः (हिमाचलप्रदेशात्) १९७४ तमे वर्षे अकारयत्। १९७७ तमे वर्षे साहित्य-अकादमीतः ग्रन्थस्यास्य प्रणयनार्थं आचार्यशान्तिभिक्षुशास्त्री साहित्याकादमी-सम्मानं प्राप्नोत्। ततः १९८८ तमे वर्षे आचार्यशास्त्रिमहोदयः लेह-लद्दाखस्थ-केन्द्रीयबौद्धविद्यासंस्थानात् बौद्धहिमालयग्रन्थमालायाः सप्तमप्रसूनत्वेन बुद्धविजयकाव्यं स्वोपज्ञ-हिन्द्यनुवादेन सह प्राकाशयत्।

अस्य महाकाव्यस्य प्रणेतुः सुगतकविरत्नस्य आचार्यशान्तिभिक्षुशास्त्रिणो जन्म २७ दिसम्बर, १९१२ मिते काले उत्तरप्रदेशस्य लखनऊसमीपे बीबीपुरग्रामे सञ्जातम्। अस्य पिता पण्डित-अयोध्याप्रसादत्रिपाठी माता रुक्मिणीदेवी च आस्ताम्। अनेन जयपुरसंस्कृतमहाविद्यालयात् १९३८ तमे वर्षे स्वर्णपदकेन सह साहित्याचार्य-उपाधिः समधिगतः। कालान्तरेण भदन्तबोधानन्दस्य सान्निध्येऽयं बौद्धभिक्षुः जातः। ततोऽयं विश्वभारतीशान्तिनिकेतने अध्यापनमपि अकरोत्। अत्रैव भिक्षुजीवनं परित्यज्य १९५३ तमे वर्षे सुजातया सह विवाहं कृतवान्। १९५६-५९ मिते काले अयं जर्मनीस्थ-कार्लमार्क्सविश्वविद्यालये लाइपछिग् इत्यत्र अध्यापनमकरोत्। १९५९ तमे वर्षे अयं पीएच. डी. उपाधिं प्राप्नोत्। ततोऽयं १९५९-७२ मिते काले श्रीलङ्कास्थ-विद्यालङ्कारविश्वविद्यालये संस्कृतस्य अध्यापनमकरोत्। पुनः भारतमागत्य दिल्लीविश्वविद्यालये मानार्हाचार्यरूपेण कार्यमकरोत्। १९७७ तमे वर्षे बुद्धविजयकाव्यस्य कृते अयं साहित्याकादमीपुरस्कारेण सम्मानितः। १९७९ तमे वर्षे श्रीलङ्कास्थ-केलानियाविश्वविद्यालयेन डी. लिट्. उपाधिः अस्मै दत्तः। १५ अक्टूबर, १९९१ दिनाङ्के अयं निर्वाणमाप्तवान्। अनेन १४ महत्त्वपूर्णा ग्रन्था: प्रणीताः, अनूदिता सम्पादिताश्च।

---

* सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः

आधुनिकसंस्कृतसाहित्ये अस्य महनीयग्रन्थस्य उपयोगिता माहात्म्यञ्च वर्तते। ग्रन्थोऽयं न केवलं संस्कृतसाहित्यस्यापितु समस्तसाहित्यप्रपञ्चस्य समादरणीयो ग्रन्थो वर्तते। बुद्धविजयकाव्यस्यास्य प्रमुखतो भागद्वयं पूर्वार्द्धम् उत्तरार्द्धञ्च वर्तते। अस्य महाकाव्यस्य निबन्धनम् अत्यन्तं सुनियोजितं वर्तते। अयं ग्रन्थः १९ पर्वसु विभक्तो वर्तते, यस्मिन् खलु १०० सर्गाः वर्तन्ते। पूर्वार्द्धभागे आरम्भिकसप्तपर्वसु ५० सर्गाः उत्तरार्द्धे च भागे द्वादशपर्वसु पुनः ५० सर्गाः निबद्धाः वर्तन्ते। इत्येवं प्रकारेण बुद्धविजयकाव्ये आहत्य १०० सर्गाः वर्तन्ते। अस्मिन् महाकाव्ये आहत्य ५१०० श्लोकाः सन्तीतिकृत्वा अस्य अपरं नाम पञ्चसाहस्रीसंहिता अपि वर्तते। अत्यन्तं प्राञ्जलया, हृदयग्राहिण्या सुबोधया च भाषया ग्रथितेऽस्मिन् महाकाव्ये भगवतो बुद्धस्य जीवनस्य, चरितस्य दर्शनस्य च सुष्ठु वर्णनं लभ्यते। सम्भाव्यते यत् ललितविस्तरमुपजीव्य ग्रन्थोऽयं विरचितो जातः इति। अस्मिन् महाकाव्ये सिद्धार्थगौतमबुद्धस्य जन्म, महाभिनिष्क्रमणं, बुद्धत्वप्राप्तिः, धर्मचक्रप्रवर्तनं, महापरिनिर्वाणादिघटनानां मनोहारिचित्रणम् उपलभ्यते। बुद्धस्य पूर्वजन्मनां कथाः अपि अत्र प्रसङ्गवशाद् उपलभ्यन्ते। बुद्धकालीनेतिहासस्य सामाजिक-आर्थिक-धार्मिक-राजनैतिकस्थितीनां च अस्मिन् महाकाव्ये सुष्ठु निरूपणं दृश्यते। तत्रापि भगवतो बुद्धस्य शिक्षाः देशनाश्च अत्र विशेषतया विलसन्ति।

अतः आधुनिकसंस्कृतसाहित्ये ग्रन्थोऽयं महत्त्वपूर्णं स्थानं भजते। अस्मिन् ग्रन्थे भगवतो बुद्धस्य शिक्षाः स्थविरवादपरम्परानुसारं लक्ष्यन्ते, ताः शिक्षाः अत्यन्तं लोकोपयोगिन्यः सन्ति। पुनः साम्प्रतिक काले विश्वे अनेकप्रकारकाः समस्या समाजे दृश्यन्ते। नैतिकचरित्रदृशा समाजस्य अधःपतनं जायमानं वर्तते। एतादृशपरिस्थितौ अस्य ग्रन्थस्य माध्यमेन प्रस्तुता भगवतो बुद्धस्य ताः शिक्षा अत्यन्तं महत्त्वं भजन्ते, सर्वसाधारणस्य कल्याणाय कल्पिष्यन्ते चेति।

संस्कृतसाहित्ये ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलाचरणपरम्परा दृश्यते। अत्र प्रथमपर्वणः समग्रोऽपि प्रथमसर्गः मङ्गलाचरणायैव कल्पितोऽस्ति। प्रथमपर्वणि बुद्धवन्दनानाम्नि प्रथमे सर्गे भगवतो बुद्धस्य वन्दना कृता कविना।[१] अस्मिन् सर्गे पूर्वजातानां बुद्धानामपि स्तुतिः कृता वर्तते तत्र च भविष्यमाणानां बुद्धानामपि स्तुतिः वर्तते।[२] अत्र बुद्ध-दीपङ्कर-मङ्गल-सुमन-रैवत-शोभित-अनवमदर्शि-पद्मोत्तर-नारद-सुमेध-सुजान-प्रियदर्शि-अर्थदर्शी-धर्मदर्शी-सिद्धार्थ-तिष्य-पुष्य-विपश्यि-शिखि-विश्वभू-क्रकुच्छन्द-कोणागमन-कश्यप-इत्येतेषां चतुर्विंशतिः महापुरुषाणां स्तुतिः कृता वर्तते। भिन्न-भिन्न-देशेषु त्रिपिटकानां संरक्षणपरम्परायाः वर्णनं कृत्वा सिद्धार्थगौतमबुद्धं सम्बोध्य तस्य विस्तरेण स्तुतिमकरोत्कविः। ततो भगवतो बुद्धस्य अहिंसापालनस्य शिक्षायाः प्रासङ्गिकता अत्र उपस्थापिता। तद्यथा –

**अस्मिन् कलियुगे क्रूरे हिंसयोन्मत्तदुर्जने।**

**पाठयन्तमहिंसाया पाठं तं नौमि गौतमम्।।**[३]

**श्रीबुद्धविजयकाव्यस्य प्रासङ्गिकता**

आचार्यशान्तिभिक्षुशास्त्रिप्रणीतं बुद्धविजयकाव्यम् उपदेशैः शिक्षाभिश्च संवलितं किञ्चित् सुन्दरं महाकाव्यं वर्तते। महाकाव्येऽस्मिन् भगवतो बुद्धस्य बौद्धधर्मस्य चोपदेशानां विशालराशिः उपलभ्यते। बौद्धशास्त्रेषु यथोक्तं खलु ''यत् बुद्धभाषितं तत्सुभाषितम्'' इति। तदनुसारेण जगति यत्किमपि बुद्धभाषितं वर्तते तत्सर्वं सुभाषितमेव। अनेन प्रकारेण बुद्धविजयकाव्ये बुद्धभाषितानां सुभाषितानां महान् राशिः उपलभ्यते। वस्तुतो महाकाव्यस्यास्य प्रत्येकं सर्गः सदुपदेशैः शिक्षाभिश्च परिपूर्णोऽस्ति। अत्र पर्वशः बुद्धशिक्षा उपस्थापयितुं प्रयासो विधीयते।

तत्र तत्र प्रसङ्गानुसारं प्राच्यबौद्धधर्मग्रन्थानुसारेण कविः बुद्धप्रवचनानि सम्यक्तया अत्र न्यरूपयत्। प्रथमपर्वणः बुद्धवन्दनाभिधाने प्रथमे सर्गे भगवन्तं बुद्धं प्रति श्रद्धान्वितः कविस्तं सुभाषितसागर इति अभिज्ञायया व्यभूषयति। तद्यथा –

**सुभाषितानां गंभीरं सागरं प्रणमाम्यहम्।**
**स्यन्दते यत्र यत्किंचित् सुभाषितनदीनदम्।।**[४]

बुद्धस्य सुशिक्षाभिः जगत् सुखी भवति इति बुद्धशिक्षाणां प्रासङ्गिकता कविः इत्थं प्रस्तौति–

**स्पृहयामि कृपापारावाराय बृहदात्मने।**
**यत्कृपाबिन्दुमासाद्य जगतीयं सुखायते।।**[५]

भगवतो बुद्धस्य शिक्षाः आदिमध्यान्तकल्याणकारिण्यः वर्तन्ते, ताभिः मनुष्यमात्रस्य कल्याणं भवेदिति कामना कविः इत्थं प्राकटयत् –

**आदिमध्यान्तकल्याणो धर्मो गगनसंनिभः।**
**आश्रयः सर्वसत्त्वानां यस्य सोऽस्तु ममाश्रयः।।**[६]

बौद्धताभिवन्दनानाम्नि द्वितीये सर्गे कविः भगवतो बुद्धस्य स्तुतिं कुर्वन् सदाचरणशीलान् बौद्धान् नमस्करोति।[७] भगवतो बुद्धस्य विचारैः प्रभाविताः बुद्धानुयायिनः बोधिसत्त्वाश्च अत्र सम्पूजिताः अभवन्। ''अहिंसा परमो धर्मः'' इति बौद्धधर्मस्य मूलस्वरूपं वर्तते इतिकृत्वा अहिंसायाः अहिंसकानाञ्च प्रशंसा विशेषतः अत्राभूत्। अयं विचारोऽनेन श्लोकमाध्यमेन दृढतया स्पष्टीभवति–

**धर्मं हि शरणं गत्वा ते शान्तिं शरणं गताः।**

**अहिंसा परमा शान्तिः शान्तं धर्मं नमाम्यहम्।।**[८]

अहिंसा, चौर्यकर्म, कामुकता, असत्यवाक्, मद्यपानविरक्तिः चेत्येते दुर्गुणाः निन्दिताः एवञ्च एतेषां दुर्गुणैः विरक्तानां स्तुतिः अत्र कविः अकरोत्। बुद्ध–धर्म–सङ्घान् शरणं गच्छन् कविः एतेषां माहात्म्यं विवर्णयति। वस्तुतः बुद्धस्य गुणाः ज्ञानम्, अहिंसा एकता च बौद्धतापदेन सम्बोधिताः समभवनत्र। तान् गुणान् एव कविः वन्दते।

कल्याणमित्रं स्तुवन् कविः आत्मानं शुद्धसत्त्वत्वेन प्रतिष्ठापयितुम् उत्तमभावनां हृदि प्रकटयति। द्वितीये बोधिव्रतकथाभिधाने पर्वणि सुमेधबोधिसत्त्व एव गौतमबुद्धत्वेन जन्म ग्रहिष्यतीति कथयित्वा दीपङ्करो बोधिसत्त्वः भविष्यद्वचः कथयति। तत्र कविः बोधिव्रतपालनरतस्य बोधिसत्त्वस्य सद्गुणान् कथयति। तद्यथा–

**दानं ददाति लोकाय बोधिव्रतपरायणः।**
**परार्थबन्धनोऽबद्धो विधातुं दुःखिनां सुखम्।।**[९]

अत्र बोधिव्रतस्य वर्णनं लभ्यते। अग्रिमसर्गे उन्मादन्त्याः रूपसौन्दर्ये मोहितस्य नृपस्य चित्ते यदा सद्बुद्धेः विकासो जायते तदा सः सेनापतिम् अहिपारकम् एतैः शब्दैः स्वसद्विचारान् कथयति–

**आत्मानमप्रभुः पातुं चेद् दौःशील्यादहं वद।**
**शीलेन योजयिष्येऽत्र पालयिष्ये कथं प्रजाः।।**[१०]

अत्र मानवकर्तव्यविषये अत्यन्तं गरिमापूर्णम् उपदेशं सः श्रावयति।[११] पुनः अन्यत्र गुरोः आज्ञामपालयन् शिष्यरूपो बोधिसत्त्वः शीलस्य अचौर्यस्य च उपदेशान् कथयति।[१२]

तृतीयपर्वणः आरभ्य षष्ठपर्व यावत् भगवतो बुद्धस्य मानवीयजीवनस्य सुचारुवर्णनं विद्यते। अत्र प्रसङ्गानुसारं सच्छिक्षायुताः उपदेशाः अपि वर्तन्ते। ततोऽग्रे बोधिप्राप्त्यनन्तरं कानिचन दिनानि बुद्धत्वस्य आनन्दम् आस्वादयन् तथागतो बुद्धः काशीस्थ–ऋषिपतनस्य मृगदावोपवने पञ्चवर्गीयान् भिक्षून् सदुपदेशैः कृतार्थीकरोति। सः मध्यममार्गस्योपदेशम् इत्येवं प्रकारेण करोति–

**भिक्षवो धर्मचर्यायां रतिचित्तेन साधुना।**
**प्रव्रजितेन संसेव्यौ न द्वावन्तौ कदाचन।।**

**यो हि कामसुखारामो न सेव्योऽन्तः स आदिमः।**
**रमन्ते बहवस्तस्मिन् न स धर्म्यो विधिर्मम।।**[१३]

ततः बुद्धः द्वितीयम् अन्तमित्थम् उपदिशति–

**यः खल्वात्मक्लमाभ्यासो निराहारादिभिः कृतः।**
**अपरोऽन्तः स विज्ञेयो न सेव्यः सोऽपि कर्हिचित्।।**[१४]

इयं मध्यमा प्रतिपत् दुःखमुक्तेः निर्वाणप्राप्तेश्च महत् साधनमिति कविना अत्र इत्थं प्रस्तुतम्

**उभावन्तौ परित्यज्य मध्यमा प्रतिपन्मम।**
**शान्तिबोधिमुखेनेयं दुःखनिर्वाणकारिणी।।**[१५]

अत्र सः मध्यममार्गस्यास्य गहनं विवेचनं प्रस्तौति।[१६] आर्यसत्यानां विवरणं कथयित्वा भगवान् बुद्धः एतं सिद्धान्तं तेषां कृते बुद्धिसुलभं विदधाति। तद्यथा–

**दुःखं सर्वस्य लोकेऽस्मिन्नार्यसत्यं हि तन्मम।**
**न कोऽपि विवदत्यत्र विविक्तं न सुखं यतः।।**[१७]

अग्रे सः आर्यसत्यानां विशदतया वर्णनं करोति।[१८] अनन्तरं सः यक्षानां जिज्ञासां शान्तयन् तान् धर्मोपदेशं करोति।[१९]

षडहापदानाभिधाने सर्गे बुद्धः पञ्चस्कन्धान् दिशति। खिन्नमनः यशोदं भगवान् तथागतो बुद्धः सत्प्रवचनैः एवं सन्दिशति–

**दरिद्रो विद्यते कोऽपि धनवानत्र कश्चन।**
**दरिद्रदुःखहर्ता हि धनाढ्य किल शोभते।।**[२०]

भगवतो बुद्धस्य उपदेशोऽयं साम्प्रतिके काले समधिकः उपयोगी वर्तते। समाजे विद्यमानाम् आर्थिकीं विषमतां शमयितुमिदं वचः मन्त्रवद् वर्तते। बौद्ध–अर्थशास्त्रेऽस्य महत्स्थानं वर्तते। अनेन सिद्धान्तेन समाजे व्याप्ता आर्थिकी विषमता नाशयितुं शक्यते, या खलु समाजशास्त्रिणां कृते सर्वदा चिन्तायाः विषयो भवति।

त्रिकल्याणधर्मनिर्देशः कल्याणचित्तवर्धनः इत्येतयोः सर्गयोः भगवतो बुद्धस्य कल्याणभावना कथिता वर्तते। या खलु मानवीयजीवनस्य आदर्शरूपेण प्रतिष्ठां प्राप्नोति। इत्येवं सप्तमपर्वणि बुद्धोपदेशाः सुष्ठुरीत्या वर्णिता वर्तन्ते। अष्टमपर्वणि भद्रवर्गीय–काश्यपबन्धु–बिम्बिसार–महाकाश्यप–मौद्गल्यायन–कात्यायनादीनां दीक्षावसरेषु भगवांस्तान् उपदेशान् कथयति।

भगवतो बुद्धस्य स्वीयकल्याणयुतोपदेशानां विषये इत्थं स्वभावनां प्रकटयति–

**आदिकल्याण उक्तो यो मध्ये कल्याण एव यः।**
**पर्यवसानकल्याणो यो वो धर्मो मयोत्तमः।।**

**चरन्तश्चारिकां सर्वे लोकानुग्रहकांक्षया।**
**अद्वया उपदेष्टुं तं कृतकृत्या अपीत भोः।।**[२१]

अस्मिन् पर्वणि वर्णिताः उपदेशाः मानवीयजीवनस्य कृते मङ्गलकारिणः, उत्तमपदप्रापकाः सदाचरणयुताश्च वर्तन्ते।

भद्रवर्गीयान् पापविरतिपूर्णोपदेशान् कथयन् भगवांस्तान् सदाचरणयुतकर्मसु प्रवर्तयितुं प्रयतते। तद्यथा–

**पापानि ये न कुर्वन्ति मनोवाक्कायचेष्टितैः।**
**त एव लोकान् रक्षन्ति करुणामतयो जनाः।।**

**येन पीडात्र सत्त्वानां यच्च निन्दन्ति सज्जनाः।**
**सर्वं तत्पापकं कर्म करणीयं न कर्हिचित्।।**[२२]

भगवतो बुद्धस्य उपदेशेषु दर्शनसम्बद्धं प्रवचनमत्र प्रस्तूयते–

**धर्मा ये हेतुप्रभवास्तेषां यो हेतुरुद्भवे।**
**हेतुस्तथा निरोधे यस्तमत्राह तथागतः।।**[२३]

कपिलवास्तु इति नवमे पर्वणि राजकुल–नन्द–राहुलादीनां दीक्षावसरेषु भगवान् उत्तमवचैः तान् उपकरोति। दशमपर्व पूर्णतः भगवतो बुद्धस्य प्रवचनैः संवलितं वर्तते। अत्र उपालि–अनाथपिण्डद–बिम्बिसार–कोसलराजादीनां कृते दीक्षावसरे बुद्धः स्ववचोभिस्तान् उत्तमकर्माणि उपदिशति। अस्मिन्नैव पर्वणि त्रिरत्नमहिमा सत्यावववादश्चेति सर्गद्वयं बुद्धस्य उत्तमप्रवचनकारणात् विशिष्टं स्थानं भजते।

आनन्दपर्वणि आनन्द–विशाखा–अङ्गुलिमाल–जीवक–सुभद्रादीनां कृतेऽपि भगवान् तेषां दीक्षावसरेषु सदुपदेशान् अकथयत्। अङ्गुलिमालाय बुद्धभाषितोपदेशास्तावदत्र प्रस्तुयन्ते–

**नित्यं स्थितोऽस्मि तं प्राह क्राम्यन्नेव तथागतः।**
**भ्राम्यन् भ्राम्यन् परिश्रान्तस्तिष्ठ त्वमपि साम्प्रतम्।।**[२४]

इत्येवमस्मिन् बुद्धविजयकाव्ये प्रसङ्गानुसारेण बुद्धोपदेशराशिः प्रचुरतया उपलभ्यते। वस्तुतः महाकाव्येऽस्मिन् प्रस्तुताः भगवतो बुद्धस्य शिक्षा साम्प्रतिककालेऽतीव महत्त्वं भजन्ते। साम्प्रतं समाजे नैकविधाः समस्याः कुरीतयश्च सन्ति। तासां समस्यानां समाधानं भगवतो बुद्धस्य शिक्षाभिः कर्तुं शक्यते। भगवतो बुद्धस्य शिक्षाः समाजस्य कल्याणाय कल्पन्ते, यतोहि भगवता बुद्धेन एकं पदमपि व्यर्थं शिक्षाविहीनं वा न उच्चारितम्। तस्य शिक्षाभिः प्राणिनः सुखिनो भवितुमर्हन्ति। अतः आधुनिके संस्कृतसाहित्ये

अस्य महाकाव्यस्य महत्स्थानं महती च प्रासङ्गिकता वर्तते इति शम्।

**ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत्।**
**तेषां च यो निरोध एवंवादी महाश्रमणः।।**

१. बु.वि.का. १.१-२
२. बु.वि.का. १.३
३. बु.वि.का. १.२६
४. बु.वि.का. १.३०
५. बु.वि.का. १.३२
६. बु.वि.का. १.४५
७. बु.वि.का. २.१-१४
८. बु.वि.का. २.१८
९. बु. वि. का. ६.४४
१०. बु. वि. का. ८.२६
११. बु. वि. का. ८.२७-२९
१२. बु. वि. का. ८.४५-४९
१३ बु. वि. का. ४१.२-३
१४. बु. वि. का. ४१.१०
१५. बु. वि. का. ४१.१६
१६. बु. वि. का. ४१.४-१६
१७. बु. वि. का. ४१.१७
१८. बु. वि. का. ४१.१८-५१
१९. बु. वि. का. ४२.२३
२०. बु. वि. का. ४४.१२
२१. बु. वि. का. ५१.४-५
२२. बु. वि. का. ५१.१७-१८
२३. बु. वि. का. ५४.९
२४. बु. वि. का. ८६.३६

✦✦✦

# जातेरस्त्रीविषयादयोपधात् सूत्रविचारः

**डॉ. मधुकेश्वर भट्टः***

त्रिपदात्मकं सूत्रमिदम्। जातेः इति पञ्चम्यन्तं पदम्, अस्त्रीविषयाद् इति पञ्चम्यन्तं पदम्, अयोपधात् इति पञ्चम्यन्तं पदम्। **स्त्रियाम्**[1] इति सूत्रम् **ङ्याप्प्रातिपदिकात्**[2] इति सूत्रात् प्रातिपदिकात् इति पदम्, **अन्यतो ङीष्**[3] इति सूत्रात् ङीष् इति **अनुपसर्जनात्**[4] इति सूत्रं च अनुवर्तते। इदं सूत्रं ङीष् प्रत्ययं विधत्ते। सूत्रस्थेन जातिपदेन जातिवाचकः शब्दः लक्ष्यते। अत्र सूत्रे अस्त्रीपदेन स्त्रीभिन्नार्थः नापेक्षितः विषयपदसमिभव्याहृतत्वात्। अन्यथा अस्त्री इति पदनैव स्त्रीलिङ्गभिन्नं प्रातिपदिकम् इत्यर्थसम्भवात् विषयशब्दः अनर्थकः स्यात्। अतः अन्यत्रभावे अत्र विषयशब्दः। अस्त्रीविषयात्- स्त्री-विषयः नियमेन वाच्या यस्याः इति बहुव्रीहिणा स्त्रीविषयशब्दो नियतस्त्रीलिङ्गपरः। अतः अस्त्रीविषयात् इति पदेन अनियतस्त्रीलिङ्गात् इति विवक्षितम्। य-उपधा यस्य योपधः, न योपधः अयोपधः, तस्मात् अयोपधात् इति। जातिवाचकात् अस्त्रीविषयात् अयोपधात् प्रातिपदिकात् स्त्रियां ङीष्-प्रत्ययो भवति इत्यर्थः संपद्यते। तदेव सिद्धान्तकौमुद्याम् अवादि जातिवाचि यन्नच स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्[5] इति। कुक्कुटी, सूकरी, मयूरी, वृषली, नाडायनी, कठी, बह्वृची इत्यादीन्यत्र उदाहरणानि। उदाहरणेषु सर्वे शब्दाः जातिवाचकाः अनियतस्त्रीलिङ्गकाः अयोपाधाश्च। अतः अनेन सूत्रेण ङीष्प्रत्यये इमानि उदाहरणानि भवन्ति।

### जातिपदविमर्शः

का जातिर्नाम? इति प्रश्ने जाते तत्र नित्यमेकमनेकानुगतं सामान्यम्[6] इति नैयायिकोक्तजातिलक्षणम् आदौ उपतिष्ठते। उत्पत्तिविनिर्मुक्तं समवायसम्बन्धेन

---

* सहाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली

1. अष्टा. 4.1.3
2. अष्टा. 4.1.1
3. अष्टा. 4.1.40
4. अष्टा. 4.1.14
5. वै.सि.कौमुदीप्रथमभागः पृष्ट.सं 577
6. त.सं.पृ.सं.81.

अनेकसमवेतत्वम् एकत्वञ्च यस्य भवति सा जातिः इति नैयायिकाः स्वीकुर्वन्ति। इदमेव लक्षणम् अत्रापि स्वीक्रियेत तदा शुक्लादिगुणानाम् उत्पत्तिविनाशविनिर्मुक्तता एकत्वञ्च अस्त्येव इति कृत्वा नित्यत्वैकत्वेत्यंशेन जातिवाचकत्वात् शक्लादिगुण-वाचकानामपि जातित्वात् जातेरस्त्रीविषयादयोपाधात् इति सूत्रेण ङीष् प्रसज्येत। किञ्च औपगवी कठी इत्यादौ उपर्युक्तजातिलक्षणाभावात् ङीष्-प्रत्ययः एव न प्रसज्येत। सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः इत्यादिस्मृत्या जननेन प्राप्यते ब्राह्मणत्वादिः सा जातिः चेत् युवत्वादौ जातित्वाभावात् युवतितरा इत्यत्र युवतिशब्दस्य जातित्वाभावात् जातेश्च इति सूत्रेण विधीयमानः पुवद्भावनिषेधः न स्यात् पुंवद्भावश्च प्रसज्येत। अतः सूत्रे जातिपदं पारिभाषिकपरम्।अतः भाष्यकाराः त्रिभिः प्रकारैः जातिं लक्षयन्ति तद्यथा–

> **आकृतिग्रहणा जातिः लिङ्गानां च न सर्वभाक्।**
> **सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह।।**[1]

अपरं जातेः लक्षणम्–

> **प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।**
> **असर्वलिङ्गां बह्वर्थां तां जातिं कवयोविदुः।।**[2]

प्रथमकारिकायां भगवता भाष्यकारेण त्रीणि लक्षणानि प्रोक्तानि –

1. आकृतिग्रहणा जातिः।
2. लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या जातिः।
3. चरणैः सह गोत्रं च जातिः।

**अकृतिग्रहणा जातिः –**

तत्र जातेः प्रथमलक्षणमेतत्। आकृतिः = अवयवसन्निवेशविशेषः। गृह्यते अनेनइति ग्रहणम् = व्यञ्जकं ज्ञानसाधनं वा। ग्रह्-धातोः करणार्थे कृत्यल्युटो बहुलम्[3] इति सूत्रेण ल्युट्प्रत्यये ग्रहणपदं निष्पद्यते। आकृतिः ग्रहणं यस्याः सा आकृतिग्रहणा जातिः। व्यञ्जकम् आकृतिः व्यङ्ग्या च भवति जातिः। अवयवसन्निवेशविशेषेण या आकृतिविशेषा व्यज्यते सा जातिः इत्यर्थः। ननु आकृतिशब्दस्य प्रयोगःशास्त्रे कदाचित् जातिशब्दस्य पर्यायत्वेनापि व्यवह्रियते। तद्यथा

1. म.भा. 4अ.1पा. 2आ 63सू. पृ. सं. 86-87
2. म.भा. 4अ.1पा. 2आ 63सू. पृ. सं. 87-88
3. अष्टा. 3.3.113

महाभाष्ये **भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतमिति। नेत्याह। आकृतिर्नाम सा**[1] इति। अतः आकृतिपदस्य जातौ प्रसिद्धत्वात् जातिव्यङ्ग्या जातिः इति लक्षणार्थश्चेत् उच्यते जात्याकृतिव्यक्तयः पदार्थः इत्यादौ आकृतिपदस्य अवयवसंस्थानार्थकतया अपि दृष्टत्वात् अत्र आकृतिशब्देन अवयवसंस्थानार्थो गृह्यते। अतः उच्यते अवयवसन्निवेशव्यङ्ग्या जातिः इति। आकृतिशब्दसमानाधिकरणात् करणसाधनग्रहणशब्दस्य टित्वात् ङीपा भवितव्यम्। येन आकृतिः ग्रहणी यस्याः सा इति बहुव्रीहिसमासे[2] **नद्यृतश्च**[3] इति सूत्रेण समासान्ते कप्-प्रत्यये आकृतिग्रहणिका इति स्यात्। कथं आकृतिग्रहणा इति टाबन्तः प्रयोगः इति संशीतिः जायते। अत्र ग्रहणशब्दः आदौ नपुंसकलिङ्गेन व्युत्पाद्य ततः आकृतिशब्देन सम्बध्यते। ततः पदान्तरसन्निधानेन ग्रहणशब्दस्य आकृतिपदेन यो लिङ्गविशेषसम्बन्धो बहिरङ्गः। बहिरङ्गापेक्षया अन्तरङ्गस्यैव ग्रहणौचित्यात् सामान्यलिङ्गेन वाक्यं क्रियते ततः आकृतिः ग्रहणं यस्याः सा इति समासः क्रियते। अतो दोषो वार्यते इति इदं समाधानं न्यासपदमञ्जरीकारैः उक्तम्। तद्धि न्यासे **ग्रहणशब्दो हि पूर्वं करणसामान्ये व्युत्पादितः, पश्चाद् विशेषेणाभिसम्बध्यते। तत्र पदान्तरसन्निधानेन यस्तस्य लिङ्गविशेषसम्बन्धः, स च बहिरङ्ग इति सामान्यलिङ्गेनैवान्तरङ्गेण वाक्यं कृत्वा समासः क्रियते**[4] इति।

वस्तुतस्तु आकृतिग्रहणा इत्यत्र ग्रहणशब्दस्योपसर्जनत्वात् ङीप्-प्रत्ययस्य प्राप्तिरेव नास्ति। यतः ङीप्-प्रत्ययविधायकं सूत्रम् **अनुपसर्जनात्**[5] इत्यस्मिन्नधिकारे पठितं विद्यते। अनुपसर्जनाधिकारे पठितस्य सूत्रस्य प्रवृत्तिः अनुपसर्जनं यत् टिदाद्यन्तं तत्रैव ङीप् प्रवर्तते। अत्र तु बहुव्रीहिसमासे अन्यपदार्थस्य प्रधानत्वात् ग्रहणशब्दस्योपसर्जनत्वात् ङीप्-प्रत्ययस्य प्रवृत्तिरेव नास्ति। घटवृक्षगोत्वादिजातेः लक्षणमेतत्। ककुदखुरविषाणादिमत्संस्थानव्यङ्ग्यत्वात् ईदृशाकारो गौरित्याकृत्युपदेशादिव्यङ्ग्या गोत्वजातिः इत्यर्थः।

ननु आकृतिव्यङ्ग्या जातिश्चेत् बाल्याद्यवस्थाभेदभिन्नानेकदेहवृत्तिदेवदत्तत्वादेः आकृतिव्यङ्ग्यत्वेन अतिव्याप्तिः इति चेत् अत्र समाधानम् आकृतिव्यङ्ग्या जातिः इत्यत्र समानकालिकानेकव्यक्तिवृत्यनुगतसंस्थानव्यङ्ग्या जातिः इति विशेषणदलं

1. म.भा. पस्पशा. पृ.सं. 10
2. अनेकमन्यपदार्थे (अष्टा 2.2.24) इति सूत्रेण
3. अष्टा. 5.4.153
4. काशिका.क्र.सं.1313
5. अष्टा. 4.1.14

समायोजनीयम्। तेन देवदत्तादिषु समानकालिकानेकव्यक्तिवृत्यभावात् नातिव्याप्तिः। वस्तुतः विशेषणदलानुपदानेपि अत्र दोषो वार्यते। देवदत्ते अवस्थाभेदेपि चौत्ररूपिधर्मिणः भेदाप्रतीतेः स एवायमिति प्रतीतेश्च।

जातेः प्रथमलक्षणेन गोत्वादिजातिस्तु संगृहीता, किन्तु ब्राह्मणत्वादिजातिविशेषस्तु न संगृहीता। तत्र ब्राह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वात्। यादृशं संस्थानं ब्राह्मणस्य भवति तादृशमेव संस्थानं क्षत्रियस्यापि भवति इति अव्याप्तिदोषः। अतः लक्षणान्तरमाह-

**लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या जातिः।**

लिङ्गानामिति कर्मणि षष्ठी। सर्वाणि भजते इति सर्वमिति कर्मोपपदे उपपदसमासे[1] च सति भज्-धातोः भजो ण्विः[2] इति सूत्रेण ण्वि-प्रत्यते सर्वभाक् इति रूपं सिध्यति। सकृत्-एकवारम्, आख्यातम्-आख्यानम् उपदेशः इत्यर्थः। निर्ग्राह्या-निश्चेतुं शक्यः। एकवारम् एकस्मिन् पिण्डे अयं गौः इति उपदिष्टे व्यक्त्यन्तरे गौव्यक्तौ उपदेशं विनापि अयं गौः इति निश्चयेन ग्रहणं भवति सा जातिः। असर्वलिङ्गत्वे सति एकस्यां व्यक्तो कथनात् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः इति लक्षणार्थः। अस्य लक्षणस्य स्वीकारे वृषली इत्यत्र ङीष्-प्रत्ययः प्रवर्तते।अत्र वृषलत्वं हि असर्वलिङ्गं नपुसंकलिङ्गाभावात्। एवम् एकस्यां व्यक्तो वृषलत्वे उपदिष्टे सति तदपत्यादिषु तदुपदेशं विना वृषलत्वग्रहणात् वृषलशब्दः जातिवाचकः। अतः प्रकृतसूत्रेण ङीष्-प्रत्यये वृषली इति रूपं भवति। सर्वभाक् इत्यत्र शङ्का जागर्ति सर्वशब्दस्य लिङ्गमिति शब्दान्तरम् आश्रियते अतः लिङ्गशब्दा-पेक्षत्वात् असामर्थ्यात् उपपदसमासाभावे ण्वि-प्रत्ययः न स्यात्। यतः सर्व-इति कर्मण्युपपदे समुदायादेव भजो ण्विः इति सूत्रेण ण्वि-प्रत्ययस्य प्रवृत्तत्वात्। समाधानमत्र भाष्यप्रामाण्यात् अत्र समासः भवति ण्वि-प्रत्ययश्च प्रवर्तते। गमकमस्ति यत् ये नित्यसापेक्षशब्दाः तेषु असामर्थ्येपि समासः भवति इति। यथा वाक्येषु आकाङ्क्षादिवशात् परस्परान्वयमाश्रित्य व्यपेक्षारूपसामर्थ्यमाश्रियते तदेव च सामर्थ्यं वृत्तावपि न त्यज्यते। तद्धि भर्तृहरिणा वाक्यपदीये उक्तम्-

**सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः प्रयुज्यते।**
**वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते॥**[3]

अतः सर्वभाक् इत्यत्र असामर्थ्येपि समासः ण्विप्रत्ययश्च प्रवर्तते। पुनः

---

1. उपपदमतिङ् (अष्टा. 2.2.19) इति सूत्रेण
2. अष्टा. 3.2.62
3. वा. प. वृत्तिस. श्लो.सं. 48

शङ्का जागर्ति तटादिशब्दानां सर्वलिङ्गत्वेन जातित्वानुपपत्तिः तटादिशब्दानाम् असर्वलिङ्गत्वाभावात् इति। समाधानमत्र लिङ्गानां च न सर्वभाक् इति लक्षणेन पूर्वोक्तजातिलक्षणस्य निषेधः न क्रियते। किन्तु पूर्वोक्तजातिलक्षणस्य अप्राप्तिस्थाने इदं वचनम्। पूर्वोक्तजातिलक्षणेन यत्र जातिलक्षणं न संघटितं तत्रानेन जातित्वं विधीयते इत्यर्थः। अतः तटादीनां शब्दानां सर्वलिङ्गत्वेपि पूर्वोक्तलक्षणेन जातित्वं सिध्यत्येव। अस्य लक्षणस्य स्वीकारे देवदत्तादेः असर्वलिङ्गत्वात् जातित्वापत्तिः इति चेत् इदं समाधानमत्र उपदेशसहायप्रत्यक्षेण एकत्र गृहीतवृषलत्वस्य तदपत्यादिरूप-पिण्डान्तरे ग्रहणवत् देवदत्तत्वं पिण्डान्तरे न प्रतीयते। यद्यपि देवदत्तः इति संज्ञा पिण्डान्तरे लभ्येत किन्तु तत्र शब्दसादृश्यमेव नतु अर्थसादृश्यं प्रतीयते। अतः देवदत्तेत्यसर्वलिङ्गत्वेपि न जातिवाचकः। अनेन द्वितीयलक्षणेन जननिमित्तब्राह्मणत्वादि-जातिसङ्ग्रहः। एवं लिङ्गानां च न सर्वभाक् इति लक्षणेन शुक्लादिगुणेषु जातेः व्यावृत्तिः भवति। गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तद्वति इति कोशवचनेन शुक्लादिगुणानां त्रिलिङ्गत्वात् सर्वलिङ्गत्वाभावात् शक्लत्वं हरितत्वं पीतत्वं च न जातिः इत्यर्थः।

एतज्जातिलक्षणद्वस्वीकारात् परमपि औपगवी कठी इत्यादीनां जातित्वं न स्यात् औपगवत्वकठत्वादेः अनुगतसंस्थानव्यङ्ग्यत्वाभावात् सर्वलिङ्गत्वात् सकृदाख्या-निर्ग्राह्यत्वस्याभावात् च। अतः जातेः लक्षणान्तरम् उच्यते –

**गोत्रं च चरणैः सह –**

चरणप्रत्ययान्तैः सह गोत्रमपि जातिकार्यं लभते इत्यर्थः। अत्र गोत्रपदेन सामान्यं लौकिकं वा अपत्यं विवक्षितं वर्तते नतु अपत्यं पौत्रप्रभृतिगोत्रम् इति सूत्रोक्तपारिभाषिकम् अपत्यम्। अत्र प्रमाणमस्ति अनुपसर्जानात् इति सूत्रभाष्यम्।तत्र हि अवन्तेरपत्यं स्त्री इत्यत्र **वृद्धेत्कोसलाजादाञ्ञ्यङ्**[1] इति सूत्रेण ञ्यप्रत्ययः तस्य **स्त्रियामवन्तिकुन्तिकुरुभ्यश्च**[2] इति सूत्रेण लुकि अत्र प्रत्यायार्थं प्रति प्रकृत्योपसर्जनत्वात् इतो मनुष्यजातेः इति सूत्रेण इकारान्तस्योपधान्मनुष्यजाति-वाचिनोनुपसर्जनात् प्रातिपदिकादित्यर्थग्रहणे अवन्तिप्रातिपदिकस्य अत्र उपसर्जनत्वेन इतो मनुष्यजातेः[3] इति सूत्रेण ङीष् न स्यात् इति पूर्वपक्षः। तदा उक्तं सिद्धं तु जातेरनुपसर्जनत्वात् इति। जातिरुपसर्जनं इत्यर्थः। प्रत्यये लुप्ते प्रकृतिरेवापत्यलक्षणां जातिमाह सा चानुपसर्जनम् इत्यर्थः। अवन्तिशब्दस्य अवन्तिशब्दस्य अपत्यप्रत्ययान्तत्वात्

1. अष्टा. 4.1.171
2. अष्टा. 4.1.176
3. अष्टा. 4.1.65

गोत्रं च चरणैः सह इत्यनेन जातित्वम् इति भावः। अनेन अवन्ती इत्यत्र जातिप्रयुक्तः ङीष् इत्यर्थः। अनेन अनुपसर्जनात् इति सूत्रस्थेन भाष्येण गोत्रशब्देन अपत्यं विवक्षितं नतु पारिभाषिकम् इति विज्ञायते।

अत्र नागेशभट्टस्तुलघुशब्देन्दुशेखरे[1] आकृतिग्रहणा जातिः इति एकमेव जातेः लक्षणम् इति प्रतिपादयति। अस्य अभिप्रायः अयं विद्यते–आकृतिग्रहणा जातिः इत्यत्र आकृतिपदेन उपदेश उपलक्ष्यते। तेन आकृत्युपदेशेन साक्षाद्वा उपदेशेन गम्या जातिः इत्येव लक्षणमुभयसाधारणम्। लिङ्गानां च न सर्वभाक् इत्यनेन **विशेषणानां चाजातेः**[2] इति सूत्रस्थमाविष्टलिङ्गत्वं (नियतलिङ्गत्वम्) जातेरुक्तमनूदितम्। उत्तरलक्षणे असर्वलिङ्गमित्यस्य तावन्मात्रफलकत्वात्। सकृत् इत्यनेन अनेकवृत्तित्वं चोक्तम्। उत्तरलक्षणे बह्वर्थामित्यनेन तदेवोक्तम्। तत्र असर्वलिङ्गत्वं प्रायिकम्, भाष्यप्रामाण्याज्जाति–शब्दानां त्रिलिङ्गत्वमप्रामाणिकं वा। अत एव भाष्ये **कः पुनरयोर्जातिलक्षणयोः विशेषः। यथा पूर्वलक्षणम्**[3] इति एकवचनं प्रयुक्तम्। एतेन लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या, गोत्रं च चरणैः सह इति लक्षणद्वयमपि भाष्यकृतां नाभिमतम्। अत एव एतयोर्लक्षणयोर्व्याख्या भाष्यकारेण न कृता।

## अनुशीलितग्रन्थसूची

1. व्याकरणमहाभाष्यम्, संपादकः – श्री गुरुप्रसादशास्त्री, प्रकाशकः – राष्ट्रियसंस्कृत–संस्थानम्, नवदेहली 2006
2. अष्टाध्यायी – संपादकः आचार्य पं. सत्यनारायणशास्त्री खण्डूडी, प्रकाशकः कृष्णदास अकादमी, वाराणसी – 1985
3. वैयाकरणसिद्धान्तकौमुदी – संपादकौ – गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द विद्याभास्करः, प्रकाशकः– मोतिलाल बनारसीदास, पुनर्मुद्रणम् –2011
4. वाक्यपदीयम्, तृतीयकाण्डम्, हेलाराजकृकतप्रकीर्णप्रकाशाख्यव्याख्योपेतम्, के. साम्बशिवशास्त्रिणा संशोधितम्, अनन्तशयनसंस्कृतग्रन्थावलिः, 1935
5. काशिका, न्यासपदमञ्जरीसहिता, संपादकौ–जयशंकरलालत्रिपाठी, सुधाकर मालवीयश्च, तारा प्रिण्टिँग वर्क्स, वारणसी –1986
6. लघुशब्देन्दुशेखरः, अजन्तपुंलिङ्गप्रभृति कारकप्रकरणान्तः द्वितीयो भागः, पेरी वेङ्कटेश्वकशास्त्रिणा विरचितया गुरुप्रसादशेषाभिख्यया व्याख्यया समलङ्कृतः, प्रकाशकः आन्ध्रविश्वकलापरिषद् 1941

---

1. लघु.शे. स्त्रीप्रत्ययप्रकरणम्, पृ.सं 1223 तः1226 यावत्
2. अष्टा. 1.2.52
3. म.भा. 4अ.1पा. 2आ 63सू. पृ. सं. 88

 ISSN : 0975-1769

# शाब्दव्यञ्जनायाम् अभिधानियामकाः संयोगादयः

डॉ. पठान् महम्मद् वलि खान्

**उपोद्घातः**

रमणीयार्थप्रतिपादकः शब्दः काव्यम्। अत्र काव्ये शब्दः - 1. वाचकः, 2. लाक्षणिकः, 3. व्यञ्जकः चेति त्रिधा[1] एवमर्थोऽपि त्रिधा - 1. वाचकशब्देन बोध्यमानः अर्थः "वाच्यः", "वाच्यार्थः" अथवा "मुख्यार्थः", 2. लक्षकशब्देन बोध्यमानः अर्थः "लक्ष्यः" अथवा "लक्ष्यार्थः", 3. व्यञ्जकशब्देन बोध्यमानः अर्थः "व्यङ्ग्यः" अथवा "व्यङ्ग्यार्थः"[2] इति विदितचरमेव समेषामालङ्कारिकविदुषाम्।

**1. वाचकः -**

अथ तत्र वाचकः इत्युक्ते - **साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः।**[3] इति काव्यप्रकाशे मम्मटाचार्यः स्पष्टीकृतवान्।

अर्थात् यः शब्दः साक्षात् सङ्केतितम् अर्थम् अभिधत्ते सः वाचकः इति। उदाहरणार्थं "नीरसतरुरिह विलसति गौः पुरतः।" इत्यत्र तरुशब्दः **"वृक्षः"** इत्यर्थस्य वाचकः भवति। नीरसशब्दः गुणवाचकः। गोशब्दस्तु जातिवाचकः। विलसति इति पदं तु क्रियावाचकं भवति। एवं च सङ्केतितार्थः चतुर्धा भवति यथा - 1. जातिवाचकः, 2. गुणवाचकः, 3. क्रियावाचकः, 4. नामवाचकः चेति। अथवा जातिरेक एव सङ्केतितार्थो भवति। सङ्केतः व्यक्तौ न भवति व्यक्तिसम्बन्धोपाधिषु युज्यते।

**2. वाच्यार्थः अथवा मुख्यार्थः -**

**"स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।"**[4]

---

* अतिथ्यध्यापकः, श्री वेंकटेशवैदिकविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

1. स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा। का.प्र. 2.6
2. वाच्यादयः तदर्थाः स्युः - का.प्र. 2.6
3. का.प्र. 2.7
4. का.प्र. 2.8

सः साक्षात्सङ्केतितः वाच्यार्थः एव मुख्यार्थः इति, मुख्यार्थं बोधयितुम् उपयुक्तस्य शब्दव्यापारस्य अभिधा इति च नाम। अयम् अभिधाव्यापारः इतरव्यापारापेक्षया मुख्यः भवति। अभिधार्थ-लक्ष्यार्थ-व्यङ्ग्यर्थैस्सह तात्पर्यार्थो वर्तते इति केचन अभिप्रयन्ति।

**अभिधामूलाव्यञ्जनास्वरूपम्-**

आचार्यो मम्मटः लक्षणामूलां व्यञ्जनां निरूप्य, अभिधामूलां व्यञ्जनां प्रतिपादयति-

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**
**संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्।।**[1] **इति।**

मम्मटाचार्यः काव्यप्रकाशे लक्षणामूलव्यञ्जकत्वस्य कथनानन्तरमिमाम् अभिधामूलक-व्यञ्जनां कारिकारूपेण प्रकटितवान्।

**अनेकार्थस्य** = नाना अर्थयुक्तस्य

**शब्दस्य** = प्रातिपदिकस्य

**वाचकत्वे** = (अभिधाव्यापारेण) वाच्यार्थाभिज्ञापने

**संयोगाद्यैः** = संयोगादि चतुर्दशभिः

**नियन्त्रिते** = नियन्त्रिते सति

**अवाच्यार्थधीकृत्**= अवाच्यस्य अर्थस्य ज्ञानं प्रतिपादयितुं (व्यङ्ग्यार्थं द्योतयितुं)

**व्यापृतिः** = (आवश्यकः) व्यापारः

**अञ्जनम्** = व्याञ्जना - इति कारिकायाः प्रतिपदानामर्थः।

**अस्याः कारिकायाः अयं भावः -**

कदाचित् एकस्य शब्दस्य एकार्थापेक्षया अनेके अर्थाः भवेयुः। तर्हि तादृशे शब्दे एकस्मिन् वाक्ये प्रयुक्ते सति तस्य शब्दस्य सर्वे च अर्थाः श्रोतुः कृते न उपस्थिताः भवन्ति। यतो हि वाक्यपदीये भर्तृहरिकथितरीत्या संयोगादयः तद्वाक्यस्थशब्दस्य सन्दर्भोचितमर्थं मात्रं बोधयितुम् उपकृताः भवन्ति। अतः वाक्यस्थस्य तादृशस्य शब्दस्य सः एकः अर्थः एव वाच्यार्थः भवितुमर्हति। तदर्थबोधनानन्तरम् अन्यः

1. का.प्र. 2.19

अर्थः गोचरितो भवतु नाम। स च द्वितीयोऽर्थः व्यञ्जनाव्यापारेणैव गोचरितो भवति। न तु अभिधा व्यापारेण। अभिधाव्यापारः प्रथमम् अर्थं बोधयितुं संयोगादिभिः नियमितत्वात्, तदर्थबोधनात् परम् उपरतो भवति। द्वितीयमर्थं बोधयितुं पुनः व्यापारान्तरम् आवश्यकं भवति। स च व्यापारः व्यञ्जनाव्यापारः – इति। अतः इदं ज्ञायते यत् मुख्यार्थबोधनाय अभिधाव्यापारः एव प्रवर्तते – इति।

**शाब्दव्यञ्जनायाम् अभिधानियामकाः संयोगादयः अथवा विशेषस्मृतिहेतवः-**

> **"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
> **अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥**
>
> **सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
> **शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥"**[1]

इति मम्मटः भर्तृहरिकारिके उद्धरति।

एकस्मिन् वाक्ये, अनेकार्थबोधके शब्दे सति तस्य शब्दस्य कः अर्थः ग्रहीतव्यः? इत्यत्र अर्थविशेषं स्मारयितुं केचन हेतवः भवन्ति। ते यथा – **संयोगः, विप्रयोगः, साहचर्यम्, विरोधः, प्रयोजनम् (अर्थः), प्रकरणम्, लिङ्गम्, अन्यस्य शब्दस्य सन्निधिः, सामर्थ्यम्, औचित्यम्, देशः, कालः, व्यक्तिः, स्वरादयः** – इति। एते संयोगादयः अनेकार्थस्य शब्दस्य उचितार्थनिर्णयाय नियामकाः भवन्ति। एतान् चतुर्दश नियामकान् अनुसृत्य एव अर्थविशेषो स्मर्यते। तत्र आवश्यकः अर्थः ग्रहीतव्यो भवति मुख्येन अभिधाव्यापारेण।

एतेषां क्रमेणोदाहरणानि यथा –

**1. संयोगः –**

द्वयोः वस्त्वोः मध्ये उत द्वयोः व्यक्त्योः मध्ये अथवा वस्तु–व्यक्त्योः मध्ये लोकप्रसिद्धः सम्बन्धः संयोगः इत्युच्यते। अस्योदाहरणम् – **"सशङ्खचक्रो हरिः"** इति। शङ्खचक्राभ्यां सहितः हरिः इत्यर्थः। हरिशब्दस्य यमः, वायुः, इन्द्रः, चन्द्रः, सूर्यः विष्णुः, सिंहः, किरणम्, अश्वः, शुकः, सर्पः, वानरः, मण्डूकः इत्यादयः अनेके अर्थाः मुख्येन अभिधाव्यापारेण बोध्यन्ते। किन्तु शङ्खचक्रयोः संयोगः हरेः (विष्णोः) एव प्रसिद्धः। अतोऽयं संयोगः इति विशेषस्मृतिहेतुः हरिशब्दं विष्णुरूपार्थे एव अभिधाव्यापारेण नियमयति। तस्मात् अस्मिन् वाक्ये विष्णुरूपार्थः एव ग्रहीतव्यः। अयमेकः एव अस्य हरिशब्दस्य वाच्यार्थः भवति। अन्योदारणेष्वपि एवमेवावगन्तव्यम्।

1. का.प्र. 2.19 भर्तृहरेः उद्धृते कारिके।

**2. विप्रयोगः -**

ऐक्यं प्रसिद्धे सति तयोः वियोगकथनं (योगे सति अयोगकथनम्) विप्रयोगः इत्युच्यते। उदाहरणार्थम् - **"अशङ्खचक्रो हरिः"** इत्यत्र शङ्खचक्रयोः हरेश्च नित्यसंयोगः प्रसिद्धे सति हरेः शङ्खचक्रयोः वियोगः उक्तः। अतः अयं विप्रयोगः इति विशेषस्मृतिहेतुः विष्णुः इत्यस्मिन्नर्थे एव हरिशब्दं अभिधाव्यापारेण नियमयति।

**3. साहचर्यम् -**

मिलित्वा भ्रमणम् अथवा सह स्थितेः भावः साहचर्यं रामशब्दस्य दशरथरामः, परशुरामः, बलरामः इति त्रयोऽर्थाः सन्ति। किन्तु **"रामलक्ष्मणौ"** इति प्रयोगे लक्ष्मणसाहचार्यं दशरथरामाय एव वर्तते। अतः इदं नियामकसाहचर्यं रामलक्ष्मणौ इत्यत्र रामशब्दं दशरथरामे अभिधाव्यापारेण नियमयति।

**4. विरोधिता -**

प्रसिद्धविरोधस्य भावः विरोधिता। रामः नाम कोऽपि रामः भवितुमर्हति। एवम् अर्जुनशब्दस्य कार्तवीर्यार्जुनो वा पाण्डवार्जुनो वा भवितुमर्हति। **"रामार्जुन-गतिस्तयोः"** (तयोः पद्धतिः रामार्जुनयोः पद्धतिरिव वर्तते।) इत्यक्तौ परशुराम-कार्तवीर्यार्जुनयोः विरोधः प्रसिद्धत्वात्, तस्मात् रामशब्दस्य परशुरामः इत्यस्मिन्नर्थे, अर्जनशब्दस्य कार्तवीर्यार्जुनार्थे च नियन्त्रयति इयं "विरोधिता" नामिका विशेषस्मृतिहेतुः।

**5. अर्थः -**

अर्थो नाम प्रयोजनम्। उदाहरणार्थम् - **"स्थाणुं भज भवच्छिदे"** (संसारबन्धच्छेदनार्थं स्थाणुं सेवय।) इत्यत्र स्थाणुशब्दस्य नष्टशाखावृक्षमूलभागः, शिवः, प्रस्तरः इत्यर्थाः सन्ति। किन्तु संसारबन्धच्छेदनम् इत्येतत् प्रयोजनं शिवः एव साधयति इत्यतः अत्र स्थाणुशब्दस्य शिवरूपार्थे नियमनम् अर्थः इत्याख्यनियामकहेतुना सम्भवति।

**6. प्रकरणम् -**

प्रकरणं नाम सन्दर्भः। उदा - **"सर्वं जानाति देवः"** (देवः एव सर्वं जानाति) इत्यत्र देव शब्दस्य देवता, राजा इत्येतादृशाः अर्थाः सन्ति। कश्चन राज्ञा सह सम्भाषणसन्दर्भे उक्तवाक्यस्थस्य अस्य देवशब्दस्य प्रभवः, तत्रभवन्तः इत्येतादृशः अर्थः ग्रहीतव्यः प्रकरणवशात्। अतः प्रकरणम् इति विशेषस्मृतिहेतुना अत्र अर्थनियमनं भवति।

**7. लिङ्गम् -**

एकस्मिन् वस्तुनि अथवा व्यक्तौ वा संयोगसम्बन्धात् भिन्नसम्बन्धेन संस्थितः धर्मः लिङ्गम् इत्युच्यते। इदम् अन्यवस्तुभ्यः पृथक्करोति। अर्थात् व्यावर्तयति। उदा - **"कुपितो मकरध्वजः"** (मकरध्वजः कुपितवान्) इत्यत्र मकरध्वजशब्दस्य मकरचिह्नः ध्वजः यस्य सः - मन्मथः इति, मकराः एव ध्वजाः यस्मन् सः समुद्रः इति द्वौ अर्थौ स्तः। तदा कोप इति धर्मः मन्मथे एव संस्थितो भवति इत्यतः इदं कोपरूपं लिङ्गं इति विशेषस्मृतिहेतुः मकरध्वजशब्दं मन्मथार्थे नियन्त्रयति।

**8. अन्यशब्दसन्निधिः -**

एकस्य शब्दस्य पार्श्वे अन्यशब्दस्य संस्थानम् - अन्यशब्दसन्निधिः इत्युच्यते। उदा - **"देवस्य पुरारातेः"** (पुरारातिश्चासौ देवः च) इत्यत्र देवशब्दस्य देवः, राजा इत्याद्यर्थाः सन्त्यपि पुरारातिशब्दसन्निधानात् अस्य देवशब्दस्य शिवः इत्यर्थः ग्रहीतव्यो भवति।

**9. सामर्थ्यम् -**

एकस्य कार्यस्य समुत्पादकशक्तेर्भावः सामर्थ्यम्। उदा - **"मधुना मत्तः कोकिलः"** (कोकिलः मधुना मत्तः) इत्यत्र मधुशब्दस्य मधु, वसन्तर्तुः इत्याद्यर्थाः सन्ति। किन्तु कोकिलाय मादोत्पादकसामर्थ्यं वसन्ततीरेव वर्तते इत्यतः मधुशब्दस्य वसन्तर्तुः इत्यर्थः सामार्थ्यम् इति विशेषस्मृतिहेतुना स्वीकर्तव्यो भवति।

**10. औचिती -**

औचिती नाम योग्यत्वम्। समुचितत्वम् इति च। तद्यथा - **"पातु वो दयितामुखम्"** [युष्मान् दयितायाः मुखं पातु= रक्षतु (सम्मुखो भवतु)] इत्यत्र मुखशब्दस्य प्रस्थानम्, मुखम्, प्रारम्भः, उपायः इत्याद्यर्थाः सन्ति। अथाप्यत्र रक्षणम् इत्यस्य नायकाय आनन्दप्रदानं प्रारम्भ-उपायशब्दयोः न सिद्ध्यति। मुखविषये पालनम् अर्थात् रक्षणम् इत्यथी नोपपद्यते इत्यतः पातु इत्यस्य औचित्यात् सुमुखो भवतु इत्यर्थः। अतः मुखशब्दस्य साम्मुख्यम् इत्यर्थः औचिती इति विशेषस्मृतिहेतुना स्वीकर्तव्यो भवति।

**11. देशः -**

देशो नाम प्राकृतिकः प्रदेशः इति। **"भात्यत्र परमेश्वरः"** इत्यस्मिन् उदाहरणे 'अत्र' इत्यस्य अस्मिन् राजधानीनगरे इत्यर्थः। परमेश्वरः, भाति नाम विराजते -

इति। एवञ्चात्र परमेश्वरशब्दस्य शिवः, विष्णुः इत्याद्यर्थाः बहवस्सन्ति। किन्त्वत्र राजधानीं निर्दिशन् – अत्र परमेश्वरो भाति इत्युक्तत्वात् राजधानीरूपदेशविशेषमहिम्ना परमेश्वरशब्दस्य राजा इत्यर्थः वक्तव्यः। अतः अत्रशब्दस्य राजधानी इत्यर्थः देशः इति विशेषस्मृतिहेतुना स्वीकर्तव्यो भवति।

**12. कालः –**

उदा – **"चित्रभानुः विभाति"** (चित्रभानुः प्रकाशयति।) इत्यत्र चित्रभानु-शब्दस्य सूर्यः, अग्निः इति द्वौ अर्थौ स्तः। यदि **"चित्रभानुः विभाति"** इति वाक्यम् अहनि प्रयुक्तं तर्हि चित्रभानुशब्दस्य कालः इति अभिधानियामकेन "सूर्यः" इति, रात्रौ प्रयुक्तं चेत् "अग्निः" इत्यर्थः ग्रहीतव्यो भवति।

**13. व्यक्तिः –**

व्यक्तिः नाम शब्दसम्बन्धपुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गाः ग्रहीतव्याः। मित्रशब्दः नपुंसकलिङ्गे यदि भवति तर्हि सखा अथवा सखी इत्यर्थः। यदि पुंलिङ्गे प्रयुक्तः तर्हि सूर्यः इत्यर्थः। अतः **"मित्रं भाति"** इति नपुंसकलिङ्गप्रयोगस्य "सखा प्रकाशयति" इत्यर्थ, "मित्रः भाति" इति पुंलिङ्गप्रयोगस्य "सूर्यः प्रकाशयति" इत्यर्थं च व्यक्तिः इति विशेषस्मृतिहेतुः अभिधाव्यापारेण बोधयति।

एवञ्च **"सशङ्खचक्रो हरिः"**, **"अशङ्खचक्रो हरिः"** इत्यत्र हरिशब्दस्य अच्युते, **"रामलक्ष्मणौ"** इत्यत्र रामशब्दस्य दशरथपुत्रे रामे, **"तयोः रामार्जुनगतिः"** इत्यत्र रामार्जुनशब्दयोः परशुराम-कार्तवीर्यार्जुनयोः, **"स्थाणुं भज भवच्छिदे"** इत्यत्र स्थाणुशब्दस्य ईश्वरे, **"सर्वं जानाति देवः"** इत्यत्र राजनि भवति, **"कुपितः मकरध्वजः"** इत्यत्र मकरध्वजशब्दस्य मन्मथे, **"देवस्य पुरारातेः"** इत्यत्र पुरारातिशब्दस्य शिवे, **"मधुना मत्तः कोकिलः"** इत्यत्र मधुशब्दस्य वसन्तर्तौ, **"पातु वो दयिता मुखम्"** इत्यत्र मुखशब्दस्य साम्मुख्ये, **"भात्यत्र परमेश्वरः"** इत्यत्र परमेश्वरशब्दस्य राजनि, **"चित्रभानुर्विभाति"** इत्यत्र चित्रभानुशब्दस्य दिने रवौ, रात्रौ वह्नौ, **"मित्रं भाति"** इत्यत्र मित्रशब्दस्य सुहृदि, **"मित्रो भाति"** इत्यत्र मित्रशब्दस्य रवौ च संयोगादिभ्यः विशेषस्मृतिहेतुनियामकेभ्यः अभिधाव्यापारः अर्थं नियमयति।

**14. स्वरः –**

वेदे उदात्तः अनुदात्तः स्वरितः इति त्रयः स्वराः सन्ति। एवं स्वरनियमं पालयन् वेदाध्ययनं करणीयम्। यदि स्वरः परिवर्तितो भवति तर्ह्यर्थोऽपि परिवर्तते।

उदा – **"इन्द्रशत्रुः"** इतीदं पदं षष्ठीतत्पुरुषसमासतया, एवं बहुव्रीहिसमासतया वा वक्तुं शक्यते। शत्रुः नाम संहारकः इत्यर्थः। बहुव्रीहिसमासे इन्द्रः शत्रुः यस्य सः इति विग्रहः। इन्द्रः यस्य संहारकः सः नाम इन्द्रेण हन्यमानः इत्यर्थः। बहुव्रीहिसमासे प्रथमपदम् उदात्तम्, एवं द्वितीयपदं च अनुदात्तं भवति।

किन्तु षष्ठीतत्पुरुषसमासे "इन्द्रस्य शत्रुः" इति विग्रहवाक्यस्य इन्द्रस्य संहारकः इत्यर्थः। उद्दिष्टार्थः सम्पूर्णतया विनष्टः अर्थान्तरो नाम विपरीतार्थः आगतः। अत्र समासे द्वितीयपदम् उदात्तं भवति। इत्थं स्वरभेदमनुसृत्य अर्थपरिणामः वेदेऽस्ति काव्ये नास्ति। अतः वेदे एव विशेषार्थप्रतीतिः भवति।

**15. अभिनयः –**

**एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्।**
**एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः।।**

उपर्युक्तभर्तृहरिकारिकायां "स्वरादयः" इत्यत्र आदिपदप्रयोगात् अभिनयः इत्यादीनि स्वीकरणीयानि। उदा – एका दूती नायकं प्रति नायिकायाः विरहावस्थाम् "एतावन्मात्रस्तनिका, एतावन्मात्राभ्याम् अक्षिपत्राभ्याम् सहिता एषा एतावन्मात्रदिवसेषु एतावन्मात्रावस्थां प्राप्ता" इति साभिनयं वर्णितवान्। एतावत् इति स्तनादीनां परिमाणं दर्शयती संवदति। अतः अत्र एतावत् शब्दस्य अर्थः अभिनयेन ज्ञायते। अतः अभिनयः अपि अभिधायाः अर्थनियामकेषु अन्यतमहेतुः भवति।

**16. अपदेशः –**

आदिपदेन अपदेशोऽन्तर्भवति। वक्षस्थले हस्तं निक्षिप्य प्रदर्शनेन आत्मनः मनोगताभिप्रायसूचनम् अपदेशः इति। कुमारसम्भवस्य द्वितीयसर्गे इन्द्रादिदेवान् उद्दिश्य चुतुर्मुखब्रह्मा वदति। तद्यथा –

**इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।**
**विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।।** इति।

ब्रह्मणः उक्तवचनेषु – **इतः** इति पदोच्चारणं स्ववक्षस्थले हस्तं संस्थाप्य करोति इत्यतः **इतः** शब्दस्य **मत्तः** इत्यर्थ आगच्छति। मत्तः प्राप्तैश्वर्यं तं तारकासुरम् मयैव छेदनं नोचितं कर्म। स्वयं संवर्धितविषवृक्षस्य छेदनं यथा नोचितं तथा इदं कर्मापि न मया कर्तुं युज्यते। इत्यर्थः।

इत्थं संयोगादिभिः अनेकार्थस्य शब्दस्य संस्थितान् अनेकार्थान् बोधने शक्तिं निवारितोऽपि एकस्मिन्नर्थे नियमने कृतेऽपि कुत्रचित् अर्थान्तरप्रतीतिः भवति। यतो

हि अभिधाव्यापारः संयोगादिविशेषस्मृतिहेतूनां सहकारेण अनेकार्थस्य शब्दस्य एकमर्थं बोधयितुमेव नियमितोऽभवत्। एकमर्थं बोधयित्वा, विरमितोऽभूत्। पुनः अभिधाव्यापारस्य प्रवृत्तिः न भवति। तथैव लक्षणाव्यापारोऽपि न प्रवर्तते। यतो हि तेषु काव्यस्थलेषु मुख्यार्थबाधाद्यभावात्। अपि तु तत्र द्वितीयार्थबोधको व्यापारः अञ्जनमेव अर्थात् व्यञ्जनमेव – इति। तद्यथा –

**भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य।**
**यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्॥**[1]

अत्र राजवर्णनं प्रकृतकथा। प्रकृतस्य राजवर्णनस्य श्रवणात् परम्, अत्र प्रयुक्तशब्दाः नानार्थबोधका इति हेतोः राजरूपार्थेन सह गजरूपार्थोऽपि बुद्धिगोचरितो भवति।

**1. राजवृत्तान्तपक्षे तावत्–**

**भद्रात्मनः** = शोभनरूपवतः अथवा तदन्तःकरणवतः, **दुरधिरोहतनोः** = आक्रमयितुम् अशक्यदेहवतः, **विशालवंशोन्नतेः** = महतः वंशोन्नतिमतः, **कृतशिलीमुखसंग्रहस्य** = समीकृतबाणाद्यायुधसम्पत्तिवतः (बाणप्रयोगनिपुणस्य), **अनुपप्लुतगतेः** = अमार्जितमर्यादवतः, परवारणस्य = शत्रुनिवारकस्य च **यस्य** = यस्य राज्ञः, **करः** = हस्तः, **सततम्** = सदा, **दानाम्बुसेकसुभगः** = दानोदकेन सिञ्चितत्वात् सुन्दरः, **अभूत्** = अभवत् – इति,

**2. गजवृत्तान्तपक्षे च–**

**भद्रात्मनः** = गजजातिषु अन्यतमजातिसम्बद्धस्य, **दुरधिरोहतनोः** = अधिरोढुम् अशक्यदेहस्य, **विशालवंशोन्नतेः** = विशालपृष्ठास्थि–औन्नत्यस्य, **कृतशिलीमुखसंग्रहस्य** = कृतभ्रमराणां संग्रहणवतः, **अनुपप्लुतगतेः** = प्रशान्तगमनवतः, **यस्य** = यस्य, परवारणस्य = गजश्रेष्ठस्य, **करः** = शुण्डादण्डः, **सततम्** = सदा, नित्यम्, **दानाम्बुसेकसुभगः** = दानोदकेन सिञ्चितत्वात् सुन्दरः, **अभूत्** = अभवत् – इति।

अत्र श्लोके वाच्यार्थः राजवृन्तान्तः। सः प्रकृतार्थः राजवृत्तान्तः अनेकार्थानां भद्रात्मनः इत्यादिशब्दानाम् अभिधाव्यापारः राजरूपार्थं बोधयितुं नियन्त्रितोऽपि सहृदयानां मनसि तेषां प्रतिभासामर्थ्यवशात् द्वितीयोऽर्थोऽपि स्फुरति। द्वितीयार्थः गजवृत्तान्तः व्याञ्जनाव्यापरेणैव गम्यः भवति। अतः गजवृत्तान्तः व्यङ्ग्यार्थः भवति। अत्र

1. का.प्र. 2.12

श्लोके वाच्यस्य राज्ञः, व्यङ्ग्यस्य गजस्य च उपमानोपमेयभावः (अयं राजा गजसदृशः।) व्यञ्जनया गम्यते।

सहृदयस्य द्वितीयार्थस्फूर्तिः भवतु इति धियैव कविः काव्यं द्व्यर्थयुक्तपदानि चित्वा निबद्धवान्। अथापि इदं कवेः तात्पर्यम् इति ग्रहीतुं यस्य कस्यापि प्रमाणस्याभावात् द्वितीयार्थस्फूर्तिः व्यञ्जनाव्यापारेणैव सिद्ध्यति इत्यङ्गीकर्तव्यमेव।

किन्तु अत्र श्लोके द्वितीयार्थोऽपि अभिधाव्यापारेणैव बोध्यते, राज-गजयोः उपमेयोपमानभावः एव व्यञ्जनागम्यः इति पण्डितराजः जगन्नाथः सयुक्तिकं प्रत्यपादयत्। उपमानोपमेयभावः व्यङ्ग्यः इति कथने तस्य नास्ति विप्रतिपत्तिः। अतिविस्तृतमेषा चर्चा तत्रैवावलोकयितव्या जिज्ञासुभिः।

अतः **तद्युक्तः** = व्यञ्जनाव्यापारेण युक्तः, **शब्दः** = शब्दः, **व्यञ्जकः** = व्यञ्जको भवति इति कथनं युक्तियुक्तम्[1]।

**यत्** = यस्मात् कारणात्, **सः** = सः शब्दः, **अर्थान्तरयुक्** = **प्रकृतः आत्मनः शक्यार्थस्य व्यवधानेन युतः, तथा** = **व्यञ्जकरूपेण स्थितः, तस्मात् कारणात् तत्र** = काव्ये, **सहकारितया** = सहकारिकारणतया स्थितत्वात् **अर्थोऽपि** = अर्थः अपि, **व्यञ्जकः** = व्यञ्जकः इति, **मतः** = अङ्गीकृतः।।

एकः शब्दः प्रथमं स्वशक्यार्थं बोधयित्वा, ततः परं व्यङ्ग्यार्थमपि बोधयति। अतः शब्दस्य व्यङ्ग्यार्थस्य च मध्ये वाच्यार्थो भवति। व्यङ्ग्यार्थस्य ज्ञानात् पूर्वं वाच्यार्थस्य ज्ञानबोधः अवश्यं भवेत्। अतः व्यङ्ग्यार्थज्ञानाय वाच्यार्थज्ञानं सहकारिकारणं भवति। प्रधानकारणं शब्द एव।

इत्थं शब्दस्य व्यङ्ग्यार्थस्य च मध्ये स्थित्वा, व्यङ्ग्यार्थस्य सहकारिकारणं सत् वाच्यार्थोऽपि व्यञ्जक एव इति भावः। **"भद्रात्मनः"** इत्यादिश्लोकस्थपदानि परिवर्त्य, तत्तत्पर्यायपदानि यदि उपयुञ्ज्महे तर्हि द्वितीयोऽर्थः व्यङ्ग्यार्थो न भवति। परिवर्तनं यदि अशक्यं भवति तर्हि परिवृत्त्यसहिष्णुत्वम् (परिवृत्त्यसहत्वम्) इति तस्य नाम। यदि श्लोके शब्दाः परिवृत्त्यसहिताः तर्हि तस्य ध्वनेः व्यङ्ग्यार्थस्य "शब्दमूलकध्वनिः" इति व्यवहारो भवति।।[2]

---

1. तद्युक्तो व्यञ्जकः शब्दः। का.प्र.2.20
2. का.प्र. बाला. पृ. 98-107

## संकेताक्षरसूची

**का.प्र.** = काव्यप्रकाशः।

**का.प्र.बाला.** = काव्यप्रकाशबालानन्दिनी-आन्ध्रव्याख्यानम्।

## आधारग्रन्थसूची

1. **काव्यप्रकाशः** - अलङ्कारसन्दर्भः, मम्मटभट्टविरचितः - झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यटीकया समन्वितः, बनहट्टीत्युपाह्वयेन दशरथात्मजेन नारायणेन संशोधितः। पुनर्मुद्रितसंस्करणम् - 2008, ISBN- 978-81-7110-322-5, मूल्यम् - 500, परिमल पब्लिकेशन्स, शक्तिनगर, दिल्ली - 110093

2. **काव्यप्रकाशः** - "बालानन्दिनी" व्याख्यानसहितः, आन्ध्रव्याख्याता - म.म. आचार्य पुल्लेल श्रीरामचन्द्रुडु, प्रकाशकः - संस्कृतभाषाप्रचारसमितिः, हैदराबाद् - 500001, तेलङ्गाणा। प्रथममुद्रणम् - 1995, Phone: 040-24615481

3. **काव्यप्रकाशः** - मम्मटभट्टविरचितः नागेश्वरीटीकासहितः, चौखम्बासंस्कृत-ग्रन्थमाला, वाराणसी।

✦✦✦

 ISSN : 0975-1769

# व्याकरणदर्शनाभिमतप्रमाणसामान्यलक्षणविमर्शः

**बद्रीनारायणगौतमः ***

वैयाकरणानां मते प्रमाणसामान्यलक्षणं किमस्तीति जिज्ञासायामुच्यते भाष्यकारेण प्रस्तुतं प्रमाणसामान्यलक्षणम्। तच्च यथाभाष्यम् "मानं हि नाम तद्येनानिर्ज्ञातमर्थं ज्ञास्यामि, उप समीपे यन्नात्यन्ताय मिमीते तदुपमानम्"[1] इति। भाष्यमिदं व्याख्यापयता प्रदीपकारेण च "मानं हीति यथा प्रस्थादि। तेन हि साकल्येन येयं परिच्छिद्यते"[2] इति। उद्योते च अयं प्रसंगः "भाष्ये मानं हीति अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकत्वं तत्वम्। यथा प्रस्थादि अज्ञातस्य परिमाणरूपार्थस्य साकल्येन ज्ञापकम्, न तदोपमानम्"[3] इत्थं व्याख्यात इति महाभाष्यप्रदीपोद्योतानां मतं प्रमाणसामान्यलक्षणं हि अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकं प्रमाणमिति भवति।

साकल्येनोक्तौ सामान्यरूपेण विशेषरूपेण चेप्सितमयं घटः, इदन्त्वं साधारणधर्मः, घटत्वं विशेषधर्मः। केवलं घट इति ज्ञाने घटत्वं सामान्यधर्म आकारविशेषश्च विशेषधर्मः। पर्वतो वह्निमान् इत्यत्रानुमानस्थले वह्नित्वं सामान्यधर्मः पर्वतीयत्वं विशेषधर्मः। एवं शब्दप्रमायां पदात् पदार्थस्य सामान्येन पदार्थान्तरसम्बन्धात् विशेषरूपेणेति साकल्योपपादनं भवति। उपमानस्य तु सामान्यरूपेण भानमिति साकल्यत्वस्याभावात्तस्य प्रामाण्यं न स्वीक्रियते वैयाकरणैः। एवमेव साकल्येनेत्युक्तौ प्रमाया अबाधितार्थविषयकत्वमपि गम्यते। बाधितार्थविषयकं ज्ञानं तु अनिर्ज्ञातार्थं साकल्येन न परिच्छिनत्ति सामान्यधर्मविषयकत्वात्। विशेषधर्माविषयकत्वादेव संशयविपर्ययोः प्रमाणलक्षणकोटौ नावसरः। शुक्तौ इदं रजतमित्यत्र चाकचिक्यादिना इदन्त्वांशस्य सामान्यधर्मस्य भानेऽपि विशेषधर्मस्याभावो भवति।

"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"[4] इत्युक्तवता भाष्यकारेण द्रव्यरूपेऽर्थे प्रमाविषये तदवयवजातिगुणक्रियादीनां गुणक्रियाद्यर्थे

---

* सहायकाचार्यः, बैजनाथपाण्डेय-आर्यसंस्कृतमहाविद्यालयः, सिवान

1. महाभाष्यम् 2.3.55
2. प्रदीपः, महाभाष्यम् 2.3.55
3. उद्योतः, महाभाष्यम् 2.3.55
4. महाभाष्यम्, पश्पशाह्निकम्

तथाभूते तु तद्गतजातिलिङ्गसंख्यादीनां साकल्यं बोध्यमिति प्रदर्शितत्वात् साकल्येन अनिर्ज्ञातार्थस्य ज्ञापकमेव भाष्यसम्मतं प्रमाणलक्षणमिति ज्ञातुं शक्यते। तत्र नागेशेनोक्तमस्ति यत् "अत्र विषाणान्तैरवयवैर्गुणादयोऽप्युपलक्ष्यन्ते इत्येतत् कथनेन अत्रान्या शङ्कोदेति शब्दप्रमायां तथा साकल्यस्योपपादनेऽपि प्रत्यक्षादिप्रमायां कथं तस्य उपपत्तिः स्यादिति तदपि अथ गौरित्यत्र कः शब्दः? इति प्रश्नभाष्यं व्याख्यापयद्भिः सूच्यते यथा प्रदीपः गौरिति विज्ञाने प्रतिभासमानेषु वस्तुषु कः शब्दः इत्यर्थः"[1]। नागेशेनायं प्रसङ्गः उद्योते इत्थं व्याख्यातो यथा "अत्र गौरिति विज्ञाने इति सामान्योक्त्या तदाकारप्रत्यक्षादिविज्ञाने अपि गुणादीनां सामान्यरूपेण भानम्, अत एव प्रत्यक्षदृष्टेऽपि आम्रफलादौ रसविशेषजिज्ञासा, विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वादित्यन्ये"[2]। इत्थञ्च व्याकरणदर्शने प्रत्यक्षादिसर्वप्रमासु प्रमेयावयवजातिगुणक्रियादीनां शब्दरूपस्य च भानमिति दर्शनान्तराद्विशेषः अनिर्ज्ञातार्थस्य साकल्येन ज्ञानमित्यस्य व्याख्यानं श्रीरामप्रसादत्रिपाठीमहोदयेनेत्थं विहितं यथा "साकल्येनेत्यत्र स्वार्थे ष्यञ्प्रत्ययः, तृतीयार्थः प्रकारत्वम्, अनिर्ज्ञातार्थस्येत्यत्र षष्ठ्यर्थो विशेष्यत्वमिति। अनिर्ज्ञातार्थविशेष्यकं सामान्यविशेषधर्मादिरूपसम्भावितसकलधर्मप्रकारकं ज्ञानं प्रमा, तत्करणं प्रमाणमिति प्रमाणसामान्यलक्षणं पर्यवसन्नम्"[3]।

"लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" इत्युक्तवता वार्तिककृता अपि प्रमाणसामान्यलक्षणं स्वीकृतमिति ज्ञातुं शक्यते। तत्र हि लोकतोऽनिर्ज्ञातस्य धर्मस्य साकल्येन निश्चायनेन तत्र शास्त्रे प्रामाण्यमवतिष्ठते इति वार्तिककृत्सम्मतिरत्र। साधुशब्दप्रयोगे धर्मो भवतीति लोकतोऽवगन्तुं न शक्यते तत्प्रमायान्त्विदमेव शास्त्रं करणम्। एवञ्च "लुपि युक्तवद् व्यक्तिवचने"[4] इति सूत्रं प्रत्याख्यापयता सूत्रकारेण "तदशिष्यं संज्ञाप्रमाणत्वात्"[5] इति सूत्रं विधाय अन्यप्रमाणसिद्धस्य शासनायोग्यत्वं प्रतिपादितमिति अनिर्ज्ञातार्थस्यैव ज्ञापकं प्रमाणं भवतीति ज्ञायते। एवमेव "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्राधानम्" इत्यत्र प्रतिक्षिपता सूत्रकारेण "प्रधान-प्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्"[6] इति सूत्रमुपन्यस्तम्। तत्र आपो दारा इत्यादिवदङ्गाः वङ्गाः इत्यादावपि बहुवचनान्तानामेव लिङ्गसंख्याविषयकप्रमाकरणत्वेन लोके प्रसिद्धतया तत्प्रमितये लुपि युक्तवदिति वचनं प्रमाणतया न कार्यम्, अनिर्ज्ञातार्थस्याबोधकत्वात् इति सूत्रकारस्याशयः।

1. प्रदीपः, महाभाष्यम्, पश्पशाह्निकम्
2. उद्योतः, महाभाष्यम्, पश्पशाह्निकम्
3. पाणिनीयव्याकरणेप्रमाणसमीक्षा पृ.सं.3-4
4. पा.सू. 1.2.51
5. पा.सू. 1.2.53
6. पा.सू. 1.2.26

शाब्दिकनये प्रमागतश्च प्रकर्षः करणगतं प्रकर्षं हेतूकृत्य "प्रमत्तगीत एव तत्र भवतः। यस्त्वप्रमत्तगीतस्तत्प्रमाणम्"[1]। विषयगतं प्रकर्षं हेतूकृत्य "अन्त्यमानं हि नाम तद् येनानिर्ज्ञातमर्थं ज्ञास्यामि, उप समीपे यन्नात्यन्ताय मिमीते तदुपमानम्"[2]। अत्यन्ताय कथनेन (साकल्येन) सूचितः। अनिर्ज्ञातकथनेन च स्मृतिभिन्नत्वम्, अबाधितार्थकथनेन च सहजमपि प्रकर्षं सूचयति।

आचार्येण श्रीरामप्रसादत्रिपाठिमहोदयेन पाणिनीयव्याकरणे प्रमाणसमीक्षा इत्याख्यस्य ग्रन्थस्य प्रस्तावनायां प्रमाणसामान्यस्यास्य लक्षणस्य स्वरूपमित्थं प्रस्तुतम्। "अनिर्ज्ञातार्थविषयकं सम्भावितसकलधर्मप्रकारकं ज्ञानं प्रमा, तत्करणं प्रमाणम्"[3] इति। अस्मिन् प्रमाणसामान्यलक्षणे आचार्यस्य भर्तृहरेः अपि सम्मतिर्दृश्यते। यथा हि वाक्यपदीयस्य वृत्तिसमुद्देशे आचार्यः -

**"अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मात्रमुच्यते।**
**प्रस्थादिकेन मेयात्मा साकल्येनाभिधीयते॥**

**अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते।**
**साकल्येनापरिज्ञानादुपमानं तदुच्यते॥[4]"**

आचार्यस्य भर्तृहरेरिमौ श्लोकौ "उपमानानि सामान्यवचनैः"[5] इति सूत्रस्थभाष्यस्य व्याख्यानमेवास्तीति वक्तुं शक्यते। अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकं प्रमाणमिति प्रमाणलक्षणे विहिते घटोऽयं घटोऽयमिति एकाकारे अविच्छिन्न- धारावाहिके ज्ञाने अव्याप्तिः स्यात् यतो द्वितीयतृतीयक्षणेषु अनिर्ज्ञातत्वं तस्य न भवतीति शंकायां यावद्घरावाहिकं ज्ञानं तत्र एका एव स्थिरा वृत्तिः स्वीक्रियते। अथवा तेजोरूपस्य चाक्षुरिन्द्रियस्य प्रतिक्षणं भिन्नस्य भिन्नस्योत्पादने वा तत्र धारावाहिके प्रामाण्यनिर्वाहः। अत्र प्रमाणन्तु "अपादाने पञ्चमी"[6] इति सूत्रस्थं भाष्यमेव। तत्र हि भाष्यकारेण "अध्वनः प्रथमा च" इति पूर्वपक्षभाष्यमुत्थाय "तत्तर्हीदं बहु वक्तव्यम्? न वक्तव्यम्। अपादान इत्येव सिद्धम्। इह तावत् प्रासादात् प्रेक्षते शयनात् प्रेक्षत इति। अपक्रामति तत्तस्माद् दर्शनम्। यद्यपक्रामति, किं नात्यन्तायापक्रामति? सन्ततत्वात्। अथवा अन्यान्यप्रादुर्भावात्, अन्याचान्या च प्रादुर्भवति"[7] इति। उद्योतकारेण चात्र

1. महाभाष्यम् 1.1.1
2. महाभाष्यम् 2.3.55
3. पाणिनीयव्याकरणेप्रमाणसमीक्षा, प्रस्तावना पृ.सं.9
4. वाक्यपदीयम् 3 वृत्तिसमुद्देशः श्लो. 259-260
5. पा.सू. 2.1.55
6. पा.सू. 2.3.28
7. महाभाष्यम् 2.3.28

"अन्या चान्या चेति दर्शनक्रिया। उपक्रामति तस्माद् दर्शनमिति दर्शनपदेन वृत्तिरेवाभिमता" इति व्याख्यातम्। स्पष्टञ्चैतत् शक्त्याश्रयनिरूपणप्रसङ्गे, लघुमञ्जूषाया कलाकुञ्जिका युक्ते[1]। लक्षणे अनिर्ज्ञातपददानेन प्रमालक्षणस्य स्मृतौ नातिप्रसङ्गः। शाब्दिकनये व्यावृत्तिव्यवहारान्यतरप्रयोजनेन प्रमात्वस्य निरूपणात् प्रवृत्त्यङ्गतया लक्षणनिरूपणाभावादेव स्मृतेः प्रामाण्यं नेष्यत इति अनिर्ज्ञातकथनेन स्मृतेः प्रमात्वपरिहारः। निरिति उपसर्गेण नैरन्तर्यं बोध्यत इति अव्यवहितपूर्वक्षणवृत्ति यज्ज्ञानं तद्विषयत्वाभाववान् अर्थो अनिर्ज्ञातार्थः।

अतः पटज्ञानानन्तरालात्मके प्रथमतृतीयक्षणवृत्तौ घटज्ञाने प्रथमक्षणवृत्तिज्ञानेन तृतीयक्षणवृत्तिघटज्ञानस्य न अप्रमात्वम्। प्रथमक्षणवृत्तिघटज्ञानस्य अव्यवहितपूर्वक्षण-वृत्तित्वाभावात्। अव्यवहितपूर्वक्षणवृत्तियज्ज्ञानं तत् स्वजन्योद्बुद्धसंस्कारस्यापि उपलक्षणं भवतीति अव्यवहितपूर्वक्षणे यज्ज्ञानं संस्कारो वा तदविषयोऽर्थ एव अनिर्ज्ञातार्थः। एवञ्च स्मृतौ नातिप्रसंगः, अव्यवहितपूर्वक्षणे स्वसमानविषयकसंस्कारेण तदर्थस्य विषयीकृतत्वात्। अनिर्ज्ञात इति कथनेन स्वेनानिर्ज्ञात एव गृह्यते, परेण निर्ज्ञातेऽर्थे तदन्यस्यानुभवो नाऽप्रमा। साकल्येनोक्तौ संशयविपर्यादौ न लक्षणसञ्चार इति पूर्वत्र प्रतिपादितम्। तेनैव च उपमानस्यापि प्रामण्यं निरस्तम्।

शुक्तौ रजतमिति सामान्यज्ञाने सति शुक्तिरियं न रजतमिति विशेषज्ञानेन शुक्तौ रजतज्ञानात्मकस्य भ्रमस्य बाधेऽपि शुक्तिं रजतत्वेन जानीयामिति इच्छया इदं रजतमिति यज्ज्ञानं जायते तदाहार्यारोप इत्युच्यते। आहार्यारोप अपि साकल्येन इति पदेन निरस्यते। आहार्यारोपश्च शाब्दिकनये "पूर्वत्रासिद्धम्"[2] इति सूत्रप्रामाण्यात् समादृतः। एवञ्च "स्थानिवदादेशोऽनल्विधौ"[3] इत्यादीनि अतिदेशसूत्राणि अपि शाब्दिकनये आहार्यारोपस्य स्वीकारे प्रमाणानि सन्ति। "शब्दपूर्वको ह्यर्थसम्प्रत्ययः, आतश्च शब्दपूर्वकः। योऽपि ह्यस्य आहूयते नाम्ना, नाम च यदाऽनेन नोपलब्धं भवति, तदा पृच्छति किं भवानाहेति"[4] इत्यादिना भाष्येण सामान्यज्ञानस्य प्रामाण्यं न स्वीकृतमिति ज्ञायते। अत्र विषये भर्तृहरिर्यथा-

> **"अतोऽनिर्ज्ञातरूपत्वात् किमाहेत्यभिधीयते।**
> **नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा।।[5]"**

---

1. वैयाकरणसिद्धान्तलघुमञ्जूषा, शक्त्याश्रयनिरूपणम, टीकाद्वयोपेत, पृ.सं.215-216
2. पा.सू. 7.2.1
3. पा.सू.
4. महाभाष्यम् 1.1.67
5. वाक्यपदीयम् 1.57

कारिकामिमां व्याख्यापयता अम्बाकर्त्रीकारेण श्रीरघुनाथशर्मणोक्तं यथा- "शब्दस्वरूपसम्प्रत्ययाधीनमेव शब्देनार्थप्रत्यायनं मन्यमाना लौकिकाः प्रयुक्तेष्वपि शब्देषु सामान्यतोऽव्यक्तरूपेण गृहीतस्वरूपेषु सत्सु शब्दस्वरूपस्य विशेषेण प्रतिपत्त्यर्थं किं भवान् आहेति पृच्छन्ति शब्दस्वरूपविशेषग्रहणं प्रति यतमानाः"[1] इति। इत्थञ्च सामान्यज्ञानस्यैव न प्रामाण्यम्। एवं निर्विकल्पकज्ञानस्यापि सामान्यज्ञानमात्रत्वान्न प्रामाण्यम्। "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इत्यादिना पातञ्जलदर्शने बाह्यसत्ताशून्यस्य अर्थस्य विकल्पात्मकवृत्त्या ग्रहणं भवति न प्रमयोः, सा च वृत्तिः शाब्दिकः व्यपदेशिवद्भावपक्षे टिसंज्ञादिसिद्धये स्वीक्रियत इति विकल्पवृत्तौ प्रमालक्षणस्य अतिप्रसक्तिर्न स्यादित्यर्थं विषयार्थकक्तप्रत्ययेनैव गतार्थत्वेऽपि अनिर्ज्ञातार्थ इत्यत्र अर्थपदविन्यासः। एवमेव बौद्धबाध्यत्वेन प्रसिद्धस्य द्विविधात्मकस्य अर्थस्य द्वयोरर्थयोर्मध्ये केवलं निर्ज्ञातपदेन विषयार्थकक्तान्ततया प्रसिद्धस्यैव बाह्यस्यार्थस्य ग्रहणात् बौद्धपदार्थस्य ग्रहणं न भवेदिति द्वयोरेव ग्रहणार्थमर्थपदविन्यासः।

भाष्ये येनार्निज्ञातमर्थं ज्ञास्यामि इति करणतृतीयार्थनिर्देशात् ज्ञास्यामि इत्यनेन कर्तुः पृथङ्निर्देशात् च प्रमायाः करणमेव प्रमाणमत्रापेक्षितम्। "साधकतमं करणम्"[2] इति सूत्रे तमपा च कारकान्तरापेक्षया प्रकर्षत्वं स्वीक्रियते न तु करणान्तरापेक्षया। करणत्वञ्च वैयाकरणभूषणसारे-

**"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।**
**विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्॥[3]"**

एवञ्च कर्तृकर्मादिकारकापेक्षया प्रकर्षविवक्षणेन अव्यवधानेन फलजनकव्यापार-रूपप्रकर्षवत् कारकं करणम्। तथा च तथाविधं प्रमायाः करणमेव प्रमाणम्। "इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा"[4] इति सूत्रेण इन्द्रियपदनिर्वचने इन्द्रियाणामिन्द्रसृष्टत्वमुक्तमिति। इन्द्रो जीवात्मा तस्य लिङ्गं करणेन कर्तुः अनुमानादिति जीवात्मनः सिद्धिः। तेनैव च परमात्मनोऽपि सिद्धिः, अन्यथा अल्पसामर्थ्यस्य जीवात्मनः इन्द्रियसृष्टत्वं कथं सिद्ध्येदिति ईश्वरस्यापि शाब्दिकनये स्वीकारस्तथा च परमात्मनो यज्ज्ञानं तत्सर्वमेव प्रत्यक्षं नित्यञ्च भवतीति प्रमायाः प्रमाणजन्यत्वस्वीकारे ईश्वरमायाः अप्रमात्वं स्यादिति ईश्वरप्रमायाः अबाधितार्थ-विषयकज्ञानत्वं, तद्वति तत्प्रकारज्ञानत्वमेव वा स्वीक्रियते। एतादृशप्रमालक्षणस्वीकारे

---

1. श्रीरघुनाथशर्मा, अम्बाकर्त्री, वाक्यपदीयम् 1.57 पृ.सं.105
2. पा.सू. 1.4.42
3. वैयाकरणभूषणसारः, सुबर्थनिर्णयः
4. पा.सू. 5.2.93

यद्यपि सूत्रकारादीनामाशयः प्रकटितो नैव दृश्यते तथापि अनुक्तमपि अप्रतिषिद्धमनुमतमेवेति न्यायेन तेषामपि सम्मतिरस्त्यत्र इति वक्तुं शक्यते।

अत एव वेदान्तदर्शनेऽपि जीवेश्वरसाधारणमन्यदेव प्रमालक्षणं प्रदर्शितम्। वेदान्तपरिभाषायां जीवेश्वरसाधारणं प्रमालक्षणं यथा "तदभाववति तत्प्रकारकत्वा-भावरूपमेकं विशेष्यावृत्त्यप्रकारकत्वाभारूपमपरत्वम्"[1] इति। नागेशभट्टेन अपि बौद्धार्थस्य वाच्यत्वनिरूपणावसरे "एतत्सर्वं साक्षिभाष्यमिति तन्निष्ठप्रकारत्वा-वच्छिन्नतद्वद्विशेष्याकत्वरूपं प्रामाण्यम्"[2] इति। लक्षणमिदं परिष्कृत्य श्रीरामप्रसाद-त्रिपाठिमहोदयेन पाणिनीयव्याकरणे प्रमाणसमीक्षाख्ये ग्रन्थे प्रस्तावनायां लिखितं यथा "तद्वन्निष्ठविशेष्यतानिरूपिततत्तन्निष्ठप्रकारताशालिज्ञानत्वं प्रमालक्षणम्" तस्य करणञ्च प्रमाणमिति व्याकरणदर्शनाभिमतं प्रमाणसामान्यलक्षणम्। जीवस्य प्रमातृत्वे अनिर्ज्ञातार्थस्य साकल्येन ज्ञानं जीवेश्वरयोः प्रमातृत्वे तु अबाधितार्थविषयकत्वम्, तद्वति तत्प्रकारकज्ञानत्वे वा प्रमात्वं स्वीक्रियते व्याकरणदर्शने।

इत्थं व्याकरणदर्शनाभिमतं प्रमाणसामान्यलक्षणम्। इतः परं व्याकरणदर्शनाभि-मतानि प्रमाणानि कानि सन्तीति विचार्यते। प्रमाणसंख्याविषये सर्वैरपि सामान्यतया परोक्षमपरोक्षञ्चेति द्विविधमेव प्रमाणं स्वीक्रियते। शाब्दिकनिकायेऽपि प्रमाणस्य द्वैविध्यमेव सूत्रकारेण प्रदर्शितं सूत्रैः यथा "अपरोक्षे च"[3], "परोक्षेलिट्[4]" परोक्षमपरोक्षमिति द्विविधं प्रमाणम्। अपरोक्षमेव प्रमाणमिति मन्वते चार्वाकाः इति विषयान्तरं परन्तु सर्वैरपि पौरस्त्यदार्शनिकैः ज्ञानसाधनस्य परोक्षापरोक्षता स्वीक्रियत एव तत्र हि अपरोक्षं नाम प्रत्यक्षम्। परोक्षमित्यस्य अक्ष्णः परमित्यर्थलाभात्। अक्ष्णः परंपरोक्षं चेत् स्पार्शनादीनामपि अक्ष्णः परत्वात् न तस्य प्रत्यक्षत्वं स्यादित्यत्र तु उच्यते अक्षशब्दो हि इन्द्रियपरत्वेन गृह्यते। यथा प्रमाणसमीक्षायाम् – "अश्नुते विषयमिति अक्षमिन्द्रियम्। अश्नुते अक्ष्णोति व्याप्नोति सकलद्रव्यक्षेत्रकालभावानिति अक्षो जीवः। प्रतिः प्रतिगतार्थः, अक्षं प्रतिगतं तदाश्रितम्, अक्षाणि चेन्द्रियाणि, तानि प्रतिगतञ्च इन्द्रियाव्याश्रित्योज्जिहीते यज्ज्ञानं तत्प्रत्यक्षम्"[5] इति।

अक्षशब्दस्य इन्द्रियपरकत्वस्वीकारादेव "परोक्षे लिट्" सूत्रस्य व्याख्यानावसरे भाष्यकारेणेत्थमभिहितं यथा– "अथवा भवति वै कश्चिज्जाग्रदपि वर्तमानकालं लोपलभ्यते, तद्यथा वैयाकरणानां शाकटायनो रथमार्गे आसीनः शकटसार्थः यान्तं

1. वेदान्तपरिभाषा, पृ.291 सं.सं.वि.वि. वाराणसी
2. वैयाकरणसिद्धान्तलघुमञ्जूषा पृ.329
3. पा.सू. 3.2.119
4. पा.सू. 3.2.15
5. प्रमाणमीमांसा पृ.7

नोपलेभे। किं पुनः कारणं जाग्रदपि वर्तमानकालं नोपलभे? मनसा संयुक्तानि इन्द्रियाणि उपलब्धौ कारणानि भवन्ति। मनसोऽसान्निध्यात्"[1]। इत्थं महाभाष्यकारेण प्रत्यक्षस्य प्रमाणत्वमथ च अक्षस्येन्द्रियपरत्वञ्च स्वीकृतं दृश्यत इति अपरोक्षं नाम प्रत्यक्षमेव प्रमाणम्। तदेव सर्वैः स्वीकाराच्च। तच्च प्रत्यक्षप्रमाणं लोकप्रसिद्धमेव। परोक्षप्रमाणसंख्याविषये वैयाकरणनिकायेऽपि बहूनि मतानि प्राप्यन्ते। तत्रापि परोक्षज्ञानस्य अनुमानशब्दार्थापत्तिभेदेन त्रैविध्यं सर्वैः स्वीकृतम्। तत्र परोक्षापरोक्षभेदेन चातुर्विध्यं प्रमाणस्य आयातम्। वाक्यपदीयकारेण भर्तृहरिणा–

**"परेषामसमाख्येयमभ्यासादेवजायते।**
**मणिरुपादिविज्ञानं तद्विदां नानुमानिकम्॥[2]"**

इत्यनया कारिकया। एवञ्च अदृष्टस्य प्रामाण्यम् –

**"प्रत्यक्षमनुमानञ्च व्यतिक्रम्य व्यवस्थितः।**
**पितृरक्षःपिशाचानां कर्मजा एव सिद्धयः॥[3]"**

इत्यनया कारिकया साधितम्। तथैव प्रतिभाया अपि प्रामाण्यम् "विच्छेदग्रहणेऽर्थानां प्रतिभान्येव जायते। वाक्यार्थ इति तामाहुः पदार्थैरुपपादितम्। प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति। समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात्[4]। सर्वेऽपि लोके व्यवहारो ज्ञानाधीनः। तच्च ज्ञानं प्रतिभाधीनमिति तस्याः प्रामाण्यम्। इति भर्तृहरिमते प्रमाणस्य षाड्विध्यमस्ति। एवमेव नागेशभट्टेन प्रमाणानां संख्या दश स्वीकृता दृश्यते। यथा लघुमञ्जूषायां बौद्धार्थनिरूपणावसरे उपमानस्य प्रमाण्यं नागेशभट्टेन लघुमञ्जूषायामित्थं समर्थितं यथा– "अत एवाज्ञातार्थकेष्विदमेकं पदमिति ज्ञातेषु नलचैत्रगवादिपदेषु श्रुतेषु, कः एतदर्थः इति प्रश्ने उपमानतल्लक्षणकथनादिना प्रतिवचनञ्च दृश्यते। अत एव सादृश्याद्युपायेन शक्तिबोधकतया उपमानस्य, प्रसिद्धपदसमानाधिकरण्यात् तद्बोधकतया कोशस्य च प्रमाण्यं व्युत्पादयन्ति" इति रीत्या नागेशेन उपमानकोशयोः प्रमाण्यं प्रदर्शितमस्ति।

एवमेव अनुपलब्धेरपि प्रामाण्यत्वेन व्यवहारेतु "तस्य भावस्त्वतलौ"[5] इति सूत्रस्थभाष्यव्याख्यानं कारणम्। तत्र हि "अनन्यच्छब्दादिभ्यो द्रव्यम्, न ह्यन्यदुपलभ्यः, पशोः खल्वपि विशसितस्य पर्णशते न्यस्तस्य नान्यच्छब्दादिभ्य उपलभ्यते" इति

1. महाभाष्यम् 3.2.15
2. वाक्यपदीयम्, ब्रह्मकाण्डम् 35
3. वाक्यपदीयम्, ब्रह्मकाण्डम् 36
4. वाक्यपदीयम् 2.143-147
5. पा.सू

भाष्यकारेण उक्तम्। तद्व्याख्यापयता कैयटेन च "पशोः खल्वपीति। उपलब्धि-लक्षणप्राप्तस्य द्रव्यस्यानुपलभादसत्वनिश्चयो युक्त इति भाव" इति उक्तम्। तत्रैव उद्योतकारेण तस्य भाष्यस्य व्याख्यानमित्थं विहितं यथा "अनुपलब्धि- प्रमाणमेव द्रढयति तद्व्याचष्टे उपलब्धीति। एवञ्च विविक्ततया ग्रहणाभावादसत्त्वनिश्चय इत्यर्थः। उपलब्धिलक्षणं प्रमाणमेव सत्तानिश्चायकम्। उपलब्धिलक्षणात् प्रमाणात् प्राप्तस्य प्राप्तसत्तानिश्चययोग्यस्यानुपलम्भादसत्वनिश्चय इत्यर्थः" इति[1]। पूर्वोक्तै सह प्रमाणानां संख्या दशजाता।

श्रीरामाज्ञापाण्डेयेन व्याकरणदर्शनभूमिकायां प्रतिमायाञ्च पञ्च प्रमाणानि स्वीकृतानि सन्ति "तत्र प्रत्यक्षानुमानार्थापत्तिशब्दानुपलब्धयः प्रमाणानि"[2] इति। श्रीरामप्रसादत्रिपाठिमहोदयस्तु "पाणिनीयव्याकरणे प्रमाणसमीक्षा" ग्रन्थस्य प्रस्तावनायां "प्रमाणसंख्याविषये मतभेदे सत्यपि प्रत्यक्षानुमानशब्दरूपाणि त्रीण्येव प्रमाणानि सन्ति। अन्येषामुपमानार्थापत्यनुपलब्धिरूपणामेष्वेवान्तर्भावो भवितुमर्हति"[3] इत्युक्त्वापि सर्वस्वीकृतत्वेन ग्रन्थे प्रत्यक्षानुमानार्थापत्तिशब्दानां चर्चां करोति। प्रमाणान्यतमत्वञ्च दर्शयति।

इत्थं व्याकरणदर्शने बहूनि मतानि प्राप्यन्ते। तत्र सामान्यतया परोक्षज्ञानत्वेन अनुमानशब्दार्थापत्तीनां सर्वैः स्वीकारः क्रियते इति प्रत्यक्षेण वा सहितानि तान्येव प्रमाणानि अत्र विविच्यन्ते। प्रत्यक्षानुमानागमार्थापत्त्यतिरिक्तानि प्रमाणानि च तेषु तेषु अन्तर्भवन्तीति अन्तर्भावप्रकारोऽपि प्रदर्श्यते। यद्यपि "शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्, शब्दश्च शब्दज्ञाने धर्ममाह"[4] इति वचनात् व्याकरणदर्शने शब्दस्यैव परमार्थतः प्रामाण्यं तथापि लोकव्यवहाराय प्रत्यक्षानुमाने अवश्यं स्वीकर्तव्ये इति तयोः स्वीकारः। तदतिरिक्तानामस्वीकारेऽपि न कापि हानिरिति अर्थापत्यादीनां खण्डनमण्डनप्रकारस्तु बुद्धिविलासायैव भवतीति विदुषामाशयः।

✦✦✦

---

1. महाभाष्यम्, प्रदीपोद्योतः, पा.सू. 5.1.119
2. व्याकरणदर्शनभूमिका पृ.सं.134
3. पाणिनीयव्याकरणेप्रमाणसमीक्षा, प्रस्तावना पृ.सं.11
4. महाभाष्यम्, पश्पशाह्निकम्

 ISSN : 0975-1769

# वरदराजपञ्चाशत्यवतारवर्णनम्

**डॉ. ल. सम्पत्कुमारः***

**विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम्।**
**दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये॥**

श्रीवैष्णवसंप्रदाये विराजन्ते नैका आचार्यपुरुषाः, तेष्वन्यतमो विलसति कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रादिबिरुदैरलङ्कृतो वेङ्कटनाथाख्यस्वामी वेदान्तदेशिकः। श्रीमद्रामानुजाचार्यस्य सिद्धान्तानां प्रवर्ती व्यवस्थापकश्चासीदाचार्यो निगमान्तमहादेशिकः। श्रीवैष्णवसंप्रदायस्य प्रतिष्ठापनार्थम् आचार्यसार्वभौमोऽनेकान् ग्रन्थान् व्यरचयत्। तस्य काव्यकौशलं शास्त्रज्ञानं व विलोक्य विस्मितः श्रीअप्पय्यदीक्षितमहाभागः तमेवं प्रशशंस-

**इत्थं विचिन्त्याः सर्वत्र भावाः सन्ति पदे पदे।**
**कवितार्किकसिंहस्य काव्येषु ललितेष्वपि॥**

सांप्रतमस्मिन् शोधप्रबन्धे कवितार्किककेसरिणो वेदान्तदेशिकस्य कृतिषु वरदराजपञ्चाशन्नामके श्लोकरत्नेऽवतारवर्णनमित्यस्मिन् विषये किञ्चित् प्रस्तूयते।

अनादिकालादारभ्य संसारनिमग्नानां जीवानामुद्धरणाय कारुण्यराशिः, श्रियःपतिश्श्रीमन्नारायणो बहुशो बहुधा चावातरत्। अवर्णनीयगुणमहितान् तानवतारान् श्रीमन्निगमान्तमहादेशिकवर्यः दशावतारस्तोत्रे समग्रतया विवृणोति। तथापि तावन्मात्रेणापरितुष्यन् वेदान्ताचार्यवर्यः प्राप्तेष्ववसरेषु भगवतश्श्रीमन्नारायणस्यावतारगुणकीर्तनं करोति। एवं स्वकीयवरदराजपञ्चाशति भगवतो दयैकसिन्धोरवतारमहिमानं प्रस्तौति।

तत्रादौ स्तोत्रारम्भे, कवितार्किकसिंहो नैच्यानुसन्धानरूपेण क्षमां याचते-

---

* सहाचार्यः एवं अध्यक्षः, भाषाशास्त्र-साहित्यिकाध्ययनविभागः, चिन्मयविश्वविद्यापीठम्, केरला

**यस्यानुभावमधिगन्तुमशक्नुवन्तः-**
**मुह्यन्त्यभङ्गुरधियो मुनिसार्वभौमाः।**
**तस्यैव ते स्तुतिषु साहसमश्नुवानः**
**क्षन्तव्य एष भवता करिशैलनाथ॥[1]**

इति। वाल्मीकिव्यासप्रभृतयः मुनिसार्वभौमा अपि भगवतः करुणाकटाक्षकलाविलासं परिपूर्णतया स्तोतुं वर्णयितुं वा सामर्थ्यहीनास्सन्तः, तस्य दिव्यमङ्गलदेहकान्तौ नितरां मग्ना मुह्यन्ति। क्व तेषामभङ्गुरा धीः, क्व च मे सङ्कुचिता मतिः। तथापि, तवैव गुणगणा असकृन्मम कर्णपथमवतीर्णा मां मुखरयन्ति। अतः, अस्मादृशामपकृतौ चिरदीक्षितानां साहसम् अपराधमर्षणे बद्धदीक्षः करिशैलनाथोमृष्यत्विति सविनयं प्रार्थयते।

भगवतः कल्याणगुणान् स्तोतुं लब्धावकाशस्स्वामिवेदान्तदेशिकः, विभवावतारलीलां वर्णयितुमिच्छुकस्मन् स्वाभिप्रायं प्रकटयति-

**मध्ये विरिञ्चिशिवयोर्विहितावतारः**
**ख्यातोऽसि तत्समतया तदिदं न चित्रम्।**
**मायावशेन मकरादिशरीरिणं त्वां**
**तानेव पश्यति करीश यदेष लोकः॥[2]**

श्लोकेस्मिन् मकरादिशब्देन भगवतः मत्स्य-कूर्म-परशुरामावताराणाम् आंशिकनिर्देशः कृतः।

ततः, वराहावतारस्य अद्भुतं दर्शयति-

**बालाकृतेर्वटपलाशमितस्य यस्य ब्रह्माण्डमण्डलमभूदुदरैकदेशे।**
**तस्यैव तद्वरद हन्त कथं प्रभूतं वाराहमास्थितवतो वपुरद्भुतं ते॥[3]**

वकुलभूषणभास्करः 'नम्माल्वार्' इति विख्यातः कारिमारः कथयति भगवतोऽवतारेषु वराहस्वाम्येव ज्ञानरूपीति।

*Ī-accollāyi-numākaeṛitiraivaiyammuṟṟum*
*ĕ-tturuvaiyiṭantapirā-iruṅkaṛpakamcĕr*
*vā-attavarkkumallātavarkkummaṟṟelāyavarkkum*
*jñā-appirā-aiallālillainā-kaṇṭanallatuvĕ.[4]*

---

1. वरदाराजपञ्चाशत्, 2
2. तत्रैव, 11
3. वरदराजपञ्चाशत्, 22
4. Tiruviruttam, 99

“मम वचनानि शक्तिहीनानि स्युः, तथापि लोककल्याणाय यत्तत्त्वमहं जानामि तद्वक्ष्ये। पुरा भगवान् वराहरूपेणाविर्भूय प्रलयसमुद्रे निमग्नां भूमादेवीम् उद्धृतवान्। एवं भवाम्भोधिमग्नानस्मादृशान् जीवान् स एव यज्ञवराह उद्धरिष्यति। ये भूलोके सन्ति, ये च द्युलोके वसन्ति, ये चान्ये वैकुण्ठलोके निवसन्ति तेभ्यस्सर्वेभ्यस्तस्यैव वराहभगवतः पादारविन्दौ समाश्रयौ। एतद्वाक्यं सत्यं हितं च” इत्याघोषते।

कोलवराहस्य बृहदाकारेण चकितचेताः कवितार्किकसिंहो निगदति – हे वरदराज! पुरा प्रलयपयोधिजले कस्मिंश्चित् वटस्य पत्रस्य पुटे शयानस्सन् समस्तमिदं ब्रह्माण्डं स्वोदरे निक्षिप्यारक्षः। हन्त! महदाश्चर्यं यत्तावकं कुहनाकिशोरशरीरं वराहवतार-समये बृहदाकारेण परिणतम्। संप्रति त्वं तव दंष्ट्राग्रभागेन मुस्तेव विश्वंभरां बिभर्षि। वटपत्रशयनकाले यः प्रलयपारावारस्त्वां परित आसीत्, स एवाधुना तवापरि-मितेन वराहवपुषा गोष्पदीकृत इति प्रस्तौति।

अथ त्रयोविंशतितमे श्लोके नृसिंहावतारस्य प्रभावं वर्णयति–

**भक्तस्य दानवशिशोः परिपालनाय भद्रां नृसिंहकुहनामधिजग्मुषस्ते।**
**स्तम्भैकवर्जमधुनापि करीश नूनं त्रैलोक्यमेतदखिलं नरसिंहगर्भम्॥**[1]

श्लोकेऽस्मिन् भगवान् चेतनाचेतनेष्वन्तर्यामिरूपेण समास्थितो वर्तत इति तत्वं निर्दिशति वेदान्तदेशिकः। हिरण्योगर्वातिरेकात् प्रह्लादं पृच्छति – क्वास्ते तव भगवान्? प्रह्लादो वदति–

*cāṇilumuḷa-; orta-mai, aṇuvi-aiccatakūṛiṭṭa*
*koṇi-umuḷa-; māmerukku-ṛilumuḷa-; in ni-ṛa*
*tūṇi-muḷa-; nī co--acolli-umuḷa-; it ta-mai*
*kāṇutiviraivie-ṛā-; na-ṛe-kka-ka-nakkā-.*[2]

इति कम्बरामायणे वर्णितमस्ति। स्वामिदेशिकश्लोकस्य प्रथमे पादे नृसिंहावतारस्य कारणं विवृणोति – भक्तस्य दानवशिशोः परिपालनाय स्थूणादाविर्भूत इति। तस्यावतारः कथमभूत् इति प्रश्न उत्तरति – भद्रां नृसिंहकुहनामधिजग्मुषस्ते ... भगवान् नृसिंहा-वतारं कर्तुम् उद्युक्तोऽपि तस्य मनसि शङ्का काचिदुद्भवति। प्रह्लादस्तु किशोरः। न जाने स कां स्थूणां निर्दिशति? इति विचिन्त्यार्तत्राणाय बद्धकङ्कणो भक्तवत्सलो नृसिंहस्समस्तवस्तुषु अन्तर्हितोऽभवत्। अनन्तरं प्रह्लादेन निर्दिष्टात् स्तम्भान्निर्गतः। परन्तु, अद्यापि त्रैलोक्यमेतदखिलं नरसिंहगर्भम्–इति भगवतः सर्वव्यापकत्वं प्रतिष्ठापयति।

---

1. वरदराजपञ्चाशत, 33
2. Kamparāmāyam, irayavataippaalam, 124

अग्रिमे श्लोके वामनावतारवैभवम् उद्गयति–

**क्रामन् जगत् कपटवामनतामुपेतस्त्रेधा**
**करीश स भवान् निदधे पदानि।**
**अद्यापि जन्तव इमे विमलेन यस्य**
**पादोदकेन विधृतेन शिवा भवन्ति॥**[1]

हे वरद! पुरा त्वं बलिमखप्रसङ्गे कपटवामनरूपतामुपेत्यागच्छः। तव दिव्य-मङ्गलशरीरसौन्दर्येणाकृष्टो बलिस्तवेप्सितां याचनां ददौ। ततस्त्वं (oṅkiulakaḷan-tauttama-[2]) त्रिविक्रमो भूत्वा समस्तं जगत् एकेनैव पादने क्रान्त्वा स्वलीलां व्यतनोः। तदा ब्रह्मा स्वकमण्डलुजलेन तव पादारविन्दयोरभिषेकमाचरत्। तत् पवित्रीकृतं पादोदकमेव गङ्गात्मना परिणतम्। ये तज्जलं मूर्ध्नि वहन्ति ते श्रीपादतीर्थस्य महिम्ना शिवा भवन्ति–कलिकालुष्यरहिता निर्मला भवन्तीत्यस्याभिप्रायः। अत्र 'गङ्गाजललव-कणिका पीता' इत्यादिशङ्करभगवत्पादस्य सुवचनम् अनुसन्धेयम्।

ततः परं पञ्चविंशतितमे श्लोके रामावतारगुणकीर्तनं लभ्यते।

**येनाचलप्रकृतिना रिपुसंक्षयार्थी**
**वारां निधिं वरद पूर्वमलङ्घ्यस्त्वम्।**
**तं वीक्ष्य सेतुमधुनापि शरीरवन्तस्सर्वे**
**षडूर्मिबहुलं जलधिं तरन्ति॥**[3]

त्रेतायां रावणं संहर्तुं रघुपतिश्श्रीलङ्कापर्यन्तं सेतुनिर्माणमकरोत्। अधुनापि जना रामसेतदर्शनेन षडूर्मिबहुलं भवसागरं तरन्ति, श्रीवैकुण्ठं च गन्तुं पारयन्ति। भगवानेवात्र सेतुरूपेण तिष्ठन् सर्वान् जीवान् तारयति। अनेन कारणेनैव खलु स तारकरामः। अतः बविकतकसिंहः कथयति–

**त्वद्भक्तिपोतभवलम्बितुमक्षमाणां**
**पारं परं वरद गन्तुमनीश्वराणाम्।**
**स्वैरं लिलङ्घयिषतां भववारिराशिं**
**त्वामेव गन्तुमसि सेतुरभङ्गुरस्त्वम्॥**[4]

इति। ये जीवा ज्ञानभक्तिवैराग्यहीनास्ते भक्तियोगं वा प्रपत्तियोगं वाचरितुं न प्रभवन्ति। तेषां संसारसागरतरणायैक एवोपायोऽस्ति। भगवानेव स्वयं तारको विलसति।

---

1. वरदराजपञ्चाशत्, 24
2. Tiruppāvai, 3
3. वरदराजञ्चाशत्, 25
4. वरदराजपञ्चाशत्, 31

स ह्यभङ्गुरस्सेतुः। तस्यैव साहाय्येन जीवा भववारिराशिं लङ्घयितुं सुक्षमा भवन्ति।

ततषड्विंशतितमे श्लोके विभवावतारवैभवस्योपसंहारः क्रियते।

**इत्थं करीश दुरपह्नवदिव्यभव्यरूपान्वि-**
**तस्य विबुधादिविभूतिसाम्यात्।**
**केचिद्विचित्रचरितान् भवतोऽवतारान्**
**सत्यान् दयापरवशस्य विदन्ति सन्तः॥**[1]

आल्वार्-आचार्यदयः केचित् सन्तो भगवतोऽवताररहस्यं सत्यम् अवगम्य मुक्ता अभवन्। भगवत एत अवतारा रजस्तमोविहीनाः, केवलं शुद्धसत्त्वनिर्मलरूपा इति च ते जानन्ति। एवम् एते अवतारा भक्तपरिपालनाय धर्मसंरक्षणाय च कृता इत्यपि ते ज्ञानिनः विदन्ति।

**उपसंहारः**

वेङ्कटनाथाख्यस्स्वामिदेशिको वरदराजपञ्चायशन्नाम्नि निरुपमे स्तोत्रग्रन्थेऽस्मिन् भगवतोऽवतारसंबन्धिसौशील्यादिगुणानुल्लिखति। भगवान् नकदापि स्वस्योदग्रत्वंमन-सिनिदधाति। स निजसङ्कल्पवशादवतीर्यनिहीनतराणांजीवानाम् उद्धरणायसौशील्यगुणे-नतान्वशीकरोति। ज्ञानिनस्तत्त्वदर्शिनश्चभगवतः सौलभ्यादिगुणान्दृष्ट्वाविस्मयमापन्ना एवमुद्घोषयन्ति-

*ammā-āzippirā-ava-evviṭattā-yā-ār*[2]

स्वामी कारिमारो वदति-भगवतः गुणपर्वतस्य पुरतः कोऽहम्? इति। स हि वैकुण्ठाख्ये परे लोके नित्यसूरिभिर्मुक्तैश्च सर्वदा स्तूयते। स च परमात्मा, स्वदिव्य-मङ्गलविग्रहेणानन्तकल्याणगुणगणैश्चास्मान् तोषयति। रामावतारे भगवान् गुहसुग्रीव-विभीषणैस्सह मैत्रीमभजत। कृष्णावतारे गोपिकाकुचेलमालाकारादिभिस्सख्यमगतम्। सर्वदाऽस्य मनः 'सौशील्यभावितधियाः' परिपूर्णमस्ति। स एतेष्ववतारकालेषु स्वस्य ज्ञानबलैश्वर्यवीर्यशक्तितेजांसि गोपायित्वा लोकैस्सह विरहति। तथा सौशील्यगुणस्या-विष्कारं कृत्वा भक्तैर्भागवतैस्सह निश्शङ्कंसर्वदां समायौति। एवं कवितार्किककेसरिणातिविशदतया भगवतोऽवतारवर्णनं कृतम्।

✦✦✦

1. वरदराजपञ्चाशत्, 26
2. Nālāyirativyaprabandham, 3230

# कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते परिभाषार्थविचारः

डॉ. नितेश कुमार द्विवेदी*

**शोधपत्रसारः-**

अस्मिन् शोधपत्रे परिभाषेन्दुशेखरस्थायाः कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते इति परिभाषायाः विवेचनम् कृतमस्ति। आदौ परिभाषास्वरूपस्य विवेचनम् कृतम् वर्तते।

**परिभाषा-**

महर्षिणा पाणिनिना अष्टाध्याय्यां यथा वृद्धादयः बह्व्यः संज्ञाः क्रियन्ते तथैव इको गुणवृद्धी इत्यादीनि बहूनि परिभाषासूत्राण्यपि प्रणीतानि। किन्तु अर्थवद्ग्रहणे नानर्थकस्य इत्यादीनि वचनानि सूत्ररूपेण न पठितानि। पूर्वव्याकरणेषु तेषामपि सूत्ररूपेण परिभाषारूपेण वा पाठः सम्भाव्यते। अतः एतासां पाणिनिसूत्रभिन्नानां परिभाषाणामस्ति महत्त्वपूर्णं स्थानम्।

पाणिनिना अनुक्तत्वात् तेषां प्रामाण्यं कथमिति प्रश्नः सर्वदा वैयाकरणानां कृते विचारणीयः आसीत्। अतः यावच्छक्यं पाणिनिसूत्रांशद्वारा तासां प्रामाण्यबोधने वैयाकरणानामायासः दृश्यते। यासां ज्ञापनं सूत्रेण न सम्भवति, तासामपि लोकन्यायाद्याधारेण प्रामाण्यस्थापने प्रयासः, तदपि न सम्भवति चेत् वार्तिके, महाभाष्ये वा पाठाधारेण त्रिमुनि मध्ये स्वीकारात् तद्वचनस्यापि प्रामाण्यं शिरोधार्यते।

इत्थम् पाणिनीयसूत्रभिन्नानामेतासां परिभाषाणां प्रामाण्यं ज्ञापकसिद्धत्वेन, न्यायसिद्धत्वेन, वाचनिकत्वेन च व्याकरणसम्प्रदाये अङ्गीक्रियते।

* सं. अध्यापकः(व्याकरणम्), केन्द्रीयसंस्कृतविश्वविद्यालयः, मुक्तस्वाध्यायपीठम्, नवदेहली, knitish052@gmail.com, M-8382855353

**परिभाषाशब्दार्थः-**

पर्युपसर्गपूर्वक भाष व्यक्तायां वाचि धातोः घञ् प्रत्यये, **गुरोश्च हलः**[1] सूत्रेण स्त्रीलिङ्गे विहिते अकारप्रत्यये, टापि परिभाषाशब्दः सिद्ध्यति। एवम् शब्दोऽयम् परिभाषणशब्दसमो भवति।तथा चोक्तममरकोषे **यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम्**[2] इति परिभाषणशब्दः तत्र प्रयुक्तः। **हेतुमति च**[3] सूत्रभाष्ये तादृशार्थकस्य परिभाषाशब्दस्य प्रयोगोऽपि तत्र प्रदर्शितः।

परं प्रस्तुतसन्दर्भे परिभाषाशब्दः न यौगिकः, अपितु रूढः ,तस्मात् नागेशः भणति प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते, इति प्रतिज्ञा वाक्ये परिभाषाशब्दः रूढ एव प्रयुक्तः।

अथवा परितो भाष्यते या सा परिभाषा इति व्युत्पत्त्या योगरूढमिदं परिभाषापदं बोध्यम्।

**परिभाषालक्षणम् -**

अनियमे नियमकारणी परिभाषा इति प्राचीनसम्मतं परिभाषालक्षणं बोध्यम्। किन्तु लक्षणमिदं सर्वत्र न समन्वेति। तस्मात् लक्षणान्तरमपि कृतम्-

**एकदेशस्थिता शास्त्रं भवने याति दीपताम्।**
**परितो व्यापृतां भाषां परिभाषां प्रचक्षते।।**

अत्र च मूलम् परिभाषा पुनरेकदेशस्था सति कृत्स्नम् शास्त्रमभिज्वलयति प्रदीपवत्, तद्यथा प्रदीपः सुप्रज्वलितः एकदेशस्थः सर्वं वेश्माभिज्वलयति इति भाष्यमेव बोध्यम्।

व्याकरणशास्त्रे आचार्यैः शास्त्रीयप्रक्रियायाः सङ्गतिं प्रदर्शयितुम् कानिचन नियमवचनानि स्वीक्रियन्ते तानि हि परिभाषाशब्देन व्यवह्रियन्ते। या विध्यादिशास्त्र-तात्पर्यस्य स्पष्टीकरणे सहायिका, या च विधिशास्त्रप्रवृत्तिं शब्दसाधुत्वदिशया योजिका, या च विधिसूत्रमसाधुत्वं प्रतिगमनाद् विरोधिका, सा परिभाषा कथ्यते।

सेयं परिभाषा चतुर्धा विभज्यते।

---

1. पाणिनिसूत्रम् 3.3.103
2. अमरकोशः 1.6.379
3. पाणिनिसूत्रम् 3.1.26

**ज्ञापकसिद्धा-**

सूत्रात् सूत्रांशाद्वा निष्पन्ना ज्ञापिता या सा ज्ञापकसिद्धा सूत्रनिष्पन्ना परिभाषोच्यते।

**वाचनिकी-**

सूत्रेतरकाशकृत्स्नादिपूर्वाचार्यवचना व्याख्यानवचननिष्पन्ना वा वाचनिकी, सूत्रेतरवचनरूपेण पठिता परिभाषा वाचनिकी भवति।

यथा - **सकृद्गतौ यद्बाधितं तद्बाधितमेव।**

**सूत्ररूपनिष्पन्ना परिभाषा-**

सूत्ररूपेण या परिभाषा पाणिनीयाष्टाध्याय्यां वर्तते। यथा इको गुणवृद्धीति।

**लोकन्यायसिद्धा-**

सूत्रेतरवचनात्मिका लोकन्यायात् सिद्धा या परिभाषा भवति सा लोकन्यायसिद्धा परिभाषा कथ्यते। यथा - **एकदेशविकृतमनन्यवत्**[1] इति।

न हि लोकाद्भिद्यते शास्त्रम् इति न्यायमाश्रित्य कानिचन परिभाषावचनानि लोकव्यवहारमपि अनुसरन्ति। एवञ्च लोकवच्छास्त्रेऽपि व्यवहारो दृश्यते।तेन कारणेन तानि लोकन्यायसिद्धानि परिभाषावचनानि कथ्यन्ते। न हि कोऽपि शिष्टपुरुषः शास्त्रीयप्रक्रियाकार्यनिर्वाहार्थं लौकिकव्यवहारस्य हि आवश्यकताम् अननुगम्य लौकिकीं विवक्षामतिक्रम्य प्रवर्तते। तस्मात् लोकव्यवहारमाश्रित्यापि शास्त्रीयकार्याणां सिद्धिर्दृश्यते।

व्याकरणशास्त्रे षड्विधानि सूत्राणि शब्दानाम् विवेचनार्थं लोकव्यवहारमभिलक्ष्य भगवता पाणिनिना निर्मितानि।

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥**

अष्टाध्याय्यां परिभाषा शब्दस्य कुत्रापि प्रयोगः नास्ति, किन्तु वार्तिककारः अणुदित्सवर्णस्य चाप्रत्ययः इत्यस्मिन् सूत्रे वर्णपाठ उपदेश इति परिभाषाया अनुदेश इत्युक्त्वा परिभाषासूत्रं प्रतिपादितवान्। तथा च **स्वरितेनाधिकारः**[2] इति सूत्रस्य वार्तिके-

---

1. परिभाषेन्दुशेखरः परिभाषासंख्या 37
2. पाणिनिसूत्रम् 1.3.11

**अन्यनिर्देशस्तु निवर्तकस्तस्मात् परिभाषा**[1]

इति महाभाष्यकारोऽपि ब्रवीति **तस्मात् परिभाषा कर्तव्येति।।**[2] अर्थात् परिभाषाशब्दप्रयोगः वार्तिककारेण कृतः। परिभाषायाः लक्षणम् विजयाकारेण इत्थम् प्रतिपादितम्–

**अप्रामाण्यज्ञानानास्कन्दितसाधुत्वप्रकारकबोधोपयोगिबोधजनकत्वम् परिभाषात्वम्।** परिभाषायाः सूत्राणाम् लक्ष्योपयोग्यर्थनिर्धारणे महती आवश्यकता वर्तते। परिभाषेन्दुशेखरग्रन्थे परिभाषाणाम् त्रैविध्यात् प्रकरणत्रयम् वर्तते। शास्त्रत्वसम्पादनोद्देशप्रकरणम्, बाधबीजकथनम्, शेषार्थकथनञ्चेति।

व्याख्यानतो विशेषप्रतिपत्तीत्यारभ्य एकदेशविकृतमनन्यवदित्यन्तं शास्त्रत्वसम्पादनोद्देशप्रकरणम् वर्तते। पूर्वपरनित्यान्तरङ्गापवादानामित्यारभ्य उभयनिर्देशे पञ्चमीनिर्देशो बलीयानित्यन्तं बाधबीजकथनप्रकरणम् विद्यते। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यारभ्य अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते इति परिभाषापर्यन्तं शेषार्थकथनप्रकरणम् विद्यते।

सम्प्रति शास्त्रसम्पादनोद्देशप्रकरणे पठिता **कार्यमनुभवद्धि कार्यी निमित्ततया नाश्रीयते** इति परिभाषाविचारः प्रस्तूयते।

कार्यी नाम कार्यमस्त्यस्य स्थाने इति कार्यी अर्थात् यस्य स्थाने कार्य भवति तत्कार्यी। अर्थात् समवायिकारणम्। निमित्तपदं निमित्तकारणपरं। अर्थात् समवायिकारणं निमित्तकारणन्न भवति। इति लोकसिद्धव्यवहारानुवादिका परिभाषा वर्तते। यथा लोके निमित्तकारणं समवायिकारणत्वेन न स्वीक्रियते। तथैव व्याकरणशास्त्रेऽपि कार्यी अर्थात् समवायिकारणं निमित्तकारणं न भवति।अत्र कार्यी इत्यत्र कार्यमनुभवन् हि इति विशेषणम् वर्तते। परिभाषायाः परिभाषेन्दुशेखरस्थम् अवतरणम् –

अध्येता शयितेत्यादाविङ्शीङोर्ङित्वाद्क्ङिति चेति गुणनिषेधः स्यादत आह – इति।

अर्थात् अध्युपसर्गपूर्वकेङ्धातोः तृच्प्रत्यये, अधि इ तृ इत्यत्र इङ्धातोर्ङित्वात्, क्ङिति चेति निषेधात् गुणः न स्यात् गुणोऽयं इङ्स्थानिकत्वात् ङिन्निमित्तकः, तथा च शीङ्धातोः तृच् प्रत्यये कृते तत्रापि शीङः ङित्वात् गुणनिषेधः प्राप्तः। अतः परिभाषेयं पठिता। क्ङिति च इत्यस्मिन्सूत्रे निमित्तसप्तमी वर्तते। अतः

1. स्वरितेनाधिकारः सूत्रे पठितम् भाष्यवार्तिकम् पृष्ठसंख्या 146
2. तत्रैव महाभाष्यम् पृष्ठसंख्या 146

ङिन्निमित्तकगुणस्यैव निषेधस्तेन क्रियते।

अध्येता, शयितेत्यत्र तु सार्वधातुकार्धधातुकयोः सूत्रेण विधीयमानो गुणः ङिन्निमित्तको नास्ति। निमित्तपदेन पञ्चम्यन्तं सप्तम्यन्तं पदान्तरस्य वा ग्रहणं भवति। किन्तु षष्ठ्यन्तपदस्य ग्रहणं नास्ति। कार्यित्वात्। अत्र इङ्धात्विकारः कार्यी, किञ्च शीङ्धात्विकारोऽपि कार्यी, तत्रैव गुणविधानात् अतः निमित्तपदेन इङ्शीङोर्ग्रहणम् न भवति। एवञ्च ङिन्निमित्तकत्वाभावात् तत्र गुणनिषेधो न प्रवर्तते। अतः गुणो भूत्वेष्टसिद्धिर्भवति।

परिभाषायां ज्ञापकं **स्थण्डिलाच्छयितरि व्रते**[1] इति सूत्रं विद्यते। तत्र हि पाणिनिना शयितरि इति निर्दिष्टः। यदि निमित्तपदेन कार्यिणोऽपि गृह्येत तर्ह्यत्र गुणो न स्यात् तथा च शयितरि इति निर्देशस्यासङ्गतिस्स्यात्। किन्तु गुणविधानेन ज्ञायते यत् निमित्तपदेन कार्यी न गृह्यते।

**कार्यमनुभवन् हि** इति विशेषणम् ऊर्णुनविषतीति प्रयोगसिद्ध्यर्थं वर्तते। तथा हि ऊर्णुञ् आच्छादने धातोः सन्नन्तस्येदं रूपम्। ऊर्णु इति धातोः सन्प्रत्यये कृते ऊर्णु स इत्यवस्थायां इडागमानन्तरं ऊर्णु इ स इत्यवस्थायां **सन्यङोरि**तिसूत्रेण सन्नन्तस्य द्वित्वं प्राप्तम्, तथा च **अजादेर्द्वितीयस्य** इति सूत्रेण नु शब्दस्य द्वित्वम् प्राप्तम्। किञ्च **सार्वधातुकार्धधातुकयो**[2]रिति सूत्रेण गुणोऽपि प्राप्तः। **द्विर्वचनेऽचि** सूत्रेण द्वित्वनिमित्तकेऽचि परे अजादेशो न स्यादिति निषेधात्, तथा च **न न्द्राः संयोगादयः**[3] इति संयोगादिरेफस्य द्वित्वनिषेधात् नुशब्दस्य द्वित्वम् भवति। तथा च ऊर्णु नु इ स इत्यत्र नु इत्युकारे गुणः अवादेशश्च विधाय **सनाद्यन्ता धातवः**[4] इति सूत्रेण धातुसंज्ञां च कृत्वा लट्, तिप्, शप् इत्यादिकार्ये कृते सति ऊर्णुनविषति इतिरूपं सिद्ध्यति।

अत्र कार्यमनुभवन्हि इति विशेषणाभावे षष्ठ्यन्तपदप्रयोज्यत्वं कार्यित्वमिति स्वीक्रियमाणे **सन्यङो**[5]रिति सूत्रे षष्ठ्यन्तपदत्वात् द्वित्वस्य कार्यित्वम् सम्पूर्णे सन्नन्ते स्यात् तथा च द्विर्वचनेऽचि सूत्रप्रवृत्तिवेलायां द्वित्वनिमित्तेऽचि पदेन इ स इति घटकेकारग्रहणम् न स्यात्, कार्यी निमित्ततया नाश्रीयते इति परिभाषा सत्त्वात्। यदा तत्र कार्यमनुभवन् हीति विशेषणम् दीयते तदा **अजादेर्द्वितीयस्य**[6] इति सूत्रप्रवृत्त्या

1. पाणिनिसूत्रम् 4.2.15
2. पाणिनिसूत्रम् 7.3.84
3. पाणिनिसूत्रम् 6.1.3
4. पाणिनिसूत्रम् 3.1.32
5. पाणिनिसूत्रम् 6.1.9
6. पाणिनिसूत्रम् 6.1.2

कार्यमनुभवन् कार्यी नु इति वर्तते। अतः नु इत्यस्य निमित्ततायाः निषेधेऽपि इ स इत्यस्य निमित्तत्वं त्वस्त्येव। अतः द्विर्वचनेऽचि सूत्रप्रवृत्तौ काठिन्यं नास्ति। अतः कार्यमनुभवन् हि इति विशेषणम् अवश्यमेव देयम् भवति।

समवायिकारणनिमित्तकारणयोः सर्वत्र दर्शनेषु भेदस्स्वीकृतः अतः नैषा परिभाषा ज्ञापकसिद्धा इति नागेशाभिप्रायो विद्यते। **द्विर्वचनेऽचि**[1] सूत्रभाष्ये परिभाषेयं ध्वनिता अस्ति।तथा हि द्विर्वचनेऽचीति सूत्रे अचि किम् इति पृष्टे जेघ्रीयते, देध्मीयते इत्युक्तम्। तथा हि द्विर्वचने इति सूत्रसत्त्वदशायां द्वित्वनिमित्तके परे अजादेशो न स्यात् द्वित्वे कर्तव्ये। इत्यर्थसत्वेन घ्रा धातोः यङ् प्रत्यये घ्रा य इत्यवस्थायाम् **ई घ्राध्मोः** इति सूत्रेण ईत्वम् प्राप्तम्, किञ्च द्विर्वचनेऽचि इत्यत्र अचि पदाभावे ईत्वस्य निषेधात् घ्रा घ्रा इति द्वित्वे जेघ्रीयते इति रूपं न स्यात्। यदा सूत्रे अच् ग्रहणम् वर्तते तदा द्वित्वनिमित्तकाच् नास्ति यङि अच्त्वाभावात्। द्विर्वचनेऽचि सूत्रं न प्रवर्तते। अतः **ई घ्राध्मोः** सूत्रेण ईत्वम् भवति। तथा च ईत्वानन्तरं द्वित्वे कृते जेघ्रीयते देध्मीयते इति रूपसिद्धिः भवति।

ध्मा धातोः यङन्तस्य रूपं देध्मीयते वर्तते। अत्रापि **ई घ्राध्मोः**[2] सूत्रेण ईकारादेशो भवति। परिभाषायाः अभावे द्विर्वचनेऽचि इत्यत्र अच्ग्रहणेऽपि दोषसत्वात् परिभाषायाः आवश्यकत्वं वर्तते।तथा हि परिभाषाया अभावे उद्देश्यदल-प्रविष्टविषयतामात्रस्य निमित्ततापदेन ग्रहणात् यङन्ततदादित्वावच्छिन्नविषय-तारूपनिमित्ततायाः घ्रापर्याप्ताया घ्रा इत्यस्याकारे सत्त्वात् ई घ्राध्मोः इत्यत्र षष्ठ्यन्तपदं वीक्ष्यालोन्त्यस्य सूत्रस्योपस्थित्या अन्त्याल्त्वावच्छिन्नविषयतायाश्च पर्याप्त्यैवाकारे सत्त्वमिति द्वित्वनिमित्तताश्रयोऽच् आकारस्तत्पर्याप्ताल्त्वावच्छिन्नानिमित्तता तादृश-निमित्ततानिरूपकमीत्वं न स्यादिति नाज्ग्रहणस्य फलमिति भाष्यासङ्गतिः। परिभाषास्वीकारे तु घ्राशब्दस्य कार्यानुभवकर्तृत्वविशिष्टकार्यित्वात् निमित्तत्वाभावात् आकारे द्वित्वनिमित्तताया अभावादज्ग्रहणे न दोषः। अतः परिभाषा ध्वनितेति नागेशेनोक्तम्।

**निष्कर्षः-**

**कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते।** अस्यां परिभाषायां ज्ञापकं दीधीवेवीटामिति सूत्रं वर्तते।अन्यथा दीधीङ्, वेवीङ्धातू स्वयमेव ङित् विद्येते। अतः स्वयमेव **क्ङिति च**[3] सूत्रेण गुणनिषेधो भविष्यति। अतः सूत्रस्य किम्प्रयोजनम्

1. पाणिनिसूत्रम् 1.1.59
2. पाणिनिसूत्रम् 7.4.31
3. पाणिनिसूत्रम् 1.1.5

इत्युक्ते परिभाषेन्दुशेखरानुसारेण अध्येता, शयितेत्यादौ इङ्शीङोर्ङित्वात्गुणनिषेधवारणम् परिभाषायाः फलम् ज्ञेयम्। स्थण्डिलाच्छयितरीति निर्देशः ज्ञापकम्। लोकव्यवहारेऽपि समवायिकारणनिमित्तकारणयोर्भेदस्य सर्वत्र प्रसिद्धेन परिभाषैषा लोकन्यायसिद्धा , परिभाषास्थः हि शब्दः तदेव द्योतयति।

द्विर्वचनेऽचि सूत्रे भाष्ये अचि किम्, जेघ्रीयते, देध्मीयते इति भाष्यग्रन्थेन परिभाषैषा ध्वनितेत्यपि निरूपितम्।

✦✦✦

 ISSN : 0975-1769

# वेदान्तदर्शनस्य आधुनिकयुगे प्रासङ्गिकता

**के.मनोग्ना ***

**उपक्रमः**

प्रयोजनं विना न मन्दोऽपि प्रवर्तते इत्याभाणकमिव वैज्ञानिकेऽस्मिन्नाधुनिकयुगे यद्प्रायोगिकं सफलं च भवति तत्रैव प्रेक्षावतां निरन्तरा प्रवृत्तिर्दृश्यते। अतः मोक्षशास्त्राभिधानेन संकीर्त्यमानस्य वेदान्तशास्त्रस्यापि अद्यतनयुगे निःसंदेहं प्रासंगिकता वर्तते इति निरूपयितुं अस्य दर्शनस्य कानिचन लौकिकसंदर्भानुगुण्येन प्रयोजनान्यत्र प्रदर्श्यन्ते। ततः प्राक् वेदान्तदर्शनं नाम किमिति विचारयामः।

**वेदान्तदर्शनशास्त्रम्**

दृश्यते ज्ञायते यथार्थतत्त्वमनेन इति दर्शनम्। अर्थात् पारमार्थिकतत्त्वज्ञानस्य साधनभूतं यखवति तद्दर्शनमित्युच्यते। सम्प्रति भारतीयदर्शनानि आस्तिक-नास्तिककोटावन्तर्गतानि बहूनि समुपलभ्यन्ते। तत्र षडास्तिकदर्शनेषु अन्यतममस्ति वेदान्तदर्शनम्। वेदानामन्तिमः निर्णीतोऽर्थः वेदान्तः उपनिषत्प्रमाणमिति सुप्रसिद्धम्। दर्शनमिदं आत्मैकत्वप्रतिपत्तौ शिष्यान् शास्तीति हेतोः वेदान्तशास्त्रमित्यप्युच्यते। "अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते"[1] इति शांकरवचनेन स्पष्टं गम्यते यदस्य शास्त्रस्य परमं प्रयोजनमस्ति निरस्तसमस्त-दुःखपरमानन्दस्वरूपः परमपुरुषार्थः मोक्ष इति। "तरति शोकमात्मवित्"[2], "ब्रह्मविद् ब्रह्मैव भवति"[3] इत्यादिभ्यः श्रुतिभ्यः तात्त्विकमात्मज्ञानमेव मोक्षसाधनमिति गम्यते। तच्च आत्मज्ञानं वेदान्तैकगम्यमित्यस्माद्धेतोः वेदान्ताः आश्रयितव्याः।

---

* अतिथिप्राध्यापिका, अद्वैतवेदान्तविभागः, केन्द्रियसंस्कृतविश्वविद्यालयः वेदव्यासपरिसरः, हिमाचलप्रदेशः

1. शंकराचार्यः , ब्रह्मसूत्रभाष्यम् (2016), पृ.सं. 3, जगद्गुरु शङ्कराचार्य महासंस्थानम् श्रृङ्गेरी 577139
2. छान्दग्योपनिषद् (7.1.3)
3. मुण्डकोपनिषद् (3.2.9)

तर्हि किं मोक्षाख्यमेकमेव प्रयोजनमस्ति वास्य वेदान्तदर्शनस्य? एवं सति अमुमुक्षोरत्र प्रवृत्तिः कथम्? नैष दोषः, यतोहि परमप्रयोजनस्य मोक्षस्य प्राप्तिमार्गे वेदान्तस्य कानिचिदवान्तरप्रयोजनान्यपि सम्पत्स्यन्ते। तद्यथा –

## ♦ अध्ययनाध्यापनप्रक्रिया

छान्दग्योपनिषदि ''उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमति कथं नु भगवः स आदेशो भवतीति''[1] इत्येवं प्रकारेण एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविवक्षुः उद्दालकः श्वेतकेतोर्मनसि प्रश्नमाध्यमेन जिज्ञासाबीजं आवाप्य तं प्रेरयति यत् किं तत्तत्त्वं यस्य ज्ञानेन सर्वं विज्ञातं स्यादिति। तदनुरोधेनैव श्वेतकेतुरपि तदवबोद्धुं प्रयतते। अनेनावगन्तव्यं यत् अध्यापकः शिष्यबुद्धौ संदेहमुपस्थापयति चेद् तदाशष्यस्य जिज्ञासोदेति, येन सः स्वयमेव तदवगन्तुं प्रवृत्तिं दर्शयति, तया प्रवृत्त्या च सुष्ठु अर्थावबोधो तस्य जायते। यतोहि यत्र संदेहो न वर्तते, तदधिगमे न कस्यापि रुचिर्भवति न किमपि प्रयोजनम्। अपि च केनोपनिषदि "केनेषितं पतति प्रेषितं मनः। केन प्राणः प्रथमः प्रैति युक्तः। केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति''[2] इति यथा प्रश्नमुपस्थाप्य समाधत्तं ''श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति''[3] इति, तथैव अध्यापनकाले प्रश्नोत्तरमाध्यमेन विषयोपस्थापनं शिष्यबुद्ध्यारोहने सुलभत्वात् श्रेयस्करं भवतीत्यवगम्यते। किञ्च उद्दालकोपदेशेन विषयबोधनप्रकारः गम्यते यत् स्थूलात् सूक्ष्मं प्रति नेतव्यमिति स्थूलारुन्धतिन्यायवत्। साक्षात् सूक्ष्मविषयाध्यापनेन छात्रः नावगच्छेत। इत्येवं प्रकारेण अध्यापनप्रकाराः उपनिषत्सु बहुत्रोपलभ्यन्ते। अध्ययनं च श्रवणमनननिदि-ध्यासनादिमाध्यमेन कर्तव्यं तेन साफल्यमिति वेदान्तशास्त्रं बोधयति। आदौ "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्"[4] इति वेदान्तवचनानुसारं विषयं आचार्यमुखात् श्रुत्वा युक्त्यानुसंधानरूपमननेन तत्त्वं निश्चित्य निदिध्यासनेन तदैकमनस्केन भवितव्यम्। तदैव तत्साफल्यमेति।

## ♦ विशिष्टलिङ्गन्यायः

अद्यतनकाले विषयोऽयमतिगांभीर्यं भजते। कलावस्मिन् ग्रामादारभ्य नगरपर्यन्तं किमधिकं वक्तव्यं गृहेऽपि प्रतिक्षणं स्त्रीपुरुषयोर्मध्ये असमानतां ख्यापयन्ति जनाः।

---

1. छान्दग्योपनिषद् (6.14.2)
2. केनोपनिषद् (1.1)
3. केनोपनिषद् (1.2)
4. मुण्डकोपनिषद् (1.2.12)

वेदान्तस्तु तद्विपर्ययेन तयोर्समानत्वमेव अभिव्यनक्ति। तद्यथा बृहदारण्यकोपनिषत्स्थ याज्ञवल्क्यगार्गीसंवादे श्रूयते यत् महद्राज्यसभायां शास्त्रार्थं कर्तुं एका स्त्री वाचक्रवी गार्गी अपि अधिकारीरूपेण अभ्युपगता। इदमेव न, अपि च तया पृष्टानां प्रश्नानामपि समाधानं ब्रह्मविद् याज्ञवल्क्यः ददाति स्म। "आत्मनस्तु कामाय सर्वं प्रियं भवति"[1] इति याज्ञवल्क्यः स्वपीत्नं मैत्रेयीं प्रति आत्मविद्यामपि प्रोवाच। अर्थात परमपुरुषार्थसाधने आत्मज्ञाने पुरुषसम अधिकारः स्त्रीणामप्यस्ति। अनेन गम्यते यत् वेदान्ते सर्वदा विशिष्टलिङ्गन्यायः संरक्षितः। तदनुसारं लोकेऽपि आचरणीयम्। वस्तुतस्तु स्त्रीपुरुषयोर्भेदः औपाधिक एव, न तु पारमार्थिकः। परमार्थदृष्ट्या तु सर्वे ब्रह्मस्वरूपकाः इति "सर्वं खल्विदं ब्रह्म"[2], "ऐतदात्म्यमिदं सर्वं"[3], "नेह नानास्ति किश्चन्"[4] इत्यादिभ्यः वेदान्तवाक्येभ्यः सुष्ठु गम्यते।

### ♦ सदाचारोपदेशः

तैत्तिरीयोपनिषदि च –

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं माव्यनच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।।[5]

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि।।[6]

इत्यादिरूपेण पुरुषेभ्यः सदाचारोपदेशः श्रूयते। समाजे कथमाचरणीयमिति यस्य कस्यापि व्यक्तेर्हिताय अतिमहत्त्वपूर्णमस्ति, यदाधुनिकग्रन्थेषु विद्यालयेषु च नोपलभ्यते। अस्माद् कारणादपि वेदान्ताः अद्यतनकाले अपेषिता एव।

### ♦ विश्वैकता

सर्वेषु प्राणिषु आत्मभावनयायुतैकत्वदृष्टिसंपादनेन ईर्ष्याद्वेषघृणादिदोषाः मनसि न जायन्ते, तेन च तद्दोषकार्यभूतं दुःखमपि न जायते। तदेवोपदिष्टं ईशावास्योपनिषदि–

---

1. बृहदारण्यकोपनिषद (2.4.5)
2. छान्दग्योपनिषद (3.14.1)
3. छान्दग्योपनिषद (6.8.7)
4. बृहदारण्यकोपनिषद् (4.4.19)
5. तैत्तिरीयोपनिषद् (1.11.1)
6. तैत्तिरीयोपनिषद् (1.11.2)

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्यते।।[1]**
**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।।[2] इति ।।**
**अनेन विश्वैकताभावेन विश्वशान्तिरपि सिद्ध्यति।**

- **आत्मशान्तिः**

**आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।**
**तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी।।[3]**
**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।।[4]**

यथाखिः पूर्णं अचलप्रतिष्ठं समुद्रं सर्वतोगतः आपः प्रविशन्ति स्वात्मस्थं अविक्रियमेव सन्तं, तद्वत् कामाः भोगाः यं पुरुषं समुद्रमिव आपः अविकुर्वन्तः प्रविशन्ति आत्मनि एव प्रलीयन्ते न स्वात्मवशं कुर्वन्ति, स पुरुषः एव शान्तिमाप्नोति नेतरः कामकामी कामैर्वशीकृतः। यस्मादेवं तस्मात् सर्वान् कामान् त्यक्त्वा निःस्पृहाभावेन ममेदमिति अभिमानवर्जितः निरहङ्कारः पुरुषः सर्वसंसारदुःखोपरमलक्षणां शान्तिमधिगच्छति इत्येवं प्रकारेण शान्तिप्राप्तिमार्गमपि दर्शयति वेदान्तः।

इत्थं आधुनिकयुगे वेदान्तदर्शनस्य सप्रयोजनत्वनिरूपणेन प्रासंगिकता निरूपिता।

## सहायकग्रन्थसूची

1. शंकराचार्यः, ब्रह्मसूत्रभाष्यम् (2016), जगद्गुरु शङ्कराचार्य महासंस्थानम् श्रृङ्गेरी 577139
2. छान्दग्योपनिषद्, गीताप्रेस, गोरखपुर
3. मुण्डकोपनिषद् , गीताप्रेस, गोरखपुर
4. केनोपनिषद्, गीताप्रेस, गोरखपुर
5. बृहदारण्यकोपनिषद्, गीताप्रेस, गोरखपुर
6. तैत्तिरीयोपनिषद्, गीताप्रेस, गोरखपुर
7. ईशावास्योपनिषद्, गीताप्रेस, गोरखपुर
8. श्रीमखगवद्गीता, गीताप्रेस, गोरखपुर

---

1. ईशावास्योपनिषद् (6)
2. ईशावास्योपनिषट् (7)
3. श्रीमखगवद्गीता (2.70)
4. श्रीमखगवद्गीता (2.71)

 ISSN : 0975-1769

# मोक्षसाधनविचारः

**डॉ. जि. नरसिंहुलु***

आधिव्याधिपरिपीडितः जराजन्ममरणादिदुःखदावाग्निदग्धः क्लेशायासविषण्णः जीवः निरतिशयानन्दावाप्तये मोक्षाधिगमाय त्रिविधतापविनाशाय मोहापहाराय च जगच्छरण्यं शुद्धबुद्धमुक्तस्वभावं जगदीश्वरं समाश्रयते। जगदीश्वरो वेदान्तमते ब्रह्मेत्याख्यायते।

एवं चास्य ब्रह्मणः स्वरूपम् उपनिषत्सु बहुधा प्रतिपाद्यते। तद्यथा-

**एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।**
**कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता निर्गुणो निष्क्रियश्च॥**[1]

**अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रुणोत्यकर्णः।**
**स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्॥**[2]

**य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः।**
**तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते॥**

**तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन।**
**एतद् वै तत्॥**[3]

**तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्, अयमात्मा ब्रह्म सर्वानुभूः।**[4]
**सत्यं ज्ञानमनन्तं ब्रह्म**[5] इत्यादि।

तथा चायं जीवः ब्रह्मज्ञानादेव निरतिशयानन्दरूपं मोक्षमधिगच्छति इत्यपि श्रुतिस्मृतिषु जोघुष्यते। तद्यथा-

---

* सहायकाचार्यः, अद्वैतवेदान्तः, केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला
1. श्वेताश्वेतरोपनिषद्- 6.11
2. श्वेताश्वेतरोपनिषद्- 3.19
3. कठोपनिषद्- 2.8
4. बृहदारण्यकोपनिषद्-2.5.19
5. तैत्तरीयोपनिषत्

**तरतिशोकमात्मवित्**[1], **ब्रह्म वेद ब्रह्मैव भवति**[2], **ज्ञानादेव तु कैवल्यम्** इति।

अत्र केचन ज्ञानकर्मसमुच्चयेन मोक्ष इति प्रत्यवतिष्ठन्ते। तानुद्दिश्य भगवत्पादाः श्री शङ्कराचार्याः ईशावास्योपनिषद्भाष्ये याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्व-नित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम्। तच्च कर्मणा विरुध्यते। नह्येवं लक्षणात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्।

सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैव उपक्षयात्। इति प्रतिपाद्य ज्ञानकर्मणो-र्विरोधं पर्वतवदकम्प्यमित्यूचुः।

परमपुरुषार्थरूपः मोक्षः ज्ञानैकसाध्य इति वेदान्तेषु बहुत्र प्रतिपादितम्। तद्यथा- **तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**[3], **अभयं जनक प्राप्तोऽसि**[4], **तदात्मानमेव वेदाहं ब्रह्मास्मि।**[5] इति।

**शिवगीतायाम्-**

> **न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा।**
> **कैवल्यं लभते मर्त्यः किंतु ज्ञानेन केवलम्।।** (शिवगीता.1.2)

विवेकचूडामणावपि भगवत्पादैः प्रतिपादितं यत्-

> **वदन्तु शास्त्राणि यजन्तु देवान् कुर्वन्तु कर्माणि भजन्तु देवताः।**
> **आत्मैक्यबोधेन विना विमुक्तिर्न सिध्यति ब्रह्मशतान्तरेऽपि।।**
> **न योगेन न सांख्येन कर्मणा नो न विद्यया।**
> **ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा।।**[6] इति।

तथा च एवंविधात्मज्ञानेन कर्मनाशोऽपि दर्शितः तद्यथा-

> **भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
> **क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।**[7]

> **सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।** (भ.गी.4.33)

---

1. छान्दोग्योपनिषत्-1.1.3
2. मुण्डकोपनिषत्-3.2.9
3. श्वोताश्वतरोपनिषत्-3.8
4. बृहदारण्यकोपनिषत्-4.2.4
5. बृहदारण्यकोपनिषत्-1.4.10
6. विवेकचूडामणिः- 6,56
7. मुण्डकोपनिषत्-2.2.8

**यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।**
**ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।।** (भ.गी. 4.37)

विवेकचूडामणौ मोक्षसाधनसामग्रीविषये इत्थमुदीरितं यत्-

**मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी।**
**स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते।।**[1] इति।

श्लोकेऽस्मिन् स्वस्वरूपानुसन्धानमेव भक्तिः। एवंरूपा भक्तिरेव मोक्षसाधनेषु महत्त्वं भजत इति प्रतिपाद्य केवलोपासनया मोक्ष इति मतं निराकुर्वन्।

इत्थं वेदान्तशास्त्रे साक्षात् मोक्षसाधनं ज्ञानमेवेति प्रतिपाद्य तत्त्वज्ञानसाधनानि श्रवणमनननिदिध्यासनानि इति प्रतिपादितम्। तद्यथा-

**अविचारकृतो बन्धो विचारेण निवर्तते।**
**तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत्।।**[2]

ननु कर्मणैव हि संसिद्धिमास्थिता जनकादयः इति स्मृतेः मोक्षस्य कर्मसाधनत्वावगमात् किमनेन विचारजनितज्ञानेनेत्यत आह- अविचारेति। विचार-प्रागभावोपलक्षिताज्ञानकृतस्य बन्धस्य न विचारजन्यज्ञानादन्यतो निवृत्तिरुपपद्यते। उदाहृतस्मृतौ च संसिद्धिशब्देन चित्तशुद्धिरेवाभिधीयते। न मोक्ष इति भावः। विचारेण बन्धनिवृत्तिरुक्ता। अतः तत्त्वसाक्षात्कारपर्यन्तं सर्वदा आत्मविचारं कुर्यादित्यर्थः।

**विवेकचूडामणौ-**

**चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये।**
**वस्तुसिद्धिर्विचारेण न किञ्चित्कर्मकोटिभिः।।**[3] इति प्रतिपादितम्।

तर्हि कर्मोपासनानां किं फलमिति चेदुक्तम्-

**कर्माणि चित्तशुध्यर्थमैकाग्र्यर्थमुपासना।**
**मोक्षार्थं ब्रह्मविज्ञानम् इति वेदान्तडिंडिमः।।**[4] इति।

वेदान्तसारे नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिल-कल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसंपन्नः प्रमाता वेदान्तशास्त्रे अधिकारीत्युक्त्वा नित्यादीनां

---

1. विवेकचूडामणिः- 32
2. पञ्चदशी.ना.दी.प्र.5
3. विवेकचूडामणिः- 11
4. वेदान्तडिण्डिमः-26

कर्मणां बुद्धिशुद्धिः परं प्रयोजनम्, उपासनानां तु चित्तैकाग्र्यम् इति प्रत्यपादयत्।

**वेदान्तपरिभाषायाम्**- श्रवणादिषु च मुमुक्षूणामधिकारः, काम्ये कर्मणि फलकामस्याधिकारित्वात्। मुमुक्षायां च नित्यानित्यवस्तुविवेकस्येहामुत्रार्थफल-भोगविरागस्य शमदमोपरतितितिक्षा समाधानश्रद्धानां च विनियोग इति प्रत्यपादि। श्रुतावपि आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः इति मुमुक्षोः श्रवणमनननिदिध्यासनानि उपदिश्यन्ते। अतो इदानीं श्रवणमनननिदिध्यासनानि व्याख्यायन्ते।

**श्रवणम्**-

**वेदान्तानामशेषाणामादिमध्यावसानतः।**
**ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत्॥**[1]

सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यमिदं पारम्पर्येण पर्यवसानमित्येवंरूपो निश्चयः श्रवणमित्यर्थः।

**मननम्**-

**युक्त्या संभावितत्वानुसंधानं मननं तु तत्।**[2]

मननं नाम शब्दावतारितेऽर्थे मानान्तरविरोधशंकायां तन्निराकरणानुकूल-तर्कात्मज्ञानजनको मनसो व्यापारः इति वेदान्तपरिभाषा।

**निदिध्यासनम्**-

अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयक-स्थैर्यानुकूलो मनसो व्यापारः। इति वेदान्तपरिभाषा।

**ताभ्यां निर्विचिकित्सेऽर्थे चेतसःस्थापितस्य यत्।**
**एकतानात्वमेतद्धि निदिध्यासनमुच्यते॥**[3]

ताभ्यां श्रवणमननाभ्यां निर्विचिकित्से निर्गता चिकित्सा संशयो यस्मादसौ निर्विचिकित्सः तस्मिन्नर्थे विषये स्थापितस्य धारणावतश्चेतसः देशबन्धश्चित्तस्य धारणा इति पतञ्जलिनोक्तत्वाद्यदेकतानत्वम् एकाकारवृत्तिप्रवाहत्वं एतन्निदिध्यासनम्। इत्थं श्रवणमनननिदिध्यासनानि ज्ञानसाधनानि निरूपितानि।

1. पञ्चदशी.त.वि.प्र.53
2. पञ्चदशी.त.वि.प्र.53
3. पञ्चदशी.त.वि.प्र.54

**साधनचुष्टयम्-**

1. **नित्यानित्यवस्तुविवेकः-** ब्रह्मैव नित्यं वस्तु ततो अन्यदखिलमनित्यमिति विवेचनम्।

2. **इहामुत्रार्थफलभोगविरागः-** ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणामपि अमृतादिविषयभोगानां कर्मजन्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोग विरागः।

3. **शमादिषट्कसम्पत्तिः- शमः-** शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेऽभ्यो मनसो निग्रहः। अत्र मोक्षसाधनेषु मनोनिग्रहः मुख्यं साधनं भवति, यतोहि-

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्।।**[1]

भगवता पतञ्जलिनापि योगशास्त्रप्रारम्भ एव योगश्चित्तवृत्तिनिरोधः इति प्रत्यपादि।

**अपिचोक्तं पञ्चदश्याम्-**

**यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिश्रिताः।**
**इति श्रौतं फलं दृष्टं नेति चेद्दृष्टमेव तत्।।**[2] (पंचदशी.चि.दी.प्र.59)

अथ मर्त्योऽमृतोभवत्यत्र ब्रह्म समश्नुते इति अस्य मन्त्रस्योत्तरार्धम्। अस्य मुमुक्षोर्हृदि श्रिता ये कामास्तादात्म्याध्यासमूला इच्छादयः सन्ति ते सर्वे यदा यस्मिन्काले प्रमुच्यन्ते तत्त्वज्ञानेनाध्यासनिवृत्तौ निवर्तन्ते, अथ तदानीमेव मर्त्यः पूर्वदेहतादात्माध्यासेन मरणशीलः पुरुषः अमृतः अध्यासाभावेन तद्रहितो भवति। तत्र हेतुमाह- अत्र ब्रह्म समश्नुते इति।

**दमः-** बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेऽभ्यो निवर्तनम्।

श्रोत्रादीनीन्द्रियाणि सर्वदैव शब्दादीन् बाह्यविषयान् अपेक्षन्ते। उक्तं च

**कठोपनिषदि-**

**पराञ्चिखानि व्यतृणत्स्वयंभूः तस्मात्पराङ्पश्यति नान्तरात्मन्।**
**कश्चिद्धीरः प्रत्यगात्मानमैक्षत् व्यावृत्तचक्षुरमृतत्वमिच्छन्।।**[3]

एवं च लोकेऽस्मिन् केचन प्राणिनः शब्दस्पर्शरूपरसगन्धादिविषयेषु एकैकमपि विषयं प्राप्य स्वकीयजीवनमेव समर्पयन्ति तर्हि पञ्चविषयेष्वपि दत्तचित्तेन्द्रियस्य मनुजस्य का गतिर्भवेदिति विवेकचूडामणौ आचार्याः शंकरभगवत्पादाः स्वाशयं प्रकाशयन्ति। तद्यथा-

---

1. पञ्चदशी.ब्र.प्र.17
2. पंचदशी.चि.दी.प्र.59
3. कठोपनिषद्-2.4.1

**शब्दादिभिरेव पञ्च पञ्चत्वमापुः स्वगुणेन बद्धाः।**
**कुरङ्गमातङ्गपतंगमीनभृङ्गाः नरःपञ्चभिरञ्चितः किम्।।**[1] इति।

भगवद्गीतायां भगवता वासुदेवेनापि प्रोक्तं यत् -

**इन्द्रियाणि प्रमाथीणि हरन्ति प्रसभं मनः।** (भ.गी.2.60) इति।

अनेनावगम्यते यत् आत्मकामस्य इन्द्रियनिग्रहः अत्यावश्यक इति। प्रतिपादितं च कठोपनिषदि-

**यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा।**
**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः।।**[2]

**श्रीमद्भगवद्गीतायाम्-**

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता।।** (भ.गी.2.58)

**उपरतिः**- विक्षेपाभाव उपरतिः। निगृहीतानामेतेषाम् इन्द्रियाणां श्रवणादि-व्यतिरिक्तविषयेभ्यो उपरमणं उपरतिः।

**तितिक्षा**- शीतोष्णादिद्वन्द्वसहिष्णुता। तितिक्षायाः विषये गीतायाम् इत्थमुक्तं भगवता-

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत।।** (भ.गी.2.14)

मात्राः अभिः मीयन्ते शब्दादः इति श्रोत्रादीनि इन्द्रियाणि। मात्राणां स्पर्शाः शब्दादिभिः संयोगाः। ते शीतोष्णसुखदुःखदाः शीतम् उष्णम् सुखं दुःखं च प्रयच्छन्तीति। अथवा स्पृश्यन्ते इति स्पर्शाः विषयाः शब्दादयः मात्राश्च स्पर्शाः शीतोष्णसुखदुःखदाः। शीतं कदाचित् सुखं कदाचित् दुःखम्। तथा उष्णमपि अनियतस्वरूपम्। सुखदुःखे पुनः नियतरूपे यतो न व्यभिचरतः। अतः ताभ्यां पृथक् शीतोष्णयोः ग्रहणम्। यस्मात् ते मात्रास्पर्शादयः आगमापायिनः आगमापायशीलाः तस्मात् अनित्याः। अतः तान् शीतोष्णादीन् तितिक्षस्व प्रसहस्व। तेषु हर्षं विषादं वा मा कार्षीः इत्यर्थः। इति भाष्यम्।

एवं च भगवान् श्रीकृष्णः द्वादशाध्याये भक्तियोगे तितिक्षा नाम कीदृशी

---

1. विवेकचूडामणिः-78
2. कठोपनिषद्-1.3.6

स्यादिति प्रतिपाद्य एतादृशगुणसम्पन्नः भक्तिमान् नरः मम प्रियो भवतीत्यवोचत्। तद्यथा–

**समः शत्रौ च मित्रे च तथा मानापमानयोः।**
**शीतोष्णसुखदुःखेषु समस्संगविवर्जितः॥** (भ.गी.12.18)

**तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।**
**अनिकेतःस्थिरमतिः भक्तिमान्मे प्रियो नरः॥** इति।(भ.गी.12.19)

**श्रद्धा**–शास्त्रगुरुवाक्येषु विश्वासः श्रद्धा।

**समाधानम्**– निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्।

**शनैःशनैरुपरमेद्बुद्ध्या धृतिगृहीतया।**
**आत्मसंस्थं मनःकृत्वा न किंचिदपि चिन्तयेत्॥** (भ.गी.6.25)

धृतिगृहीतया धैर्ययुक्तया बुद्ध्या साधनभूतया शनैर्न सहसा उपरमेत् ,मनः उपरतिं न कुर्यात्। कियत्पर्यन्तमित्यत आह आत्मेति। मनःआत्मसंस्थम् आत्मनि संस्था सम्यक् स्थितिः आत्मैवेदं सर्वं न ततोऽन्यत्किञ्चिदस्ति इत्येवं रूपा यस्य तदात्मसंस्थं तथाविधं कृत्वा किञ्चिदपि न चिन्तयेद्, एषः योगस्य परमोऽवधिः।

**यत्रोपरमते चित्तं निरुद्धं योगसेवया।**
**यत्रचैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥** (भ.गी.6.20)

चित्तं यत्र यस्मिन् काले योगसेवया योगानुष्ठानेन सर्वस्माद्विषयात् निवारितं सदुपरमते उपरतिं गच्छति। किञ्च यस्मिन् काले आत्मना समाधिपरिशुद्धेनान्तः–करणेनात्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नुपलभ्यमानः स्वस्मिन्नेव तुष्यति तुष्टिं भजते न विषयेष्वित्यर्थः।

एवमयं साधकः शमाद्यैः श्रवणाद्यैश्च साधनैः तत्त्वज्ञानमश्नुते। उक्तं च पञ्चदश्याम्–

**शमाद्यैः श्रवणादैश्च तत्र तत्रोचितैः क्षयम्।**
**नीतेऽस्मिन्प्रतिबन्धेऽतःस्वस्य ब्रह्मत्वमश्नुते॥**[1]

शमाद्यैः शमादयः शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा इति श्रुत्युक्ताः, श्रवणादयः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति श्रुत्यभिहिताः, एतैः साधनैः तत्र

1. पञ्चदशी.ध्या.दी.प्र.44

तत्र तस्य तस्य प्रतिबन्धस्य निवर्तने उचितैः योग्यैः तस्मिन् तस्मिन्प्रतिबन्धे क्षये नीते सति विनाशिते सति, अतः प्रतिबन्धापगमादेव स्वस्य प्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः।

**सन्दर्भग्रन्थसूची-**

1. वेदान्तसारः (व्याख्या-डॉ. कृष्णकान्त त्रिपाठी) भारतीय प्रकाशन चौक, कानपुर
2. वेदान्तपरिभाषा (श्रीगजाननशास्त्री मुसलगांवकर) चौखम्बा विद्याभवन, वाराणसी-2006
3. पञ्चदशी, चौखम्बा विद्याभवन, वाराणसी-2008
4. ईशादि नौ उपनिषद् (शाङ्करभाष्यार्थ) गीताप्रेस्, गोरखपुर- वि.संवत्-2073
5. ब्रह्मसूत्रशाङ्करभाष्यम् (व्याख्या-श्रीहनुमान दासजी षट्शास्त्री चौखम्बा विद्याभवन, वाराणसी-2017
6. सिद्धान्तलेशसंग्रहः(श्रीमूलशङ्करव्यासः) चौखम्बा विद्याभवन, वाराणसी-2017
7. तत्त्वप्रदीपिका, चौखम्बा विद्याभवन,वाराणसी- 2015
8. अद्वैत वेदान्त(डॉण्राममूर्ति शर्मा) ईस्टर्न बुक लिंकर्स,दिल्ली- 1998
9. शाङ्करवेदान्तकोशः (डॉ. मुकलीधरपाण्डेयः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वारणसी-1998
10. छान्दोग्योपनिषत्, गीताप्रेस, गोरखपुर, उत्तर प्रदेश
11. बृहदारण्यकोपनिषद्, गीताप्रेस्, गोरखपुर, उत्तरप्रदेश
12. विवेकचूडामणिः, गीताप्रेस, गोरखपुर, उत्तरप्रदेश-वि.संवत् 2065
13. वेदान्तडिण्डिमः, अध्यात्मप्रकाशकार्यालयः, होलेनरसिंपुरः, कर्णाटक- 2002
14. श्रीमद्भगवद्गीता, गीताप्रेस्, गोरखपुर, उत्तरप्रदेश

✦✦✦

 ISSN : 0975-1769

# "एजाद्योः किम्? प्रेदिधत् इत्यत्र नागेशकृतखण्डनस्य औचित्यानुशीलनम्

शम्भुनाथ भट्टः*

लेखेऽस्मिन् नागेशोपाध्यायकृतखण्डनम् अत्र युक्तं नास्तीति प्रतिपादितम्। नागेशेन याः युक्तयः प्रदर्शिताः ताः कथमयुक्ताः। प्राचीनैः दीक्षितादिभिः यत्प्रतिपादितं तदेव युक्तमिति च प्रपञ्चितम्। प्रेदिधत् इति रूपस्य अनभिधानकथनं कुतः युक्तं नेति च व्याख्यातम्। पक्षद्वयस्यापि युक्तयः। तत्र प्राबल्यविचारश्च कृतः।

## कौमुद्यां विचारोपक्रमः

पाणिनीये सूत्रजाले "एत्येधत्यूठ्सु"[1] इति वृद्धिविधायकं सूत्रम्। वैयाकरणसिद्धान्तकौमुद्यां भट्टोजीदीक्षितैः अच्सन्धिप्रकरणे व्याख्यातम्। तत्र अवर्णादेजाद्योः एत्येधत्योः ऊठि च परे वृद्धिः एकादेशः स्यात् इत्युक्तम्। "वृद्धिरेचि"[2] इत्यस्मात् पदद्वयमपि अनुवर्तते। एतिश्च एधतिश्च इति श्तिपा निर्देशः। एचि इति एत्येधत्योः उभयोः विशेषणम्। अतः उपैति। उपैधते इति उदाहृत्य एजाद्योः किम् उपेतः। मा भवान् प्रेदिधत् इति प्रत्युदाहरणं दत्तम्।

इण्धातोः एध्धातोः एजादित्वं यदा तदैव सूत्रमिदं वृद्धिं विधत्ते। यदि एजाद्योः इत्यर्थः न स्यात् तर्हि उपेतः। प्रेदिधत् इत्यत्रापि वृद्धिः स्यादिति प्रत्युदाहरणं प्रदर्शितम्। तत्र प्रोपसर्गपूर्वक-एध्धातोः णिजन्ताल्लुङि चङि 'णौ चङ्युपधाया ह्रस्वः'[3] इति उपधाह्रस्वे 'चङि'[4] इति द्वित्वे प्र इ धि धि अ ति इति जाते अभ्यासस्य जश्त्वे णिलोपे इतश्च लोपे प्र इ दि ध् अ त् इति जाते 'आद्गुणः'[5] इति गुणे 'प्रेदिधत्' इति रूपम्। अत्र एधतेः एजादित्वाभावेन एचीति विशेषणत्वे एव वृद्धिः वार्यते। तदभावे तु वृद्धिः स्यादेव। माङ्योगसत्वेन आटश्च इति वृद्धिः न शङ्क्या। "न माङ्योगे"[6] इति आट एव निषेधात्।

---

* शोधच्छात्रः जे.आर.एफ./एस.आर.एफ, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

**नागेशोपाध्यायाशयः**

नागेशोपाध्यायैः तावत् 'प्रेदिधत्' इति अवतार्य "परे तु"[1] इति आरब्धम्। तदभिप्रायस्तु एचि इति एधतेः न विशेषणम्। अतः प्रत्युदाहरणम् न युज्यते। प्रेदिधत् इत्यादीनामनभिधानमेव इति। एतैः प्राचां मतमेव आश्रित्य दीक्षितमतं खण्डितम्। प्राचां त्वाशयः एचीति एतेरेव विशेषणम्। न तु एधतेः अव्यभिचारात्। "संभवव्यभिचाराभ्यां हि स्यात् विशेषणमर्थवत्" इति आश्रितत्वात्। न हि एधधातोः एजाद्यतिरिक्तं रूपं सम्भवति। ऊठ् विषयेऽपि नापेक्षते असंभवात्।

तत्र असम्भवादिति न उचितमिति शङ्का। यतोऽहि जनौः इत्यत्र जनशब्दात् आङ् उपसर्गपूर्वक-अवधातोः क्विपि 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च'[2] च ऊठि आ ऊ इति स्थिते गुणे ओ इति जाते परादिवद्भावेन ऊठ्त्वम् कृतैकादेशे आनीयताम्। तदा एजादिः ऊठ् सम्भवति। तत्रैव अनेन वृद्धिः स्यात्। न तु विश्वौहः इत्यादौ। अतः लक्ष्यासिद्धरूपदोषेण "औः" इत्यादेः अनभिधानमेव आश्रीयते।

**मनोरमायां प्रस्तुतविचारसरणिः**

तत्र मनोरमायां प्राचां मतमुक्त्वा "अत्र कैयटः"[3] इति कैयटाशयः उक्तः। एधतेरपि एचीति विशेषणम्। "मा भवान् प्रेदिधत्" इत्यत्र व्यभिचारात्। यदा 'णौ चङ्युपधाया ह्रस्व'[4] इति ह्रस्वे कृते नायमेधतिः इति शङ्कितम्। एकदेशविकृतन्यायेन परिहृतञ्च। तत्र धिशब्दस्य द्वित्वे धिधि इति यदा भवति तदा वस्नसोरिव प्रकृतिप्रत्ययविभागसम्मोहो भवतीत्यतः एधतेः ज्ञानं न स्यादिति। एषापि शङ्का न तिष्ठति। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति द्विरुच्चारणमेव आश्रीयते इति कृत्वा न सम्मोहः। यदि प्रकृतिप्रत्ययविभागे सम्मोहः तर्हि णिलोपोपि न स्यादिति च। तत्र अन्तरङ्गत्वात् पूर्वोपस्थितनिमित्तकत्वेन आदौ "चङि"[5] इति द्वित्वे ह्रस्व एव न स्यादिति शङ्का। ओणेः ऋदित्करणेन बहिरङ्गस्यापि "णौ चङ्युपधाया ह्रस्वः"[6] इति ह्रस्वस्य आदौ प्रवृत्तिः स्वीक्रियते इति न दोषः।

**माधवकृताशङ्का**

एवं कैयटेन साधितेऽपि माधवः आक्षिपति। माधवस्यायमाशयः[7] - एध्धातुना ण्यन्तधातोः ग्रहणं शब्दान्तरत्वात् न भवति। अतः मा भवान् प्रेदिधत् इत्यत्र अतिव्याप्तिरपि नास्ति। ण्यन्तस्य शब्दान्तरत्वात् ग्रहणं न भवति इत्यत्र प्रमाणमपि प्रदर्शयति। "न भाभूपूकमिगमिप्यायीवेपाम्"[8] इत्यत्र "ण्यन्तस्य चोपसंख्यानम्"[9] इति वार्तिकमुक्तम्। कैयटन्यासकारहरदत्तादिभिः सर्वैरपि शब्दान्तरत्वादप्राप्तौ इदमुपसंख्यानमिति व्याख्यातम्। यदि धातुना ण्यधिकस्यापि ग्रहणं स्यात् तर्हि

इदमुपसंख्यानं व्यर्थं स्यात्। किञ्च "उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्था-सेनयसेधसिचसञ्जस्वञ्जाम्"[3] इत्यत्र अभिषावयति इति उदाहृत्य सावयति इति ण्यन्तेन अभेःयोगो वर्तते। न तु सुनोतिं प्रति इति कथं षत्वमिति शङ्कितम्। प्रकृत्यर्थविशेषकत्वेन च समाधानं दत्तम्। इदं शङ्कासमाधानं न युज्यते यदि धातुना ण्यन्तस्यापि ग्रहणं स्यात्।

'प्रकृतिग्रहणे ण्यन्तस्यापि ग्रहणं स्यात्' "हेरचङि"[4] इति लिङ्गात् इति न भ्रमितव्यम्। तत्तु ज्ञापकं कुत्वविषये एव। यतो हि अभ्यासात् परस्य हिनोतेर्हस्य कुत्वं स्यात् न तु चङि इत्यर्थकं हेरचङि इति सूत्रम्। तत्र चङि कुत्वं न भवेदिति अचङि इति प्रतिषेधः। ण्यन्तस्य धात्वन्तरत्वात् केवलस्य हिनुधातोस्तु चङ्प्रत्ययो न भवतीति अचङीति निषेधः व्यर्थः। स व्यर्थः सन् ज्ञापयति ण्यधिकस्यापि ग्रहणं भवतीति। इदानीं ण्यन्ताच्चङि प्राप्तं कुत्वं बाधितुमचङीति प्रतिषेधः चरितार्थः। इदं ज्ञापकं कुत्वविषये एव इति नात्र तत्प्रसक्तिः। एवं च कैयटाशयः न युक्तः इति माधवाशयः।

## दीक्षितैः कैयटाशयसमर्थनम्

परं तु दीक्षिताः कैयटाशयमेव समर्थयन्ते।[5] पूर्वं माधवकृताशङ्कायां यदुक्तं ण्यन्तस्य शब्दान्तरत्वात् एधतिग्रहणेन न ग्रहणमिति। तदङ्गीकृत्यैवोच्यते शब्दान्तरत्वमस्ति चेदपि प्रकृतेः एध्रूपत्वमाश्रित्य सूत्रप्रवृत्तिरिश्यते इति। एध्रूपत्वं प्रकृतेराश्रित्यैव एत्येधत्यूठ्सु इति प्रवर्तते। उपैधते इत्यत्र तिङन्ते एध्रूपत्वं नास्ति चेदपि प्रकृतेस्तदस्तीति वृद्धिर्भवति। प्रकृतेः ग्रहणं कार्यमित्यत्र किं प्रमाणमिति शङ्कायामुच्यते "उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्ज-स्वञ्जाम्"[1] इति सूत्रे पठितं वार्तिकम्। तथा हि "सिद्धं त्ववयवानन्यत्वात्"[2] इति वार्तिकं तत्र। "सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानमधिकत्वात्"[3] इति वार्तिके अभिषावयति इत्यादौ षत्वार्थं ण्यन्तस्य उपसंख्यानं कर्तव्यम्। कुतो न भवति इत्यत्र हेतुरुक्तः अधिकत्वादिति। ण्यन्ते प्रयोजकस्य प्राधान्यात् तत्रैव अभेः उपसर्गत्वात् सूत्रोक्तसुनोतेरपेक्षया व्यतिरिक्तस्य ण्यन्तार्थस्य सत्वात् षत्वं न स्यादिति। तत्र समाधानवार्तिकम् – "न वा अवयवस्य अनन्यत्वात्"[4] इति। ण्यन्तस्य उपसंख्यानं न वा कार्यम् अवयवस्य अनन्यत्वात् इति तदर्थः। ण्यन्तधातोः योऽवयवो भवति शुद्धधातुः तन्निरूपितोपसर्गत्वमस्ति इति कृत्वा षत्वं भवत्येव इत्युक्तम्। अभिषुणोति यः। तं प्रेरयति अभिषावयति। एवञ्चात्र ण्यन्तप्रकृतेः कार्यं भवति।

पूर्वपक्षिणा "न भाभूपूकमिगमिप्यायीवेपाम्"[5] इति सूत्रस्य वार्तिकं हेतुत्वेन उक्तं ण्यन्तग्रहणे प्रकृतेर्ग्रहणं न भवतीत्यत्र। परं स हेतुः अत्र साधको न भवति।

यतो हि यथा प्रभवनमित्यत्र णत्वं न भवति तथा परिभापनम् इत्यत्रापि णत्वं न भवति। तदर्थं तत्र ण्यन्तस्योपसंख्यानमित्युक्तम्। न भाभू इत्यादिना सूत्रेण एभ्यः परस्य कृतः नकारस्य णत्वनिषेधः उच्यते। प्रकृतेः ग्रहणं भवति चेदपि णिचः व्यवधानात् तत्र निषेधः न भवति। अतः वार्तिकमपेक्षितम्। एवं च कैयटखण्डनपरः माधवग्रन्थः न युक्तियुक्तः प्रमाणविरुद्धश्च।

एवं कैयटमतं समुपस्थापयन्तः दीक्षिताः कौमुद्याम् एत्येधत्यूठ्सु इति सूत्रव्याख्यानावसरे एत्येधत्योः उभयोः विशेषणत्वेन एचि इति अन्वेति इति कृत्वा एजाद्योः इति अवोचुः। अथापि नागेशोपाध्यायाः इदं खण्डयन्ति।[1] तेषामयमाशयः ख्र एत्येधत्यूठ्सु इत्यत्र भाष्ये "इणिकारादौ प्रतिषेधः"[2] इति वार्तिकं प्रमाणम्। तत्र एधतेः उपादानं नास्ति। वृत्तिकाराणां ग्रन्थोऽपि तदुपोद्बलक एव। तद्वार्तिकप्रत्याख्यानार्थं भाष्याकारैः यः योगविभागः कृतः "एत्यधत्योः"[3] इति तत्र एधतिग्रहणं सम्भवमात्रेण उपरञ्जकतया विशेषणम् इति मन्यन्ते।

## नागेशकृतखण्डनस्यौचित्यानुशीलनम्

इदानीमस्माभिः विचार्यते किं नागेशकृतखण्डने औचित्यमस्तीति। वृत्तिग्रन्थः माधवग्रन्थश्च सयुक्ति एव दीक्षितैः निराकृतः इति तस्य उपोद्बलकत्वेन आश्रयणं न युक्तम्। स्वनिरूपिते उपबृंहणमिष्यत एव इति यद्युच्यते तर्हि स एव युक्तः इत्यत्र प्रमाणं नास्ति। तथा च एत्येधत्यूठ्सु इत्यत्र भाष्ये[4] एत्येधत्योः विषये रूपग्रहणं कार्यमुत धातुग्रहणमिति विचारितम्। अयमाशयः - यदि एति इति रूपबोधकं तर्हि उपैति। प्रैति इत्यादौ वृद्धिः स्यात्। परं तु उपैषि। उपैमि इत्यत्र न स्यात्। एधति इति तावत् रूपग्रहणं भवितुमेव नार्हति। एधते इत्याद्याः आत्मनेपदप्रत्ययाः भवन्ति एध्धातोः। तत्साहचर्याच्च एति इत्यत्रापि धातुग्रहणमेव इति निश्चितम्। रूपग्रहणपक्षस्तु लाधवात् एति इत्यत्र सम्भवात् उपन्यस्तः। यदि धातुग्रहणमिति तर्हि उपेतः प्रेतः इत्यत्रापि वृद्धिः प्राप्नोति इति आक्षेपे इदं वार्तिकम् - "इणीकारादौ प्रतिषेधः"[1] इति। इकारादेः इण्धातोः इतः। यन्ति इत्यादौ वृद्धिः न भवति इति तदर्थः। "योगविभागात्सिद्धम्"[2] इति तत्रैव अग्रे भाष्यवार्तिकेनोक्तम्। 'वृद्धिरेचि' ततः "एत्येधत्योः" इति पठ्यते। एचि इति अनुवर्तते। एत्येधत्योश्च एचि वृद्धिर्भवति। ततः 'ऊठि' ऊठि च वृद्धिर्भवतीति। अत्र भाष्यकारैः एचि इति एत्येधत्योः इत्यत्र विशेषणत्वेन अन्वेति इत्युक्तम्। अतः उभयविशेषणत्वं युज्यतेतराम्।

तर्हि इणीकारादौ प्रतिषेधः इत्यत्र वार्तिके कुतः इण्धातुविषये केवलं प्रतिषेधः उक्तः इति शङ्का स्यात्। तत्र इण्धातुः उपलक्षणं एधतेरपि इति वक्तुं शक्यते। पूर्वं रूपग्रहणपक्षे इण्धातोरेव सम्भवात् रूपग्रहणपक्षे दोषमुक्त्वा पक्षान्तरं धातुग्रहणमिति

भवतु इति "अथ धातुग्रहणम्। सिद्धमेतदिति। किं तर्हीति"[3] भाष्यम्। रूपग्रहणपक्षे यः दोषः स धातुग्रहणपक्षे वार्यते। धातुग्रहणपक्षे दोषः अस्ति किमित्यर्थे किं तर्हीति भाष्ये पृष्टम्। अतः धातुग्रहणपक्षे प्रकृतः इण्धातुः इति कृत्वा तत्रैव दोषः प्रदर्शितः। एतावता एधतेः तत्र सम्भवो न इति नैव वक्तुं शक्यते। रूपग्रहणपक्षे तु एधतेः असम्भवात् ग्रहणं न कृतम्। अतः इण्धातोरेव विषये उभयपक्षे दोषप्रदर्शनं भाष्ये कृतम्।

नागेशोपाध्यायोक्तदिशा एत्येधत्योः इत्यत्र एधतिग्रहणस्य सम्भवमात्रेण उपादानापेक्षया इणिकारादौ इत्यत्र उपलक्षणमेव युक्तम्। स्वतः नागेशोपाध्यायेन "उपैधयते" इत्यत्र ण्यन्ते वृद्धिरिष्यते। तत्र च प्रकृतिभागस्य "एध्रूपत्वात्" इत्युक्तम्[4]। मा भवान् प्रेदिधत् इत्यत्र अनभिधानमुच्यते इति न युक्तम्। भाष्याशयस्तु अनभिधानकथने न पूरकः। प्रकृतिभागस्य एध्रूपत्वात् इत्यत्र प्रकृतिभागस्य आनुपूर्वीरूपं गृह्यते उत एध्धातुः ण्यन्तस्य अवयवः धातुः गृह्यते इति अभिषावयति इत्यादौ भाष्ये साधितम्। तद्वत् अत्रापि एध्रूपत्वमित्यस्यापि एध्धातुत्वं खलु ग्राह्यम्। तथा च प्रकृतिभूत-एध्धातुत्वमाश्रित्य यदा विचार्यते तदा प्र इदिधत् इत्यत्र अतिव्याप्तिः साम्भाव्यते। ततः एचि इति विशेषणम् एधत्यंशेऽपि युक्तमेव।

**आकरग्रन्थाः**


१. **वैयाकरणसिद्धान्तकौमुदी** (बालमनोरमा - तत्त्वबोधिनीसहिता) भट्टोजीदीक्षितविरचिता। श्रीमद्गिरिधरशर्मणा श्रीपरमेश्वरानन्दशर्मणा च संशोद्ध्य सम्पादिता। मोतीलाल बनारसीदास। दिल्ली। 8th edition, 2005

२. **व्याकरणमहाभाष्यम्** प्रदीपोद्योतसहितम्। पतञ्जलिना विरचितम्। भार्गवशास्त्रिभिः संशोधितम्। चौकम्बा संस्कृतप्रतिष्ठानम् देहली। 2011 (पुनर्मुद्रणम्)

३. **लघुशब्देन्दुशेखरः** (भावबोधिनी - बालबोधिनीसहितः)। आचार्यश्रीपाद-सत्यनारायणमूर्तिभिः सम्पादितः। Rashtriya Sanskrit Vidyapeetha Tirupati, 2001.


1. अष्टाध्यायी (६-१-८९)
2. अष्टाध्यायी (६-१-८८)
3. अष्टाध्यायी (७-४-१)
4. अष्टाध्यायी (६-१-११)
5. अष्टाध्यायी (६-१-८७)
6. अष्टाध्यायी (६-४-७४)

5. लघुशब्देन्दुशेखरः भागः- १. पृ. सम् - १३७
6. अष्टाध्यायी (६-४-२०)
1. प्रौढमनोरमा पृ. सम् - २१६
2. अष्टाध्यायी (७-४-१)
3. अष्टाध्यायी (६-१-११)
4. अष्टाध्यायी (७-४-१)
5. प्रौढमनोरमा पृ. सम् - २१९
1. अष्टाध्यायी (८-४-३४)
2. महाभाष्यम् भागः- ६. पृ. सम् - २२७
3. अष्टाध्यायी (८-३-६५)
4. अष्टाध्यायी (७-१-५६)
5. प्रौढमनोरमा पृ. सम् - २१९
1. अष्टाध्यायी (८-३-६५)
2. महाभाष्यम् भागः ६. पृ. सम् - १९६
3. महाभाष्यम् भागः ६. पृ. सम् - १९६
4. महाभाष्यम् भागः ६. पृ. सम् - १९६
5. अष्टाध्यायी (८-४-३४)
1. लघुशब्देन्दुशेखरः भागः १. पृ. सम् - १३७
2. महाभाष्यम् भागः - ५. पृ. सम् - ९८
3. महाभाष्यम् भागः - ५. पृ. सम् - ९८
4. महाभाष्यम् भागः - ५. पृ. सम् - ९८
1. महाभाष्यम् भागः - ५. पृ. सम् - ९८
2. महाभाष्यम् भागः - ५. पृ. सम् - ९८
3. महाभाष्यम् भागः - ५. पृ. सम् - ९८
4. लघुशब्देन्दुशेखरः भागः १. पृ. सम् - १३७

✦✦✦

# वैशेषिकदृशा शब्दार्थयोस्सम्बन्धविचारः

**डॉ० विश्वेशः वाग्मी***

**सारसङ्क्षेपः-**

भारतीयशास्त्रपरम्परायां प्रायशः सर्वासु विधासु शब्दार्थसम्बन्धमधिकृत्य मनीषिभिः सूक्ष्मातिसूक्ष्मं महच्चिन्तनं प्रस्तूयते।यद्यपि सांख्य-योग-मीमांसा-वेदान्त-व्याकरणदर्शनानि शब्दार्थयोः स्वाभाविकं नित्यसम्बन्धं स्वीकुर्वन्ति किन्तु वैशेषिकदृशा शब्दार्थयोः समयकृतेन अनित्येन वाच्यवाचकभावसम्बन्धेनैव शब्देनार्थज्ञानं सम्भवति न तु नित्येन स्वाभाविकसम्बन्धेनेति। वैशेषिकाणामभिप्रायेण अत्र नास्ति किञ्चिदपि लेशमात्रं सन्देहः यच्छब्देनार्थस्य ज्ञानं नियतं भवति, किन्तु नियतशब्देन नियतार्थस्य यः बोधो भवति, सः सामयिकः, समयबलेनैव शब्दार्थबोधः सञ्जायते न तु स्वाभाविकरूपेणेति। शब्दार्थयोस्सम्बन्धमधिकृत्य वैशेषिकदर्शनाभिमतानामेतासामेव युक्तीनामेकस्मिन्स्थले सुसम्बद्धरूपेणोपस्थापनं समग्रतया विश्लेषणञ्च प्रस्तुतस्यास्य शोधपत्रस्याभिलषितमिति।

**प्रमुखशब्दाः**- वैशेषिकदर्शनम्, शब्दार्थसम्बन्धः, कणादः, सामयिकसम्बन्धः, ईश्वरसङ्केतः।

शब्देन (पदेन) अर्थावबोधो भवति, अर्थावबोधश्च शब्दार्थयोः सम्बन्धं विना न सम्भवति इति सार्वजनीनं तथ्यम्। विषयेऽस्मिन् नास्ति काचित् विप्रतिपत्तिः, किन्तु शब्दार्थसम्बन्धस्य का प्रकृतिः? इत्येतं विषयमभिलक्ष्य दार्शनिकेषु तत्र परस्परं मतभेदः सञ्जायते-शब्दार्थयोः (पद-पदार्थयोः) परस्परं यः सम्बन्धः सः किं रूपः? अर्थात् तस्य सम्बन्धस्य नाम किम्? शब्दार्थयोः (पद-पदार्थयोः) स सम्बन्धः नित्यः अनित्यो वेति? भारतीयभाषाचिन्तने शब्दार्थविमर्शदृष्ट्यैषा महत्त्वपूर्णा समस्या वर्तते। समस्यामेतामधिकृत्य शास्त्राणां प्रायशः सर्वासु विधासु महच्चिन्तनं प्रादुरभूत्। अतः शब्दस्वरूपमभिलक्ष्य यथा दार्शनिकप्रस्थानानां महान् मतभेदः दरीदृश्यते, तथैव शब्दार्थसम्बन्धविषयेऽपि तेषां दृष्टिभेदो सुतरां परिलक्ष्यते।

**व्याकरणदर्शनम्** :- शब्दार्थयोः सम्बन्धमधिकृत्य शाब्दिकेषु महच्चिन्तनमुप-

* सहायकाचार्यः, संस्कृतविभागः, महात्मा गाँधी केन्द्रीय विश्वविद्यालयः, बिहारः, vishujnu@gmail.com, 9717788864

लभ्यते। तेषामभिमतं यत्- शब्दः, तस्यार्थः, तयोः सम्बन्धश्चेत्येते त्रयोऽपि नित्याः सन्तिः। यतोह्येतेषां कश्चित्कर्त्ता नोपलभ्यते, अतः स्वाभाविकरूपेण तेषां नित्यत्वमभ्युपगम्यते[1] -

**"सम्बन्धस्य न कर्त्तास्ति शब्दानां लोकवेदयोः।**
**शब्दैरेव हि शब्दानां सम्बन्धः स्यात्कृतः स्वयम्"।।**[2]

आचार्यभर्तृहरिणापि वाक्यपदीये व्याकरणागमानुसारेण शब्दस्य, अर्थस्य तयोश्च सम्बन्धस्य नित्यत्वं स्वीक्रियते-

**"नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः"।।**[3]

तदनुसारं सूत्रकारेण पाणिनिना- **तदशिष्यं संज्ञाप्रमाणत्वात्**[4] इत्यत्र, अनुतन्त्रकारेण (वार्त्तिककारेण) कात्यायनेन- **सिद्धे शब्दार्थसम्बन्धे**[5] इत्यत्र, महाभाष्यकारेण च **नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः**[6] इत्यत्र शब्दार्थयोः तयोर्मध्ये सम्बन्धस्य च नित्यत्वं प्रतिपाद्यते। वाक्यपदीयकारेण शब्दार्थयोः सम्बन्धोऽयं योग्यतासम्बन्धात्मकः कार्यकारणात्मकश्च स्वीक्रियेते-

**"कार्यकारणभावेन योग्यभावेन च स्थिताः।**
**धर्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु"।।**[7]

**जैनदर्शनम्** :- जैनदार्शनिकैः शब्दार्थयोः स्वाभाविकः सम्बन्धः स्वीक्रियते। आचार्यप्रभाचन्द्रः शब्दार्थयोः स्वाभाविकं योग्यतात्मकं सम्बन्धं प्रतिष्ठापयति।[8] परीक्षामुखसूत्रे उच्यते- शब्दार्थयोः योग्यतायां सत्यामेव संकेतो जायते, संकेतवशादेव च शब्दैः पदार्थज्ञानं सम्भवति- **"सहजयोग्यतासंकेतवशाद्धि शब्दादयो वस्तु प्रतिपत्तिहेतवः"**[9]।

---

1. न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह- कुरु शब्दान् प्रयोक्ष्य इति। महाभाष्यम्, प्रथमो भागः , पृ० 52
2. वाक्यपदीयम्, वृत्तिः,1.24-26
3. वा० प०, 1.23
4. अष्टाध्यायीसूत्रपाठः, 1.2.53
5. म० भा०, प्रथमो भागः, वार्त्तिकम् 1, पृ० 43
6. म० भा०, प्रथमो भागः, पृ० 48
7. वा० प०, 1.25; प्रकाश्यप्रकाशकभावेन समयोपाधिर्योग्यता शब्दार्थयोः सम्बन्धः। वा० प० वृत्तिः, 1.23
8. प्रमेयकमलमार्तण्डः, पृ०123
9. परीक्षामुखसूत्रम्, 3.100-110

**बौद्धदर्शनम्** :- बौद्धैः शब्दार्थयोः कश्चित् विशिष्टः सम्बन्धः नाभ्युपगम्यते। यदि शब्दार्थयोः कश्चित् नियतः सम्बन्धः स्यात् तर्हि एकस्यैव पदार्थस्य विभिन्नैः शब्दैः व्याख्यानं न स्यात्, न च दर्शनविकल्पानां सृष्टिः स्यात्-

**परमार्थैकतानत्वे शब्दानामनिबन्धना।**
**न स्यात्प्रवृत्तिरर्थेषु समयान्तरभेदिषु॥**[1]

अतः शब्दार्थयोः कश्चित्सम्बन्धः नास्ति। शब्देन च यः अर्थोऽवबुध्यते स तु केवलम् अपोहविधिना एवाभिव्यज्यते, अपोहश्च कश्चित्सम्बन्धः नास्ति।[2]

**सांख्य-योगदर्शनम्** :- सांख्य-योगाभ्यां शब्दार्थयोः वाच्यवाचकभावमाधृत्य नित्यः सांकेतिकश्च सम्बन्धः स्वीक्रियते।[3] तत्र शब्दः वाचकः अर्थश्च वाच्य इति।व्यास-वाचस्पतिप्रभृतयो व्याख्याकाराः शब्दार्थसम्बन्धस्यानित्यत्वं खण्डयन्त ऊचुः- "सर्वे शब्दाः सर्वेषामर्थानामभिधाने समर्थाः भवन्ति। अतः सर्वैः शब्दैः सह सर्वेषामर्थानां स्वाभाविकः सम्बन्धः विद्यते। ईश्वरसङ्केतस्तु केवलं प्रकाशकः नियामकश्चेति।[4]

**मीमांसादर्शनम्** :- मीमांसकाः शब्दार्थयोः औत्सर्गिकं (स्वाभाविकं) सम्बन्धं स्वीकुर्वन्ति।[5] तेषामनुसारेणायं सम्बन्धः नित्यः वाच्यवाचकभावञ्चाश्रित्य प्रवर्तते[6]।

**वेदान्तदर्शनम्** :- वेदान्त नां सर्वोऽपि शब्दार्थसम्बन्धसिद्धान्तः मीमांसकसम्मत एव।

**न्यायदर्शनम्** :- शब्दार्थसम्बन्धं विवेचयत्सु दार्शनिकप्रस्थानेषु न्यायदर्शनस्य प्रमुखतमं स्थानं विद्यते। अस्य माहात्म्यमनेनैव ज्ञायते यत्- यत्रापि शब्दार्थविषये न्यायवैशेषिकयोः सिद्धान्तानामुल्लेखः क्रियते, तत्र प्रमुखतः न्यायस्यैव सिद्धान्ताः

1. प्रमाणवार्त्तिकम्, 3.206
2. अपोहवादः, पृ० 16
3. ततः संकेतकृतकमेव वाचकत्वम्। तत्त्ववैशारदी, पृ० 81; वाच्यवाचकभावः सम्बन्धः शब्दार्थयोः। साङ्ख्यसूत्राणि, 5.37
4. सर्व एव शब्दा सर्वाकारार्थाभिधानसमर्था इति स्थित एवैषां सर्वाकारैर्थैः स्वाभाविकः सम्बन्धः। ईश्वरसंकेतस्तु प्रकाशको नियामकश्च। त० वै०, पृ०81-82
5. औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः.....। मीमांसासूत्राणि, 1.1.5
6. (i) अपौरुषेयशब्दानामर्थेन प्रत्याय्यप्रत्यायकभावलक्षणसम्बन्धः। प्रकरणपञ्चिका, पृ० 234

   (ii) असति सम्बन्धान्तरे स्वभावतः एव शब्दोऽर्थस्य प्रत्यायकोऽर्थस्य प्रत्याय्य इत्ययमेव सम्बन्धो भविष्यति। शास्त्रदीपिका, पृ० 90

प्रदर्श्यन्ते, यतोह्येतयोः नास्ति कश्चिद्विशिष्टः भेदः। अतः अत्राध्याये शब्दार्थ-सम्बन्धमधिकृत्य वैशेषिकाभिमतं परिशीलनावसरे यथास्थलं न्यायमतस्यापि विवेचनङ्करिष्यते।

**वैशेषिकदर्शनम्** :- वैशेषिकदर्शनाभिमतः शब्दार्थसम्बन्धो विश्लेष्यते चेत् स्पष्टीभवति यत्- महर्षिकणादः संयोगविभागगुणनिरूपणप्रसङ्गे यद्यपि अवान्तररूपेण विषयममुं विमृशति, तथाप्ययं विमर्शः विशिष्ट एव, यथाऽधोलिखितविवरणेन संसूच्यते-

**शब्दार्थावसम्बद्धौ:-**

वैशेषिकमतानुसारेण सम्बन्धो मुख्यतः द्विविधो भवति- संयोगसंबन्धः समवायसम्बन्धश्चेति, सम्बन्धान्तराणि तु तन्मूलकान्येव।[1] किन्तु शब्दार्थयोः संयोगसमवाययोरुभयोः कश्चिदेकोऽपि सम्बन्धो न सम्भवति, यतः-

(क) शब्दोऽम्बरगुणः[2], तेन यः पदार्थोऽवबुध्यते सः द्रव्यरूपो भवति उत वा गुणरूपः। तथा च द्रव्यगुणयोः गुणगुणयोर्वा परस्परं संयोगसम्बन्धो नार्हति इत्यतः शब्दार्थयोः संयोगसम्बन्धो नाङ्गीक्रियते[3]।

(ख) शब्दार्थयोः प्राप्तिरूपसम्बन्धे[4] किमपि प्रमाणं नोपलभ्यते[5]। कुतः? अतीन्द्रियत्वात्।[6] अर्थात् येन श्रवणेन्द्रियेण शब्दो गृह्यते तेनैव श्रोत्रेन्द्रियेण

---

1. (प) संयोगसमवायान्यतरत्वं वा सम्बन्धत्वम्। न्यायमञ्जरी, पृ० 220
2. शब्दोऽम्बरगुणः श्रोत्रग्राह्य................। प्रशस्तपादभाष्यम्, पृ०236
3. (i) युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते। वैशेषिकसूत्राणि, 7.2.13

   (ii) गुणत्वात्, वै० सू०, 7.2.14 तत्र च- "शब्दस्यार्थेन संयोगो न भवतीति प्रतिज्ञाशेषः। तत्र हेतुः-गुणत्वात्...। घटः पटः इत्यादिकः शब्दः।
   स गुणः। घटपटादिरर्थः। स द्रव्यम्। द्रव्यगुणयोश्च सतोस्तयोर्युतसिद्ध्यभावात्संयोगाभाव इति भावः"। वैशेषिकसूत्रवैदिकवृत्तिः, तदेव

   (iii) गुणोऽपि विभाव्यते, वै० सू०, 7.2.15 तत्र च- "न केवलं द्रव्यम्, अपि च गुणोऽपि(रूपादि) शब्देन प्रतिपाद्यते...। गुणयोश्च सतोस्तयोर्न संयोगसम्बन्ध संभव इति भावः"। वै० सू० वै० वृ०, तदेव
4. प्राप्तिर्नाम संयोगः एकार्थसंयोगः समवायो वा। शाब्दबोधमीमांसा, पृ० 2
5. प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिसिद्धः। कस्मात्? प्रमाणतोऽनुपलब्धेः। न्यायभाष्यम्, 2.1.52, पृ० 148
6. न खलु शब्दार्थसम्बन्धः प्राप्तिलक्षणो वा प्रत्याय्यप्रत्यायकरूपो वा? यदि प्राप्तिलक्षणो तर्हि तस्य प्रत्यक्षेणोपलब्धिरनुमानेन वा? तत्र तावत् प्रत्यक्षेण नोपलब्धिः। कस्मादतीन्द्रियत्वात्। न्यायवार्त्तिकतात्पर्यदीपिका, 211.56, पृ०41

शब्दस्य विषयभूताः घटपटादिपदार्थाः न गृह्यन्ते, ते तु खलु चक्षुरादीन्द्रियविषयभूता एव। अतः शब्दार्थयोः संयोगसंबन्धो न संघटते , यतः समानेन्द्रियेण गृह्यमाणयोरेव पदार्थयोस्संयोगो भवितुमर्हति यथा- **'पात्रजलयोः, पुरुषदण्डयोश्च'**- **"प्रत्यक्षस्तावत् शब्दार्थप्राप्तेर्नोपलब्धिः- अतीन्द्रियत्वात् = येनेन्द्रियेण गृह्यते शब्दस्यस्यविषयभावमतिवृत्तोऽर्थो न गृह्यते, अस्ति चातीन्द्रिय-विषयभूतोऽप्यर्थः, समानेन चेन्द्रियेण गृह्यमाणयोः प्राप्तिर्गृह्यते इति''**।[1] किन्तु शब्दार्थौ तु नैकेन्द्रियग्राह्यौ, शब्दस्य श्रवणेन्द्रियमात्रग्राह्यत्वात्, तदर्थस्य च श्रवणेन्द्रियाग्राह्यत्वात् शब्दार्थयोः संयोगसम्बन्धो नोपपद्यते।

(ग) अपि च शब्दार्थयोः यदि प्राप्तिलक्षणः (संयोगः) सम्बन्धः स्यात्तदा शब्दान्तिके वा अर्थः स्यात्, अर्थान्तिके वा शब्दः स्यात् उभयं वा उभयत्र स्यात्।[2] तत्र नाद्यः पक्षः सम्भवति- यदि शब्दान्तिकेऽर्थः स्यात् तदा अन्नादिशब्दानामुच्चारणे कृते सति अन्नरूपस्यार्थस्य प्राप्त्या तेन मुखपूरणं स्यात्, अग्न्यादिशब्दोच्चारणे कृते अग्निरूपार्थप्राप्त्या तेन मुखदाहः स्यात्, खड्गादिशब्दोच्चारणे च कृते खड्गरूपस्यार्थस्य प्राप्त्या तेन मुखस्य छेदनं स्यात्- **"पूरणप्रदाह-पाटनानुपलब्धेश्च सम्बन्धाभावः"** इति।[3] अर्थान्तिके शब्द इति द्वितीयः पक्षोऽपि न युक्तः- यतोहि यत्र भूतले घटादिपदार्थो भवति, तत्र शब्दस्योच्चारणस्थानानां करणानाञ्चाभावो दृश्यत इति नार्थान्तिके शब्द उपलभ्यते। उभयप्रतिषेधाच्च उभयं वोभयत्र इति तृतीयपक्षोऽपि नोपकल्प्यते। तस्मान्न शब्दार्थयोः संयोगसम्बन्ध इति महर्षिगौतमस्यापि मतम्।[4]

(घ) महर्षिकणादोऽपि संयोगस्यासद्भावे **"निष्क्रियत्वादिति"**[5] सूत्रेण उपर्युक्तमेव सिद्धान्तं प्रकारान्तरेण समुपस्थापयति-संयोगः त्रिविधः- अन्यतरकर्मजः, उभयकर्मजः संयोगजश्चेति[6]। शब्दार्थयोः त्रिविधोऽपि संयोगो नोपलभ्यते- यदा मोदकेति शब्दस्योच्चारणं क्रियते, तदा उच्चारणमात्रेणैव कान्दविकस्यापणे

---

1. न्या० भा०, 2.1.52, पृ० 148
2. प्राप्तिलक्षणे च गृह्यमाणे सम्बन्धे शब्दार्थयोः शब्दान्तिके वार्थः स्यात् अर्थान्तिके वा शब्दः स्यात् उभयं वोभयत्र। तदेव
3. न्या० सू०, 2.1.53
4. अर्थान्तिके शब्दः इति- स्थानकरणासंभवाद् अनुकरणम्, स्थानं कण्ठादयः करणं प्रयत्नविशेषः तस्यार्थान्तिकेऽनुपपत्तिरिति। उभयप्रतिषेधाच्च नोभयम्। तस्मान्न शब्देनार्थः प्राप्त इति। न्या० भा०, तदेव
5. निष्क्रियत्वात्। वै० सू०, 7.2.16
6. वै० सू०, 7.2.9

स्थितः मोदकपदार्थः मोदकशब्दान्तं नोपगच्छति, नापि च मोदकशब्दः आपणस्थेन मोदकपदार्थेन सह सम्बद्धो भवति, कुतः? उभयोः शब्द (मोदक)-अर्थयोः (मोदक) क्रियाशून्यत्वात्। न शब्दे काचित्क्रिया अस्ति न वा पदार्थे, किन्तु संयोगस्तु क्रियाजन्यः-**"संयोगः क्रियाजन्यः। शब्दस्तु गुणः निष्क्रियः। अतः शब्दनिष्क्रियया तावत् संयोगो न जन्यते।... न तत्र घटे काचित्क्रियाऽस्ति या संयोगं जनयेत्"**।[1] एतस्मान्निष्क्रियत्वाच्छब्दार्थयोः संयोगो न सम्भवति।

(ङ) न केवलं संयोगस्य अपितु शब्दार्थयोः संयोगसमवाययोरुभयोरपि सम्बन्धयोः निराकरणाय महर्षिकणादः हेत्वन्तरमाह- अविद्यमाने घटपटादिपदार्थे घटो नास्ति, पटो नास्तीत्यादि प्रयोगदर्शनाच्च विभाव्यते यच्छब्दस्यार्थेन सह न केवलं संयोग अपितु समवायसम्बन्धोऽपि कथमपि न सम्भवति-**"असति नास्तीति च प्रयोगात्''**।[2]

अवधेयं यदभावः वैशेषिकसम्मतः सप्तमः पदार्थः, सः च चतुर्विधः -

1. प्रागभावः।
2. प्रध्वंसाभावः।
3. अत्यन्ताभावः।
4. अन्योन्याभावश्चेति।[3]

तत्र प्रागभावे- **'उत्पत्तेः पूर्वं घटो नासीत्'**, प्रध्वंसाभावे- **'ध्वंसानन्तरं घटो न भविष्यति'**, अत्यन्ताभावे- **'भूतले घटो नास्ति'**, अन्योन्याभावे- **'घटः पटो नास्ती'**त्यादिप्रयोगाः नितरां संलक्ष्यन्ते।[4] परिणामतः घटपटादिपदार्थानामविद्यमाने सत्यपि अर्थाभावहेतुकेन नास्तीति शब्दप्रयोगेण ज्ञायते- यच्छब्दार्थयोः परस्परं न संयोगसम्बन्धो न च समवायसम्बन्धोऽस्तीति[5]। महर्षिकणादोऽप्याह- **"शब्दार्थाव-सम्बद्धौ"** इति।

---

1. सुगमावैशेषिकसूत्रवृत्तिः, 7.2.16,पृ० 104
2. वै० सू०, 7.2.16
3. वै०सू०, 9.1.1-4; लक्षणावली, पृ० 26; न्यायकोशः, पृ० 556
4. तर्कसंग्रहः, पृ०232
5. वै० सू०, 7.2.18

यदि च शब्दार्थयोः परस्परं संयोगसम्बन्धः समवायसम्बन्धो वा स्यात्तर्हि- दण्डदर्शनाद्यथा दण्डसंयोगिनः पुंसः- **दण्डवान् पुरुषोऽयमिति** प्रत्ययः, अवयवविशेष दर्शनाच्च अवयवसमवायिनः **हस्तीति** प्रत्ययो भवति, तथा **दण्डीपुरुषः, हस्तिकुञ्जरः** इत्यादि प्रत्ययवद् **घटशब्दवान् घटोऽर्थः** इत्यादिप्रत्ययोऽपि जायेत, मोदकाग्निक्षुरशब्दानामुच्चारणे मुखस्य पूरणं, दहनं पाटनं चोपलभ्येत। किन्तु न तथा प्रत्ययो जायते, न वा मुखस्य पूरणादिकमुपलभ्यते। एतस्मादवगम्यते- नास्ति शब्दार्थयोः संयोगो वा समवायो वा कश्चित् सम्बन्धः-**"संयोगिनो दण्डात् समवायिनो विशेषाच्च"** इति।[1]

न्यायमञ्जरीकारः जयन्तभट्टोऽपि कथयति- "न हि शब्दार्थयोः कुण्डबदरयोरिव संयोगः, तन्तुपटयोरिव समवायो वा सम्बन्धः प्रत्यक्षमुपलभ्यते। तन्मूलकत्वाच्च सम्बन्धान्तराण्यपि न सन्ति। **मुखे शब्दमुपलभामहे, भूमावर्थम्** इति तयोः असम्बन्धमेव लोकेऽनुभूयते। क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणानुपलम्भात्, शब्दोत्पत्तिहेतूनाञ्च स्थानकरणप्रयत्नानां घटपटाद्यर्थदेशेऽभावात् न शब्ददेशेऽर्थः सम्भवति नाप्यर्थदेशे शब्द इति शब्दस्यार्थेन सम्बन्धः नानुमीयते"।[2]

**पूर्वपक्षः-**

अत्रायं प्रश्नः समुदेति- यदि शब्दार्थयोः प्राप्तिरूपसंयोगः समवायः स्वाभाविको वा सम्बन्धो नास्ति, तर्हि नियतः शब्दः नियतमर्थ कथं प्रतिपादयति? घटशब्देन घटस्यैव बोधो भवति न पटादेरिति। तस्मात् शब्दार्थयोः सम्बन्धस्य प्रतिषेधो नोपपद्यते[3], यदि शब्दार्थयोः स्वाभाविकः सम्बन्धो न स्यात्, तदा घटशब्देन घटशब्दस्यैव बोधो भवति न पटादेरिति व्यवस्था न स्यात्। किं तु सर्वैः शब्दैः सर्वेषां पदार्थानां बोधः स्यात्, न चैवमस्ति। अमुकशब्दात् अमुक एवार्थोऽवगम्यत इति सर्वत्र अवलोक्यते। अनेन ज्ञायते यच्छब्दार्थयोः कश्चित्तु सम्बन्धोऽस्त्येव, स च स्वाभाविकः- **"भवतु नाम प्राप्तिलक्षणस्य शब्दार्थसम्बन्धस्य प्रतिषेधः प्रमाणाभावात्। तथापि वाच्यवाचकलक्षणस्य स्वाभाविकस्य सम्बन्धस्याप्रतिषेधः। कस्माच्छब्दार्थ-व्यवस्थानादिति"[4]।**

---

1. वै० सू०, 7.2.19
2. न्या० म०, पृ०220-221, शा० बो० मी०, पृ० 4
3. शब्दार्थव्यवस्थापनादप्रतिषेधः। न्या० सू०, 2.1.54
4. न्या० ता० दी०, 2.1.58, पृ०42; सु० वै० सू० वृ०, पृ०104

**सिद्धान्तपक्षः-**

वैशेषिकाः मीमांसकाभिमतशब्दार्थयोः स्वाभाविकसम्बन्धस्य खण्डनं कुर्वन्ति, तेषामभिप्रायेण अत्र नास्ति किञ्चिदपि लेशमात्रं सन्देहः यच्छब्देनार्थस्य ज्ञानं नियतं भवति, तज्ज्ञानञ्च शब्दार्थयोः सम्बन्धं विना कथमपि न सम्भाव्यते, तदर्थं तु कश्चित् सम्बन्धः स्वीकर्तव्य एव। परन्तु स सम्बन्धः संयोगरूपः समवायरूपो वा स्वाभाविकसम्बन्धस्तु न भवितुमर्हति, नापि च कार्यकारण-निमित्तनैमित्तिक-आश्रयाश्रयिभावाः शब्दस्यार्थेन सह सम्बन्धाः भवितुमर्हन्ति[1]।

पुनस्तर्हि कः शब्दार्थयोः सम्बन्धः? इत्याशङ्कायामुक्तवान् महर्षिकणादः- नियतशब्देन नियतार्थस्य यः बोधो भवति, सः सामयिकः, समयबलेनैव शब्दार्थबोधः सञ्जायते न तु स्वाभाविकरूपेण[2] इति। नैयायिका अपि शब्दार्थयोः समयकृतेन अनित्येन वाच्यवाचकभावसम्बन्धेनैव शब्देनार्थज्ञानं सम्भवति न तु नित्येन स्वाभाविकसम्बन्धेन इत्यभिमन्यन्ते।[3] यदि शब्दार्थयोः नित्यसम्बन्धः स्यात् तर्हि सर्वेषां शब्दानां सर्वेषु देशेषु सर्वासु च भाषासु समाना एवार्थावगतिः स्यात्। तदा हिन्दीभाषायां प्रयुक्तानि वाक्यानि श्रुत्वा कश्चिद् हिन्दीभाषानभिज्ञः जर्मनदेशीयोऽपि तेषामर्थं जानीयात् तथा च व्यवहरेत्, किन्त्वेवं न सम्भवति। अत एव विश्वस्मिन् सर्वेषु राष्ट्रेषु प्रशासनेन वैदेशिकानां पर्यटकानां सौविध्यर्थं द्विभाषाविज्ञः (दुभाषिया) नियुज्यते। यदि शब्दार्थयोः नित्यः स्वाभाव सम्बन्धः स्यात्, तर्हि काऽवश्यक्ता तन्नियुक्तेः। एतस्माज्ज्ञायते- शब्दार्थसम्प्रत्ययः सामयिकः भवति न तु स्वाभाविकः इति। अत एव ऋष्यार्यम्लेच्छानां यथेच्छम् अर्थबोधनार्थं शब्दप्रयोगो दृश्यते। एकमेव **'यव'** शब्दमार्याः **'दीर्घशूक'** इति विशेषार्थे प्रयुञ्जते, तमेव यवशब्दं म्लेच्छाः **'कंगुः'** इत्यर्थे व्यवहरन्ति।[4] **'शवतिर्गतिकर्मा'** कम्बोजेष्वेव भाषितो भवति विकार एवैनमार्या भाषन्ते **'शव'** इति।[5] तथा च देशभेदात्, भाषाभेदाच्चापि शब्दस्य अर्थान्तरभेदो सञ्जायते। यथा- तस्करवाचकः **'चौरशब्दः'** दाक्षिणात्यैः **'ओदने'** प्रयुज्यते, मकायवाचकश्च हिन्दी भाषायाः **'कूकडी'** शब्दः पंजाबीभाषायां **'कुकुट्यर्थे'**

---

1. न्या० म०, पृ०221
2. सामयिकः शब्दार्थप्रत्ययः। वै० सू०, 7.2.20
3. सामयिकः शब्दार्थासम्प्रत्ययो न स्वाभाविकः। न्या० भा०, 2.1.56, पृ०151
4. ऋष्यार्यम्लेच्छानांयथाकामं शब्दप्रयोगोऽर्थप्रत्यायनाय प्रवर्तते। तदेव; शा०बो० मी०, पृ० 2-3
5. म० भा०, प्रथमो भागः, पृ० 66

प्रयुज्यते इति। अतः शब्दार्थबोधः सामयिक एव।[1]

**समयार्थनिरूपणम् :-**

कोऽसौ समयः इति शङ्करमिश्रेणोक्तम्- **"समय ईश्वरसङ्केत अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारः, यः शब्दो यस्मिन्नर्थे भगवता सङ्केतितः स तमर्थं प्रतिपादयति, तथा च शब्दार्थयोरीश्वरेच्छैव सम्बन्धः, स एव समयस्तदधीन (ईश्वराधीनः) इत्यर्थः"**[2]।

आर्षपरम्परायां तथ्यमिदं स्वीक्रियते 'यदमुकशब्दादमुक एवार्थो अवगन्तव्य' इति व्यवस्थायाः निर्देशः सर्वप्रथमम् ईश्वरीयप्रेरणयैवाभूत्। मनुनाप्युच्यते-

**"सर्वेषां तु नामानि कर्माणि च पृथक् पृथक्।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे"।।**[3]

वैशेषिकपरम्परायामपि एतत्स्वीक्रियत एव। अयमेव समय (सङ्केतः) इति। इयमेव सा शक्तिः, या अर्थं प्रत्याययति।[4] किन्त्ववधेयं यदर्थप्रत्यायनाय न केवलमीश्वरसङ्केतः स्वीकर्तव्यः अपितु मानवसङ्केतोऽपि तत्र कारणत्वेन विद्यते। वैशेषिकसूत्राणां व्याख्याकारः श्रीवीरराघवाचार्योऽपि **"सामयिकः शब्दार्थप्रत्ययः"**[5] इति सूत्रव्याख्यानावसरे संकेतं द्विविधममन्यत-"अनादिशब्दार्थविषये ईश्वरेच्छा अन्येषु

---

1. टिप्पणी- नैयायिकैः शब्दार्थस्वरूपविषयेऽपि सम्यक् विमृश्यते। तत्र प्राचीननैयायिकैः जात्याकृतिव्यक्तिवादः ("व्यक्त्याकृतिजातयस्तु पदार्थः", न्या० सू०, 2.2.4.9) नव्यनैयायिकैश्च जातिविशिष्टव्यक्तिवादः स्वीक्रियते। यद्यपि महर्षिकणादेन विषयेऽस्मिन् किमपि प्रत्यक्षं नोच्यते, तथापि न्यायवैशेषिकयोः समानतन्त्रत्वे निश्चिते सति वैशेषिकाणामपि जातिविशिष्टव्यक्तिवाद एव ग्राह्यः – 'तस्मात्तज्जात्याकृति-विशिष्टतद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तावेव विश्राम्यतीति'। न्यायसिद्धान्तमुक्तावलीः, पृ० 314
2. (i) वैशेषिकसूत्रोपस्कारः, तदेव, पृ० 430
   (ii) अस्माच्छब्दादयमर्थो बोद्धव्यः इति भगवन्नियोगात्मकः सङ्केतः समयः। वै० सू० वै० वृ०, तदेव, पृ०157
3. मनुस्मृतिः, 1.21
4. (i) अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः। त० सं०, पृ० 163
   (ii) शक्तिग्रहणस्य अष्टसाधनानि निरूप्यन्ते- शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च। वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः। न्या० सि० मु०, पृ 296
5. वै० सू०,7.2.20

लौकिकेषु शास्त्रपारिभाषिकेषु च आधुनिकाप्तसंकेतः अस्माच्छब्दादयमर्थो बोद्धव्यः इति"[1]।

नैयायिका अपि समयबलेनैव शब्दार्थव्यवस्थां स्वीकुर्वन्ति।[2] तत्र समयो नाम अभिधानाभिधेयनियमनियोगः[3]। अभिधीयतेऽनेनेत्यभिधानम् = वाचकम्, अभिधीयते इत्यभिधेयम् = वाच्यम् अर्थात् वाच्यवाचकभावसम्बन्धनियमस्य नियोगः = उपदेश एव समय इत्युच्यते। ईश्वरेण सर्गादावेव शब्दार्थयोः वाच्यवाचकभाव (अभिधानाभिधेय) सम्बन्धः निर्धारितः। तस्मिन् ज्ञाते सत्येव शब्दार्थावबोधो भवति- **"अस्य शब्दस्येदमर्थजातमभिधेयमित्यभिधानाभिधेययोः सर्गादावीश्वरेण कृतः। तस्मिन्नुप-युक्ते ज्ञाते शब्दार्थप्रत्ययस्य व्यवस्था भवति। गोशब्दात्सास्नादिमानेवार्थोऽभिधीयते। अश्वशब्दात् केसरादिमानेवेति। स चायं समयः स्वाभाविकसम्बन्धवादिनाऽप्य-वश्याभ्यनुज्ञेयः"।[4]**

यद्युपर्युक्तस्य वाच्यवाचकभावसम्बन्धस्य ज्ञानं न भवति तर्हि शब्दश्रवणेऽपि पदार्थज्ञानं न जायते।[5] न्यायभाष्यकारस्तु एतावानप्याह-शब्दार्थयो प्राप्तिरूप-नित्यसम्बन्धं मन्वानेभ्यः मीमांसकेभ्यश्चाप्ययं समयकृतः वाच्यवाचकभावसम्बन्ध अत्याज्य एव, समयज्ञानं विना शब्दस्यार्थबोधकत्वाभावात्।[6] न केवलमेतदेव अपितु संकेतरूपसम्बन्धस्य पालनार्थमेव पाणिन्यादिभिः शाब्दिकैः व्याकरणशास्त्रस्य रचना विहिता।[7] अतः वाच्यवाचकभावसम्बन्धोऽयं सर्वैः स्वीकर्तव्य एव।

उपर्युक्तविवेचनादवगम्यते- यदर्थेन सह शब्दस्य स्वाभाविको नित्यसम्बन्धो नाभ्युपगन्तव्यः, अपितु शब्दार्थयोस्तु सम्बन्धः साङ्केतिक एव। संकेतोऽयम् ईश्वरसमवेतो भवतु मानवसमवेतो वा, उभाभ्यामपि पदार्थज्ञानं भवत्येव। तत्र ईश्वरसमवेतः सङ्केत अभिधेति व्यवह्रियते। जीवसमवेतश्च सङ्केतः परिभाषेत्युच्यते तयोः सङ्केतेनैव लौकिकव्यवहारोऽयं प्रचलति।आधुनिकभाषाविज्ञानेऽपि हर्मन् पाउल, सईस, आग्डेन, रिचड्र्स प्रभृतयो भाषातत्त्वशास्त्रिणः शब्दार्थयोः साङ्केतिकं सम्बन्धमेव स्वीकृतवन्तः। आग्डेन-रिचड्र्समहोदयौ शब्दम् अर्थप्रतीकं मन्वाते। तयोरनुसारेण शब्दार्थयोः नास्ति कश्चित्साक्षात्सम्बन्धः। सम्बन्धोऽयमसाक्षात् साङ्केतिकश्च विद्यते[8]।

---

1. वैशेषिकदर्शनम् रसायानभाष्यम् , पृ० 244
2. न- सामयिकत्वाच्छब्दार्थप्रत्ययस्य। न्या० सू०, 2.1.55
3. न्या० भा०, तदेव, पृ०150, न्या० म०, पृ० 221
4. न्या० ता० दी०, 2.1.59, पृ०42
5. विपर्यये हि शब्दश्रवणेऽपि प्रत्ययाभावः। न्या० भा०, पृ० 150
6. सम्बन्धवादीनापि चायमवर्जनीय इति। तदेव
7. समयपालनार्थं चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणम्। तदेव
8. The Meaning of Meaning, p. 11.

 ISSN : 0975-1769

# पूर्वरङ्गे प्रस्तावनाविमर्शः

**डॉ. शक्ति शरण शर्मा***

काव्येषु कमनीयतायाः बहूनि कारकाणि भवन्ति। तेषु काव्यकमनीयताधायकेषु कारणेषु गुणालङ्काररीतयः प्रमुखं स्थानं आवहन्ति। काव्यशास्त्रं काव्यस्य सर्वानपि मानदण्डान् प्रस्तावयति। काव्यजगतः आस्वादवेत्तारः प्रायेण काव्यकमनीयतायाः कारणेभ्यः अपरिचितप्रायाः भवन्ति। यद्यप्यास्वादवेलायाम् आस्वादकारणताविषये न कोऽपि विचारयति तथाऽप्यास्वादयोग्यताकारणानि भवन्त्येव। तानि एव कारणानि काव्यं प्रति सहृदयहृदयं कर्षयन्ति, हर्षयन्ति, विलासयन्ति, सहृदयश्च विगलितवेद्यान्तो भवति। काव्यसंसारः अनेकविधः वर्तते परञ्च आचार्यविश्वनाथेन उक्तम्- **दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्**[1] इति। काव्यभेदेषु दृश्यकाव्यस्य महन्महत्त्वं वरीवृत्यते। उक्तञ्च काव्येषु नाटकं रम्यम् इति। नाटकस्य प्रभिन्नानि चमत्कारकाण्यङ्गानि भवन्ति। तेषु अङ्गेषु प्रस्तावना आदौ एव भवति। प्रस्तावनाधारेण एव नाटकम् अनुपमेयरूपेण प्रस्तुतं भवति।

प्रस्तावना पूर्वरङ्गादारभ्य वीथ्यङ्गं यावत् भवति। सम्पूर्णरङ्गस्य बीजम् प्रस्तावनाधारितमेव भवति। नेपथ्याद्यभिधानोत्तरं प्रस्तावनाक्रमः क्रमते। प्रस्तावनायां चित्रैर्वाक्यैः नटीसूत्रधारादिभिः विशेषप्रयोज्या ज्ञेया। प्रस्तावनां विना नाट्यस्य आरम्भ एव न सम्भवति। अतः प्रस्तावनायाः प्रयोगप्रयोजनमत्यन्तं महत्त्वं भजते। प्रस्तावनाप्रयोगकाले लक्ष्येऽपि विशेषावधानः महाकविकालिदासेन प्रास्तावि।

**आपरितोषात् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥**[2] अभिज्ञन.1- 2

दृश्यकाव्यान्तर्गतं दश रूपकाणि अष्टादश उपरूपकाणि सन्ति। सर्वेषु च तेषु भेदेषु प्रस्तावनाऽङ्गानि भवन्ति। प्रस्तावनाभेदाः एवं सन्ति-

---

* संविदा अध्यापक (साहित्य), मुक्तस्वाध्यायपीठम्, केन्द्रीय संस्कृत विश्वविद्यालय

1. सा. द.6/1
2. अभिज्ञन. 1/2

**उद्घातकः कथोद्घातः प्रयोगातिशयस्तथा।**
**प्रवर्तकावलगिते पञ्च प्रस्तावना भेदाः॥**[1] सा.द.6/33

नाट्यशास्त्रेऽपि प्रस्तावनाप्रसङ्गः भरतमुनिना पञ्चमेऽध्याये निर्दिष्टोऽस्ति-

**प्रस्तावनां ततः कुर्यात्काव्यप्रख्यापनाश्रयाम्।**
**उद्घात्याकादि कर्तव्यं काव्योपक्षपणाश्रयम्॥**[2]

एवं प्रकारेण भरतमुनिना नाट्यशास्त्रे प्रस्तावनायाः उद्घात्यकादयो भेदाः प्रोक्ताः सन्ति। कथावस्त्वनुरूपमेव पात्रचयनमपि मुनिना निर्दिष्टो वर्तते।-

**दिव्ये दिव्याश्रयो भूत्वा मानुषे मानुषाश्रयः।**
**दिव्यमानुषसंयोगे दिव्यो वा मानुषोऽपि वा॥**[3]

दशरूपके प्रस्तावनास्थापनारूपेण दिङ्मात्रमेव प्रस्ताविता वर्तते।-

**पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते।**
**प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः॥**[4] द.रू.3.2

एवं प्रस्तावनायाः स्थापनायाः च समानमेव कार्यं नाट्ये परिलक्षितं भवति। अतः अनयोः न कश्चिदभेदविशेषः वर्तते यतोह्यिनयोः कार्यं पूर्वरङ्गोत्तरं वस्तुस्थापनं वर्तते। प्रस्तावनायाः उक्तपञ्चभेदाः साहित्यदर्पणे प्रोक्ताः सन्ति। एभिः भेदैः नाटकेषु कथमप्रतिमं चारुत्वमायातीति प्रस्तूयते।

यत्र अनिश्चितार्थानि पदानि हृदयस्थविषयाणामर्थानामवगतये स्वाभिप्रेतार्थ-मात्रप्रतिपादकैः पदैः योज्यन्ते स प्रवेष्टुः अभिप्रेतार्थे स्थापकस्याभिप्रेतार्थः उद्धन्यते इति व्युत्पत्या उद्घातको नाम प्रस्तावना भेदः वर्तते।

**पदानि त्वगतार्थानि तदर्थगतये नराः।**
**योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते॥**[5] सा.द.6

विशाखदत्तरचिते मुद्राराक्षसाख्ये नाटके अर्थान्तरसङ्क्रमितस्यान्यस्यार्थस्य नैपथ्यवचोभिरन्यार्थरूपेण पात्रप्रवेशोऽभिलक्ष्यते। येन कथावस्तुनः स्थापनमत्यन्तं चारुत्वेन प्रस्तावितं भवति यथा-

1. सा.द. 6.33
2. ना.शा. 5-166
3. ना.शा. 5-167
4. द.रू. 3.2
5. सा.द. 6/34

**क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम्।**
**अभिभवितुमिच्छति बलात्**- (इत्यर्धोक्ते)[1]

एवं वचनश्रवणोत्तरं नेपथ्ये **( आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितु-मिच्छति इति )** अस्मिन् प्रसङ्गे अन्यार्थवन्त्यपि पदानि हृदयस्यार्थगत्या अर्थान्तरे सङ्क्रमय्य पात्रप्रवेशः भवति। सम्वादरूपेण ब्रूते च-**रक्षत्येनं तु बुधयोगः**[2] एवमेव अन्येष्वपि नाटकेषु उद्घात्यकाख्येन भेदेन अप्रतिमरूपेणार्थस्य स्थापनं क्रियते।

**सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा।**
**भवेत्पात्रप्रवेशश्चेत्कथोद्घातः स उच्यते।।**[3]

नाट्येषु नटी-सूत्रधारयोः परस्परं चित्रैर्विचित्रैर्वा वाक्यैः स्वकार्यविषये वार्तालापो भवति। तैः वाक्यैः कथाबीजस्य अङ्कुरितस्वरूपमवतरितं भवति। इदमेव आमुखं प्रस्तावना नाम्नाऽपि परिचीयते। प्रस्तावनायाः पञ्चसु भेदेषु कथोद्घातः प्रथमः भेदः वर्तते। अनेन माध्यमेन अज्ञातार्थानां पदानां बोधाय अन्यानि पदानि योज्यन्ते तत्र उद्घात्यक नाम्नी प्रस्तावना भवति। यथा वेणीसंहारे

**निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन।**
**रक्तप्रसाधतभुवः क्षतविग्रहाश्च स्वस्थाः भवन्तु कुरुरासुता सभृत्याः।।**[4]

एवं पारिपार्श्विकसूत्रधारयोः संवादे सति नैपथ्यवचोभिः अन्यानि पदानि योज्यन्ते-

**( नेपथ्ये। साधिक्षेपम् ) आः दुरात्मन् वृथामङ्गलपाठक शैलूषापसद**
**लाक्षागृहानलविषान्नसभाप्रवेशैः**
**प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।**
**आकृष्य पाण्डववधूपरिधानकेशान्**
**स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः।।**[5]

उद्घात्यककथोद्घातयोः मध्ये भेदस्तु सूक्ष्म एव वर्तते। प्रथमप्रस्तावनाभेदे सूत्रधारस्य अभिप्रेतार्थस्य पात्रेण अर्थान्तरे सङ्क्रमणम्, द्वितीये च भेदे तदभिप्रेतार्थस्यैव पात्रेण तत्त्वतो ग्रहणं भवतीत्येव मात्रभेदः। प्रायेण कार्यं समानमेव तथाऽपि प्रयोगवेलायां

1. मु.रा. पृ.27
2. मु.रा.पृ. 27
3. सा.द. 6.35
4. वेणिसंहार 1.7
5. वेणिसंहारः 1.8

चमत्कारकरणे किमप्यपूर्वमेव वैशिष्ट्यम् अनयोः अभिलक्ष्यते। अनयोः प्रयोगे वैशिष्ट्यं प्रागुक्तोदाहरणैः सामान्येन स्पष्टं भवति।

**यदि प्रयोगः एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।**
**तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा॥**[1]

यद्येकस्मिन्नेव प्रयोगे कश्चिदन्यप्रयोगो प्रयुज्यते तेनान्यप्रयोगेन च पात्रप्रवेशो विधीयते तत्र प्रस्तावनायाः प्रयोगातिशयाख्यो भेदः भवति। असौ व्यवहारः रङ्गे सूत्रधारेण विधीयते। अस्योदाहरणं कुन्दमालानाटिकायां इत्थं प्रकारेण प्रस्तूयते।

**लङ्केश्वरस्य भवने सुचिरं स्थितेति**
**रामेण लोकभयापरिवादभयाकुलेन।**
**निर्वासितां जनपदादपि गर्भगुर्वी**
**सीतां वनाय परिकर्षति लक्ष्मणोऽयम्॥**[2]

मञ्चोपरि सूत्रधारः नट्याः सहायमपेक्षते। तस्मिन् एव काले नेपथ्यादागतो ध्वनिना श्रूयते इत इतोऽवतरत्वार्या। अनेन वाक्यश्रवणेन सूत्रधारः स्वकीयं सहायमनुभवति। नैपथ्याभिमुखञ्चावलोक्य लक्ष्मणेन सह सीताम् अवलोक्य कथयति कष्टमति करुणं वर्तते। यतोहि अहं नटीं प्रतीक्षमाणः आसम् किन्तु सीता लक्ष्मणेन सह वनमेति। सीतां वनाय परिकर्षति लक्ष्मणोऽयमिति।

अत्र सूत्रधारस्य नट्याः नृत्यप्रयोगार्थम् आह्वानमिच्छुकस्य सीतां वनाय परिकर्षतीत्यन्यप्रयोगो वर्तते। अतोऽत्र प्रवेशकाख्यो प्रस्तावनाभेदः कथावस्तुस्थापनं विदधातीति। एवमेव मृच्छकटिकेऽपि नटीसूत्रधारयोः संवादे परिलक्ष्यते-**तेन हि गच्छतु आर्या। अहमपि अस्मत्सदृशजनयोग्यं ब्राह्मणम् उपनिमन्त्रयामि।**[3] इति वाक्यश्रवणोत्तरं नेपथ्यवाक्यं वर्तते- भोः अन्यं ब्राह्मणमुपनिमन्त्रयतु भवान्। व्यापृत इदानीमहम्। अत्र सूत्रधारः नटीं बुभुक्षा वारणार्थं भोजनाय प्रार्थयति परन्तु नट्या उपवासोत्तरं ब्राह्मणभोजनाह्वानार्थं सः प्रेषितः। यदा मैत्रेयः आमन्त्रणं अनङ्गीकरोति तदा दरिद्रचारुदत्तप्रवेशोऽपि प्रयोगातिशयस्योदाहरणं प्रतिभाति। एवं प्रकारेण प्रस्तावनायाः तृतीयो भेदः कथावस्तुनः उपस्थापनं विशिष्टप्रकारेण विदधाति।

**कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत्।**
**तदाश्रयश्च पात्रस्य प्रवेशस्तत् प्रवर्तकम्॥**[4]

---

1. सा.द. 6.36
2. कुन्दमाला.ना.1.5
3. मृच्छकटिकं पृ.33
4. सा.द. 6-37

सूत्रधारः कालं प्रवृत्तमाश्रित्य वर्णयति आहोस्वित् वसन्तग्रीष्मादिकाल-विशेषमाश्रित्य वस्तु प्रस्तावयेत् तद्वस्त्वाधारेण श्लेषादिना पात्रप्रवेशो विधीयते। प्रवर्तयतीति प्रवर्तकः इति व्युत्पत्या अर्थः कमपि पात्रं प्रवर्तयितुमभिप्रेरयतीत्याधारेण नाट्यप्रसङ्गे पात्रप्रवेशो एव अभिलक्ष्यते। प्रायेण सर्वेष्वपि भेदेषु वैशिष्ट्यमेतदेव कथावस्तुनः वैचित्र्यैण उपस्थापनम्। प्रवर्तकाख्ये प्रस्तावनाभेदे भेदकोऽस्ति कालानुगतो श्लेषादिद्वारा पात्रप्रवेशः। अस्योदाहरणम् अनर्घराघवे आसादितप्रकट- निर्मलचन्द्रहास इत्यादिपद्ये अवलोकयितुं शक्यते। अत्र सूत्रधारः मञ्चमागत्य श्लेषेण शरदर्तोः वर्णनं वर्णयति। तदाधारेण एव मञ्चोपरि रामस्य प्रवेशात् प्रवर्तकाख्यो प्रस्तावनाभेदः कथावस्तुनः प्रसारणं विदधाति।

**यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाधयेत्।**
**प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः।।**[1] सा.द.6

यत्रैकस्मिन् विषये समावेशादन्यदुपमानभूते पात्रप्रवेशसूचकरूपकार्य प्रसाधयेत तदवलगितमिति बुधैः ज्ञेयम्। अभिज्ञानशाकुन्तले यदा सूत्रधारः नटीं आदिशति तदा ग्रीष्मर्तुमाश्रित्य गीतं गायति। गीतञ्च श्रुत्वा सूत्रधारः पात्रप्रवेशं सूचयति-

**तवास्मि गीतरागेण हरिणा प्रसभं हृतः।**
**एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा।।**[2]

अत्र नटीसूत्रधारयोःविचित्रचित्रवाग्व्यापारेण अवलगितप्रस्तावनाभेदेन गीत-प्रशंसाव्याजेन दुष्यन्तप्रवेशरूपं कार्यं भवति। एतादृशेषु पात्रप्रयोगेषु अवलगिताख्यो प्रस्तावनाभेदः चमत्कारं तनुते।

पूर्वरङ्गः रङ्गाधानस्य महत्त्वपूर्णम् अङ्गं भवति। भरतमुनिना नाट्यप्रयोजनप्रसङ्गे विश्रान्तिजननं काले नाट्यमेतद्भविष्यतीत्याधारेण नाट्यस्य आह्लादकता परमम् अपेक्षिताऽस्ति। नाट्ये चमत्कारकारणानि अर्थप्रकृतयः, कार्यावस्थाः,नाट्यसन्धयः, अभिनयभेदादयः बहूनि अङ्गानि सन्ति। तेष्वङ्गेषु प्रस्तावनायाः आदावेव कथावस्तुनः उपस्थापनवैचित्र्यपूर्वकं प्रयोगो भवति। उक्तप्रकारेण प्रस्तावनाभेदैः कथावस्तुनः प्रभिन्नप्रकारेण आह्लादजनकता प्रस्तूयते। आह्लादाभावे नाट्यानां प्रयोजनवैयर्थ्यप्रसङ्ग-उदेति। अतः नाट्ये आह्लादजनकताकारकाणाम् अङ्गानां परमावश्यकता प्रतिभातीति।

✦✦✦

1. सा.द. 6-38
2. अभिज्ञानशाकुन्तलम् 1-5

 ISSN : 0975-1769

# न्यायव्याकरणयोः शाब्दबोधविचारः

राम किशोरः *

**उपोद्घातः ( शोधपत्रसारांशः ) -**

शाब्दबोधः एव कृत्स्नस्य जगद्व्यवहारस्य निदानभूतः अन्धकारनिवृत्तिश्च उक्तश्च दण्डिना "इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।" गौः अस्ति, गाम् आनय एवंभूतेषु वाक्येषु आकाङ्क्षादियुक्तैः शब्दैः अस्तित्वाद्यर्थयुक्तमर्थज्ञानं भवति। शाब्दबोधे उभयोरपि शब्दार्थयोः ज्ञानं भवति अथ च विलक्षणं ज्ञानमस्ति शाब्दबोधस्सर्वदैव। स च शाब्दबोधः आकाङ्क्षायुक्तैः शब्दैरेव प्रतिपादयेत् साकाङ्क्षशब्दाश्च सार्थकास्स्युः न तु निरर्थकाः। साकाङ्क्षशब्दाश्शब्दान्तरसापेक्षकाः अथ वा अन्येषां शब्दानां सहाचर्येण स्वार्थं प्रकटीकरोति। अतः शाब्दबोधस्तु न प्रत्यक्षप्रमाणं नाप्यनुमानप्रमाणम् अपि तु शब्दप्रमाणत्वात् पृथगेव स्वरूपमाधत्ते। अत्र शाब्दबोधमधिकृत्य नैयायिकानां वैयाकरणानां च मतं विस्तरेण प्रतिपादितम्।

## अवतरणिका

''प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास-च्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः[1] इति प्रथमसूत्रे एव भगवता अक्षपादेन इदमुद्घोषितं यत् एतेषां प्रमाणादिषोडशपदार्थानां तत्वज्ञानमेव मोक्षहेतुः (निःश्रेयसाधिगमम्प्रति हेतुरिति भावः)। इदंच यथार्थज्ञानं (प्रमा) चतुर्विधं **प्रत्यक्षानुमित्युपमितिशाब्दभेदात्** इति नैयायिकाः। इदानीं प्रत्यक्षादिचतुर्विधप्रमायाः उत्पत्तिक्रमः (करणं व्यापारश्च) रेखाचित्रमाध्यमेन अधः परिचीयते –

ज्ञानक्रमः-(करणम् प्रमाणम्)+व्यापारः (करणम्+विषयः) ⇨ प्रमा (यथार्थज्ञानम्), करणानि (साधनानि)- इन्द्रियम्, व्याप्तिज्ञानम् सादृश्यज्ञानम्, पदज्ञानम्

प्रमाणानि - प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः

---

* जवाहरलाल नेहरू विश्वविद्यालयः नवदेहली- ६७, crks113@gmail.com

1 न्यायसूत्रसंख्या-1/1/1

व्यापारः – इन्द्रियार्थसन्निकर्षः, परामर्शः, अतिदेशवाक्यार्थस्मरणम्, पदार्थोपस्थितिः

प्रमायाः प्रकारः – प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दबोधः।

**शाब्दबोधस्य अभिप्रायः –**

चतुर्ष प्रत्यक्षादिप्रमेयेष्वन्यतमः अन्तिमः प्रमेयः शाब्दबोधः, शब्दाज्जातः शाब्दः, शाब्दश्चासौ बोधः शाब्दबोधः इति शाब्दबोधः, अर्थात् शब्दनिष्ठशक्तिज्ञानजन्यः बोधः। पदविशेषोपस्थितेन पदार्थेन सह पदान्तरोपस्थितस्य पदार्थस्य यः संसर्गः, तस्य ज्ञानं शाब्दबोधः, अन्वयबोधः, वाक्यार्थबोधो वा। आकाङ्क्षादिविशिष्टशब्द-निष्ठशक्तिज्ञानजन्यबोधः शाब्दबोधः इति हि निष्कृष्टार्थः।

**शाब्दबोधे कारणतासामग्री –**

अस्मिन् शाब्दबोधे पदज्ञानम्, पदजन्यपदार्थस्मरणम्, पदपदार्थयोः संसर्गात्मकं वृत्तिज्ञानम्, आसत्तिः–योग्यता–आकाक्षा–तत्पर्यमित्येतानि सहकारिकारणानि। तेषां मध्ये पदज्ञानं शाब्दबोधे करणम्। करणं च व्यापारवत्। व्यापार[1]श्चास्मिन् शाब्दबोधे पदज्ञानजन्यपदार्थोपस्थितिः, सा च पदार्थोपस्थितिः वृत्तिज्ञानाधीना, वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धरुपा। उक्तश्च –

**पदज्ञानं तु करणं, द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।**[2]

अर्थात्

| | |
|---|---|
| **करणम् (साधनम्)** | **पदज्ञानम्** |
| **व्यापारः** | **शक्तिज्ञानाधीनपदार्थोपस्थितिः** |
| **फलम्** | **शाब्दबोधः** |

अर्थस्त्वेत्थम् तत्र = शाब्दबोधे, पदज्ञानम् = पदविषयकं ज्ञानं, (न तु ज्ञायमानं पदम्[3]) तु = एव, करणम् = साधकतमम्, असाधारणं कारणं वा भवति। पदार्थधीः = पदज्ञानजन्यं तत् पदार्थस्य ज्ञानं तत्पदार्थविषयकं स्मरणम्, द्वारम् = व्यापारः अस्ति। यदि अत्र पदार्थविषयकस्मरणं नोच्येताः तदा पदज्ञानवतः पुरुषस्य प्रत्यक्षादिना पदार्थस्य उपस्थितौ अपि शाब्दबोधो जायेत इत्यापत्तिर्भवेत्।

1. पदजन्यपदार्थस्मरणं व्यापारः।
2. न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्
3. न तु ज्ञायमानं, पदभावेऽपि मौनिश्लोकादौ शाब्दबोधात्।

शब्दबोधः+वाक्यार्थबोधः शब्दसमूहात्मकवाक्यजन्यः योऽस्ति सः, फलम् = प्रमा यथार्थानुभवोऽस्ति।

तत्र = पदजन्ये पदार्थस्मरणरूपे व्यापारे, शक्तिधीः = पदेन सह पदार्थस्य सम्बन्धरूपा या सङ्केताख्या शक्तिः[1] तस्याः, धीः = ज्ञानम्, सहकारिणी = सहकारिकारणं जायते। अत्र पदे शक्तिपदं वृत्तिबोधकम्। वृत्तिश्च शक्तिलक्षणान्यतररूपा।

अस्मात् पदात् अयमर्थो बोद्धव्यः अथवा "इदं पदममुमर्थं बोधयतु" इति पदप्रकारार्थविशेष्यकेच्छारूपशक्तिज्ञानरूपाद्व अर्थप्रकारकपदविशेष्यकेच्छारूपशक्ति-ज्ञानरूपा च सहकारिकाराणं भवतीत्यर्थः सम्पद्यते।

तत्र अस्मात् पदादयमर्थः बोद्धव्यः, इदं पदमिमर्थम् बोधयत् वेति ईश्वरस्य अस्मदीयानां वेच्छा शक्तिः, शक्तिग्रहश्च व्याकरणादिभ्यो ज्ञायते –

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥**[2]

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाखवति। क्वचित्सति बाधके त्यज्यते। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरूच्यते। चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्य अभेदान्वयः। स च नैयायिकैःगौरवात्त्यज्यते। कृतिश्चैत्रादौ प्रकारीभूय भासते। व्यापारेऽपि न शक्तिः गौरवात्। रथे गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा।

पदज्ञानं शक्तिरूपया लक्षणरूपया वा वृत्त्या पदार्थमुपस्थापयति। ततः शाब्दबोधः भवति। अस्मिन् शाब्दबोधे **आसत्तिज्ञानं-योग्यताज्ञानं-आकाङ्क्षाज्ञानं- तात्पर्यज्ञानं** च कारणमिति प्राचीनाः वदन्ति। यत्पदार्थस्य यत्पदार्थेन अन्वयः अपेक्षितः तयोः अव्यवधानेन उपस्थितिरासत्तिः, एकपदार्थेन अपरपदार्थसम्बन्धः, येन पदेन विना यत्पदार्थस्य अन्वयानुपपत्तिः, तेन पदेन सह तस्य पदस्य आकाङ्क्षा, वक्तुरिच्छा तात्पर्यम्।

नव्यानां मते तु शाब्दबोधे एतेषामसत्त्यादीनां कारणत्वं नास्ति। तेषां मते पदज्ञानं पदजन्यपदार्थस्मरणं चेत्येतद्वयमेव शाब्दबोधे क्लृप्तं कारणम्। अस्मिन्

1. वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा च अस्मात् पदात् अयमर्थः बोद्धव्यः इतीश्वेराच्छा। आधनुके नाम्नि शक्तिरस्त्येव "एकादशेऽहनि पिता नाम कुर्यात्'' इतीश्वरेच्छायाः सत्त्वात्। आधुनिकेसङ्केतिते तु न शक्तिः इति सम्प्रदायः किंत्विच्छैव, तेनाधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहुः पदज्ञानस्य हि एकसम्बन्धिज्ञानविधया पदार्थोपस्थापकत्वम् (न्यायसिद्धान्तमुक्तावली, शब्दखण्डः)
2. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः

वाक्यार्थबोधे पदैरुपस्थितानां पदार्थानाम् परस्परसम्बन्धपदैरेव ज्ञायते, अन्यथा महती विप्रतिपत्तिरस्ति विदग्धानाम्।

**आकाङ्क्षादीनां विवरणं संक्षेपतः अधः उपस्थाप्यते –**

**आकाङ्क्षा**– न्यायसिद्धान्ते तावत् आकाङ्क्षाविषये विलसन्ति बह्व्यः विप्रतिपत्तयः– तत्र उदयनाचार्यः आकाङ्क्षा तावत् जिज्ञासां प्रति योग्यता। मणिकारस्तु यस्य पदस्य यदभावप्रयुक्तस्वार्थान्वयाननुभावकत्वं तस्य पदस्य तदनुभावकत्वमेव आकाङ्क्षा। न्यायसिद्धान्तमुक्तावलीकारैः विश्वनाथाचार्यैरुच्यते– ''यत्पदेन विना यस्याननुभावकता भवेत्[1] आकाङ्क्षा'' अर्थात् समभिव्याहृतपदनिष्ठशाब्दबोध-जनकत्वाभावः यत् पदाभावप्रयुक्तः स समभिव्याहृतपदनिष्ठतत्पदनिरूपिता आकाङ्क्षा। अन्नंभट्टस्तु – पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावाकत्त्वमाकाङ्क्षा[2]। अस्याः आकाङ्क्षायाः ज्ञानं शाब्दबोधे हेतुः।

**योग्यता**– एकपदार्थे अपरपदार्थसम्बन्धः योग्यता। पदार्थे तत्र तद्वत्ता योग्यता परिकिर्तिता[3]। जलेन सिञ्चति वृक्षमित्यादौ जले सेचनकारणतायाः सम्बन्धात् शाब्दबोधः। "वह्निना सिञ्चति'' इत्यत्र तु सेचनं वह्निकरणत्वं च इत्यनयोः सम्बन्धो नास्तीति योग्यताभावात्, न शाब्दबोधः। अन्नम्भट्टपादेन– "अर्थाबाधः योग्यता''[4] इति।

**आसत्तिः**– आसत्तिर्नाम पदयोः सन्निधिः, अविलम्बेनोपस्थितिः, "सन्निधानं तु पदस्यासत्तिरुच्यते[5]।'' पदानामविलम्बेनोच्चारणं सन्निधिः[6] इति अन्नम्भट्टपादाः। ययोः पदयोः परस्परमन्वयबोधः इष्यते तयोः पदयोः कालेन पदान्तरेण वा अव्यवधानं शाब्दबोधे कारणम्। यथा अश्वो चलति इत्यत्र अश्वपदेन चलतिपदस्य आसत्तिः अस्ति तज्ज्ञानात् शाब्दबोधः भवति।

**तात्पर्यम्** – "वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्''[7] इति मुक्तावलीकारः। अत्र वक्तृपदमभिसन्धातृबोधकम् न तु उच्चारयितुः, तस्मात् मौनिश्लोकादौ न अतिव्याप्तिः। अभिसन्धात्रा यद् वाक्यार्थत्वेनाभिप्रेतं तदेव तात्पर्यम् इति पर्य्यवसितम्, तज्ज्ञानं शाब्दबोधे कारणम्। यदि तात्पर्यज्ञानं कारणं न स्यात् तदा सैन्धवमानय

1. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः
2. तर्कसंग्रहः, शब्दपरिछेदः
3. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः
4. तर्कसंग्रहः, शब्दपरिछेदः
5. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः
6. तर्कसंग्रहः, शब्दपरिछेदः
7. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः

इत्यादिना युद्धयात्राप्रकरणे अश्वस्य भोजनप्रकरणे च लवणस्य बोध इति नियमो न स्यात्।

शाब्दिकानां मतमिहोपस्थाप्यते

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्''**[1]

फलव्यापारौ धात्वर्थौ। तिबादिप्रत्ययाः आख्यातवाचकाः अतः आख्यातः तिङर्थः कर्ता/कर्म (आश्रयः)। **शाब्दबोधः व्यापारमुख्यविशेष्यकः**[2] भवति। अत्र विशेषेण इदं ध्यातव्यं यत् वैयाकरणाः फलविशिष्टव्यापार एव धात्वर्थः अर्थात् फलविशिष्टव्यापाररूपार्थे धातोरखण्डशक्तिं मन्वन्ते। तेषां नये कर्तृप्रत्ययसमभिव्याहारे (कर्तृवाच्ये) कर्मप्रत्ययसमभिव्याहारे (कर्मवाच्ये) उभयत्र एवैऽव **व्यापारमुख्यविशेष्यकशाब्दबोधः**, फलविशिष्टव्यापारस्य धात्वर्थत्वात्। नव्यास्तु (नागेशादयः) **"सुप आत्मनः क्यच्''**[3] सूत्रस्य भाष्यमादृत्य धातोः पृथक् पृथक् (खण्डशः) शक्तिं स्वीकृत्य फलमपि स्वतन्त्रतया धात्वर्थः, व्यापारोऽपि स्वतन्त्रतया धात्वर्थः इति मत्वा तस्मात् कर्तृवाच्ये कर्मवाच्ये पृथक् पृथक् शाब्दबोधः इत्यङ्गीकुर्वन्ति। इदानीन्तावत् प्रथमं कर्तृप्रत्ययस्थले शाब्दबोधः विचार्यते। "सुप आत्मनः क्यच्" इति सूत्रस्थभाष्यमवलम्ब्य कर्तृप्रत्ययस्थले **व्यापारार्थमुख्यविशेष्यक-शाब्दबोधं**, कर्मवच्ये **फलमुख्यविशेष्यकशब्दबोधं** स्वीकुर्वन्ति नव्याः। तस्मात् "देवदत्तः ओदनं पचति'' **''देवदत्ताभिन्नैककर्तृकः ओदनकर्मकः वर्तमानकालिकः विक्लित्यनुकूलव्यापारः"** इत्ययं शाब्दबोधः भवति नव्यानुसारेण।

कर्मवाच्ये फलस्य प्राधान्यात्, ''देवदत्तेन ओदनः पच्यते'' इत्यस्य **देवदत्तवृत्तिवर्तमानकालिकव्यापारजन्याविक्लित्तिरिति** शाब्दबोधमङ्गीकुर्वन्ति नव्यशाब्दिकाः। प्राचीनास्तु उभयत्र व्यापारमुख्यविशेष्यक एव शाब्दबोधमङ्गीकुर्वन्ति। तिङर्थः-कर्तृकर्मसङ्ख्याकालाः। तत्र कर्तृकर्मणी फलव्यापरयोर्विशेषणे। सङ्ख्या कर्तृप्रत्यये कर्तरि कर्मप्रत्यये कर्मणि, समानप्रत्ययोपात्तत्वात्। कालस्तु व्यापारे विशेषणम्।

**व्यापारत्वम् नाम**- फलप्रयोजकक्रियात्वं व्यापारत्वम्। तजन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम्। पदान्तरसमभिव्याहारप्रयोज्य- साध्यत्वप्रकारक-प्रतीतिविषयत्वं व्यापारत्वम्। अत एव उक्तम् -

---

1. वैयाकरणभूषणसारः, धात्वर्थनिर्णयः
2. वैयाकरणभूषणसारः, धात्वर्थनिर्णयः
3. अष्टाध्यायी - 3.1.8

**असत्त्वभूतभावस्तु तिङ्पदेनाभिधीयते।**
**सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते॥**[1]

अत्र सर्वत्र फलत्वम् नाम अन्येच्छानधीनेच्छाविषयत्वमिति यावत्। तदुक्तं हरिणा –

**यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।**
**तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम्॥**[2]

कर्तृप्रत्ययसमभिव्याहारे तद्धातुजन्यशाब्दबोधीयधात्वर्थनिष्ठविशेष्यता-निरूपितप्रकरताश्रयत्वे सति तद्धातुवाच्यत्वं फलत्वम्। धातुनिष्ठवृत्तिविशिष्टत्वम्-वैशिष्ट्यंचस्वज्ञानजन्योपस्थितिविषयत्वम्, स्वज्ञानजन्योपस्थितिविषयव्यापारविशिष्टत्वम्, इत्युभयसम्बन्धेन, व्यापारविशिष्टत्वश्च स्वजन्यत्वप्रकारकप्रतीतिविषयत्वम्, स्वप्रयोज्यत्वप्रकारकप्रतीतिविषयत्वम्, एतदन्यतरसम्बन्धेन। यद्यपि व्यापारः क्रियापर्यायवाचकः तथापि उभयोरस्ति कश्चन मौलिकः भेदः। स त्वयमेव यत् क्रियाशब्दः नानव्यापारसमूहवाचकः। तस्मात् एका क्रिया नानावान्तरव्यापारवाचिका। अतः पाकक्रियायां युक्तो जनः जलानयनकाले फूत्करादिसमयेऽपि सर्वत्र पाकमेव करोमीति वदति। क्रिया एका एव तथापि अयं बुद्धिकल्पित एव भेदः। उक्तश्च –

**गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।**
**बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते॥**[3] इति॥

शाब्दिकानां शाब्दबोधबिषयकप्रत्ययानामिह विस्तरेण विवेचनमुपस्थाप्यते –

**व्यापारमुख्यविशेष्यकशाब्दबोधः**

वैयाकरणास्तावद् एवं मन्यन्ते–कारकाणां क्रियायामन्वय इत्यनुभवात् क्रियापदे प्रायः सुबन्तानामन्वयः इति ज्ञायते। "नीलोत्पलमानयती" त्यत्र समासार्थस्य नीलत्वविशिष्टोत्पलस्य द्वितीयार्थे कर्मणि तस्य धात्वर्थे आनयनेऽन्वय इति नीलत्वविशिष्टोत्पलकर्मकमानयनमिति शाब्दबोधः भवति।

तथैव ''नीलमुत्पलमानये" इति व्यासस्थले नीलकर्मकमानयनम्, उत्पलकर्मकमानयनम्, इति पृथक् पृथक् बोधस्य अनुभवाद् द्विः कर्मत्वभानम्

---

1. वाक्यपदीयम् - 2/115
2. वैयाकरणभूषणसारः (दर्पणटीका),धात्वर्थनिर्णयः
3. वैयाकरणभूषणसारः, धात्वर्थनिर्णयः

विहाय समानाधिकरणयोः नीलोत्पलपदयोः नीलत्वविशिष्टोत्पलरूपैकार्थपरत्वम् अङ्गीकृत्य तस्य धात्वर्थे आनयने द्वितीयार्थकर्मत्वद्वारा अन्वयस्वीकारात् नीलत्वविशिष्टोत्पलकर्मकमानयनमित्येव शाब्दबोधः। एवं च सविशेषणानां विशेषरहितानां वा अतिरिक्तानां सर्वेषां कारकाणां धात्वर्थक्रियान्वयस्य नैयायिकादिभिरपि स्वीकृतत्वात् प्रथमान्तार्थस्य कर्तृकारकस्यापि तत्रैवान्वयः उचितः समानन्यायात् तथा च ''देवदत्तः नीलोत्पलमानयती'' त्यत्र द्वितीयार्थः कर्म। तत्र प्रकृत्यर्थस्य अभेदसम्बन्धेन अन्वयः। कर्मणः धात्वर्थेऽन्वयः। तिङः कर्ता अर्थः। तत्र अभेदसम्बन्धेन प्रथमान्तार्थस्य देवदत्तस्य अन्वयः। कर्तुरपि धात्वर्थे आनयनेऽन्वयः। तथा च नीलत्वविशिष्टोत्पला-भिन्नकर्मकं देवदत्ताऽभिन्नकर्तृकं चानयनमिति धात्वर्थमुख्यविशेष्यान्वयबोधो भवति। अत्र विषये उपपत्तिं प्रतिपादयति – निरुक्तकारः "चत्वारि पदजातानि नामाख्यातोपसर्ग-निपाताश्च''[1] इत्युपक्रम्य ''सत्त्वप्रधानानि नामानि''[2] आख्यातलक्षणं च निरूपयति।

**प्रकरणमिदं प्रकारान्तरेण एवमप्युपस्थापयितुं शक्यते[3] –**

धातुप्रकृत्यादीनां शक्तिग्रहो व्याकरणाज्जायते। सति बाधके क्वचित् व्याकरणात् गृहीता शक्तिः त्यज्यते। यथा – **वैयाकरणाः आख्यातस्य-तिङः, कर्तरि शक्तिं स्वीकुर्वन्ति।** तन्न नैयायिकेरङ्गीक्रियते। यतो हि तेषां मतेन "चैत्रः पचति" इत्यादौ कर्त्रा सह चैत्रस्य अभेदेनान्वयो भवति। तत्र गौरवं भवति। अयमाशयो वर्तते यत् –

''**लः कर्मणि च भावे चाकर्मकेभ्यः**''[4] इति सूत्रे कर्तरि कृत् इत्यतः कर्तरि इति अनुवर्तते। तेन सकर्मकेभ्यो धातुभ्यः लकाराः कर्तृवाचकाः कर्मवाचकाश्च भवन्ति। अकर्मकेभ्यो धातुभ्यश्च लकाराःकर्तृवाचकाः भाववाचकाश्च भवन्ति। भाववाचकत्वं नाम निरर्थकत्वमेव अर्थात् तिङादिप्रत्ययानां कर्तृकर्मभाववाचकत्वम्। एवं तत्र तत्र कर्तृदौ तिङादीनां शक्तिग्रहः।

**विभक्तीनां सुबन्तानां च** – द्वितीयातृतीयासप्तमीनाम् आश्रयः अर्थः। एवमेतासां विभक्तीनाम् आश्रयेऽर्थे शक्तिग्रहः। **"क्रियाजन्यफलाश्रयः कर्म**'' इत्यत्र द्वितीयायाः शक्तिग्रहः। धात्वर्थः व्यापारः फलं चेति। धात्वर्थव्यापाराश्रयः कर्ता इति कर्तुः, कर्तरि तृतीयायाःसप्तम्याश्च आश्रयोऽर्थः इति।

सप्तम्याः आश्रयः आधारोऽधिकरणमित्यनेन अधिकरणम्, तत्राश्रये शक्तिग्रहः, पञ्चम्याः अवधौ अर्थे शक्तिग्रहः, चतुर्थ्याःउद्देश्ये सम्प्रदाने शक्तिग्रहः, षष्ठ्याश्च

1. निरुक्त, प्रथमोऽध्यायः
2. निरुक्त, प्रथमोऽध्यायः
3. निरुक्त, प्रथमोऽध्यायः
4. अष्टाध्यायी 3.4.69

सम्बन्धेऽर्थे शक्तिग्रहः इति विभक्तीनां शक्तिरेवार्थोऽस्ति। स्वादिप्रत्ययानाम् एकत्वद्वित्वबहुत्वेषु शक्तिः। समासादिवृत्तीनां च प्रातिपदिकत्वेन तत्रापि शक्तिग्रहः। इत्थं, वैयाकरणनये चैत्रस्तण्डुलं पचति चैत्रेण तण्डुलः पच्यते, मैत्रः तिष्ठति, मैत्रेण स्थीयते इत्यादिषु उदाहरणेषु क्रमशः तिपः शप्प्रत्ययसमभिव्याहारे कर्ता इत्यर्थः। पच्यते इत्यत्र तिङः यक्समभिव्याहारे कर्ता इत्यर्थः। तिष्ठति इत्यत्र तिङः कर्ता इत्यर्थः। स्थीयते इत्यत्र तिङः भावार्थकत्वात् निरर्थकत्वं धातरिवार्थस्य कथनात् सिद्ध्यति। आख्यातार्थयोः कर्तृकर्मणोः प्रथमान्तार्थेन सह अन्वयं विधाय धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधं वैयाकरणाः कथयन्ति। तिङ्पदार्थश्च कर्ता कर्म संख्या कालश्च। धात्वर्थः फलं व्यापारश्च तिप्रत्यार्थस्य कर्तुः (कर्तरिप्रत्यये) संख्यायाश्च चैत्रेण सह अभेदान्वयः, कालश्च व्यापारे विशेषणत्वेनान्वेति।कर्माख्याते तिङर्थस्य कर्मणः संख्यायाश्च तण्डुलेन अन्वयः।

चैत्रः तण्डुलं पचतीत्यस्य **चैत्राभिन्नैककर्तृकः तण्डुलभिन्नकर्मकः वर्तमानकालिकः विक्लित्यनुकूलव्यापारः** इति शाब्दबोधः। चैत्रेण तण्डुलः पच्यते इत्यस्य **चैत्राभिन्नैककर्तृनिष्ठव्यापारजन्या तण्डुलाभिन्नैकत्वावच्छिन्नाश्रय- निष्ठा वर्तमान्कालिका विक्लित्तिः** इति शाब्दबोधो भवति।

चैत्रस्तिष्ठति – चैत्रेण स्थीयते इत्यनयोः **“चैत्राभिन्नैककर्तृका स्थितिः”** इत्येव शाब्दबोधः।

निगमनम् - वैयाकरणानां नैयायिकानां च शाब्दबोधप्रक्रिया परस्परं सायुज्यैव पूर्यते। मुक्तावलीकारानुसारेण शाब्दबोधफलप्राप्तये साधनव्यापारफलानि च आवश्यकम्। तत्र साधनव्यापाराभ्यामन्तरेण नैव प्राप्तुमहर्ति फलम्। साधनं तु पदज्ञानं व्यापारञ्च पदार्थज्ञानं स्मरणं वा। वाक्यार्थबोधे तिङ्‌र्थस्तुविशेषतयोक्तम्। वैयाकरणास्तु सिद्धे शब्दार्थसम्बन्धे इति राद्धान्तेन बलेन शब्दार्थयोस्तु नित्यं स्वीकुर्वन्ति।

**आकरग्रन्थाः –**

1 भर्तृहरि, (सं. -रघुनाथ शर्मा) वाक्यपदीयम्, 1980, वाराणसी, संपूर्णानन्दसंस्कृतविश्वविद्यालयः।

2 पतञ्जलि, (सं, भार्गव शास्त्री जोशी), व्याकरण-महाभाष्यम्, 1991, दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान।

3 पाणिनि, अष्टाध्यायी, 2003, दिल्ली, मोतीलाल बनारसीदास प्रकाशन।

4 गौतम, न्यायदर्शनम्, 1985, दिल्ली, मुंशीराम मनोहरदास पब्लिशर्स।

5 विश्वनाथपञ्चाननभट्टाचार्य (सं. श्रीशङ्कररामशास्त्री), न्यायसिद्धान्तमुक्तावली। (प्रभामञ्जूषासहिता), 1988, दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान।

6 विश्वनाथपञ्चाननभट्टाचार्य (सं. श्रीआत्मराम शर्मा), न्यायसिद्धान्तमुक्तावली (दिनकरीरामरूद्रीसहिता), 2012, दिल्ली, राष्ट्रीय संस्कृत संस्थान।

7 कौण्डभट्ट, वैयाकरणभूषणसारः, 2012, वाराणसी, चौखम्बा सुरभारती प्रकाशन।

8 अन्नम्भट्ट, तर्कसंग्रहः, 2015, वाराणसी, चौखम्बा सुरभारती प्रकाशन।

9 यास्क, निरूक्त, 2003, अजमेर, परोपकारिणी सभा।

✦✦✦

 ISSN : 0975-1769

# अच्युतानन्ददासकृतशून्यसंहितायाः योगतत्त्वविश्लेषणम्

डॉ. सुव्रतषडङ्गी *

**प्रस्तावना**

संस्कृतभाषा देवभाषा कथ्यते। संस्कृतभाषायां मानवसंस्कृतेरितिहासः सुरक्षितोऽस्ति। इयं संस्कृतभाषाऽन्याभ्यः सर्वाभ्योऽपि भाषाभ्यः प्रकारे विस्तारे च महती, सौन्दर्ये विचारपवित्रतायां चान्यूना विद्यते। सत्यपि मन्दतमे विकासक्रमे क्रमोपनते च बाधासमुदये इतिहासारम्भसमयत एव संस्कृतभाषा विश्वस्यान्यासां भाषाणां समतां कुर्वती समायाति। अन्याभिर्विश्वस्य भाषाभिरस्याः प्रतिस्पर्धा गुणगणकृतैव। भारतेऽजायन्त विविधानि सामाजिकपरिवर्तनानि, धार्मिकाण्युत्थानपतनानि वैदेशिकानामाक्रमणानि च, तथाऽपि संस्कृतं सर्वदा समभावेन सर्वत्र व्यवहरणीयं वर्त्तते। संस्कृतवाङ्मये स्थितेषु शास्त्रेषु योगदर्शनं विशिष्टस्थानं वैलक्ष्यण्यभावं च सर्वदा प्रकटयति।

**योगतत्त्वम्**

भारतीयदर्शनस्य प्रायोगिकमुख्योऽयं योगः। यत् पतञ्जलिः मानवानां कल्याणाय उपदिष्टवान्। मानवस्योत्पत्तिः किमपि परमलक्ष्यं संसाधनार्थं वर्त्तते। आधुनिके समाजे परन्तु जीवनस्य चरमोद्देश्यं प्रति स्वस्य मनसः सम्प्रेषणं न कोऽपि करोति। लक्ष्यच्युतमानवानामन्तःकरणं दूषितमभवत्, अन्तरात्मा चाकुलीभूता वर्त्तते, जीवानां जीवनमत्यन्तं कष्टदायकमस्ति। अतो योगदर्शनस्य प्रसक्तिरधुना समाजे दृश्यते। शास्त्रेभ्यो विरक्ता जनाः कथं पुनः शास्त्रं प्रति समायास्यन्ति तदर्थं ज्ञानिनः प्रायोगिकयोगस्य प्रचारं कृतवन्तः। योगमाध्यमेन जनाः विस्मरणविषयस्य पुनः स्मरणं करिष्यन्ति। कलुषितसंसारादात्मानं निर्मलं करिष्यन्ति। योगदर्शनमादौ बाह्यशुद्धिमुपदिश्य ततोऽन्तःशुद्धिमुपदिशति। अन्तःशुद्धिप्रसङ्गे चित्तस्य शुद्धिरत्यन्तं महत्त्वपूर्णमस्ति। चित्तशुद्धिनिमित्तं योगोचितानामष्टाङ्गानां प्रदर्शनं तेषामनुष्ठानञ्चानिवार्यं वर्त्तते। योगाङ्गानामनुष्ठानेन अन्तर्मलस्य प्रक्षालनं ज्ञानदीप्तेरभिव्यक्तिश्च जायते। ततो मानवः स्वाभीष्टलक्ष्यं प्राप्तुं शक्नोति। तानि योगाङ्गानि यथा –

---

* शोधसहायकः, केन्द्रीयसंस्कृतविश्वविद्यालयः

**"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि"** इति।।[1]

तदुक्तम्- यम - नियम - आसन - प्राणायाम - प्रत्याहार - धारणा - ध्यान - समाधय इत्यादीनामाचरणेन मानव आनन्दं सुखपूर्णजीवनं प्राप्नोति।

तेषु यमा यथा-

**"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः"।।** इति।।[2]

अहिंसा - सत्य - अस्तेय - ब्रह्मचर्य - अपरिग्रहा एते पञ्च यमा योगस्य साधका भवन्ति।

शौचं सन्तोषस्तपः स्वाध्याय ईश्वरप्रणिधानञ्च इति एते पञ्च नियमा भवन्ति। तदुक्तं सूत्रकारेण -

**"शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः"।।** इति।।[3]

एतेषां नियमानां सश्रद्धमनुष्ठानेनावश्यं योगसिद्धिः सम्भवति। योगसाधनेऽहिंसादयो यमाः निवृत्तिमूलकाः,एवञ्च शौचादयो नियमाः प्रवृत्तिमूलका भवन्ति।

ततः **"स्थिरसुखमासनम्"।।** इति।।[4]

अर्थात् निश्चलं सुखावहं च यदासनं तद् योगाङ्गमित्यर्थः। आस्यतेऽनेनेत्यासनम्। सुखपूर्वकं निश्चलमनसा उपवेशनमासनम्। आसनानामाचरणेन रोगाद्विमुक्तिर्भवति मनुष्यस्य। तद् द्विविधं बाह्यं शारीरं च। तत्र वस्त्र-धर्म-कुशादिनिर्मितमासनं बाह्यम्। शारीरं पद्मस्वस्तिकादीति विशेषः। योगसाधनेऽऽसनानां भूमिका महत्त्वपूर्णा वर्तते। तेषु पद्मासनं प्रसिद्धम्। आसनजयात् शीतोष्णादिभिस्ताडनं न भवति। सम्प्रत्यासन-साध्यप्राणायामः। उच्यते पतञ्जलिना-

**"तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः"।।** इति।।[5]

प्राणायाम इत्युक्ते प्राणानाम् आयामःप्राणायामः। तथोक्तं ज्ञानार्णवे-

**"कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम्।।**
**प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना।।** इति।।[6]

---

1. यो.सूत्रम्. २-२९
2. यो.सूत्रम्. २-३०
3. यो.सूत्रम्. २-३२
4. यो.सूत्रम्. २-४६
5. यो.सूत्रम्. २-४९
6. ज्ञानार्णवः

प्राणायामः प्रणववाचकः। यथा - अ-उ-म इत्यक्षराणां मेलनं ॐ इत्यनुभवः। अनुरूपं रेचकपूरककुम्भकाः साक्षात् प्रणववाचकाः।

**ततः "स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानूकार इवेन्द्रियाणां प्रत्याहारः॥** इति।।[1]

इन्द्रियाणां विषयात् तत्त्वाभिमुखीकरणं प्रत्याहारः। प्रत्याहारादिन्द्रियाणां परमा वश्यता भवति।

एवं योगस्य बहिरङ्गयमादिपञ्चावयवं निरूपितम्। सम्प्रति धारणादित्रितय-मन्तरङ्गमुच्यते।

**तत्र 'देशबन्धश्चित्तस्य धारणा॥** इति।।[2]

नाभिचक्रहृदयनासाग्रादौ देशे संप्रज्ञातयोगसिद्धये चित्तस्य यो बन्धः स्थिरीकरणं सा " धारणा।

**"तत्र प्रत्ययैकतानता ध्यानम्"॥** इति।।[3]

अर्थात् परमेश्वरे मनः संस्थापनपूर्वकं तदैकमनसा चिन्तनं ध्यानम्। अधुनान्तिमाङ्गं समाधिरुच्यते-

**"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः"॥** इति।।[4]

अतिस्वच्छचित्तवृत्तिप्रवाहरूपं ध्यानमेवार्थमात्रस्वरूपेण निर्भासमानं समाधिः। भोजमहाराजेन समाधिविषये उक्तम्-

**"सम्यगाधीयत एकाग्री क्रियते विक्षेपान्परिहृत्य मनो यत्र स समाधिः"** ।। इति।।

एतेषु प्रयोगेषु यदि योगः, अर्थात् परब्रह्मणो ज्ञानं न भवति। तदा एकमेवोपायः ईश्वरप्रणिधानम्। सूत्रकारेण उक्तम्-

**"ईश्वरप्रणिधानाद्वा"॥** इति।।[5]

ईश्वरप्रणिधानन्तु परमेश्वरे सम्पूर्णकर्मार्पणम्। अत उच्यते-

**"ज्ञानतोऽज्ञानतो वाऽपि यत्करोमि शुभाशुभम्।**

---

1. योण्सूत्रम्. २-५४
2. योण्सूत्रम्. ३-१
3. योण्सूत्रम्. ३-२
4. योण्सूत्रम्. ३-३
5. योण्सूत्रम्. १-२३

**तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥**

**कर्मणा मनसा वाचा या चेष्टा मम नित्यशः।**
**केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि"॥** इति।।[1]

**"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच"**।। इति।।[2]

नित्यनिरतिशय सुखप्राप्तये प्रोक्तेषु शास्त्रीयोपायेषु योगशास्त्रोक्ता उपाया मानवेषु मोक्षप्राप्तये उत्कर्षभावमानयन्ति। योगदर्शने कैवल्योद्देश्येन साधकमृद्धिमन्तं कर्तुमष्टाङ्गयोगस्य भूमिका महत्त्वपुर्णा वर्तते।

**शून्यसंहितोक्ततत्त्वं योगतत्त्वम्-**

महापुरुषाच्युतानन्दो योगस्य पराकाष्ठास्वरूपं प्रतिपादितवान्। पातञ्जलदर्शने यथा योगस्वरूपम्, योगस्याष्टाङ्गमार्गाः प्रदर्शिताः तथैव कविः गदति स्वशास्त्रे शून्यसंहितायां यथा-

**"अष्टाङ्ग योग विचार कहि देवा शुण।**
**आठगोटि स्थान एहु शरीरे सन्धान"॥** इति।।[3]

कविरष्टाङ्गं शरीरे स्थितानां स्थानानामिन्द्रियाणां वा स्वरूपमिति चिन्तयति। योगः शरीराङ्गानां स्थिरीकरणमिति च सूच्यते।

**"मुख नासा चक्षु कर्ण एहि चारिद्वार।**
**वेनि वेनि होइ आठ अटे निराधार॥**

**एहि थानमानकु अष्टाङ्ग से कहि।**
**सद्भिरस्तु चारिक्षर सेहिथाने रहि"॥** इति।।[4]

मन्त्ररूपोऽयं योगसिद्धान्तः ध्यानस्य मन्त्ररूपत्वं प्रतिष्ठापयति।

**"चारि वेदमाता गयत्रीकि घेनि।**
**परर जश शबद अष्टाक्षर पुणि"॥** इति।।[5]

पातञ्जलयोगशास्त्रस्य राजयोगप्रकरणे कायशुद्धिप्रक्रियाऽस्ति। राजयोगस्य लक्ष्यमस्ति कायसाधना योगसाधना इत्यनयोः समन्वयेन प्राणशक्तेः गतिः परब्रह्मणि

---

1. मणिप्रभा.पृ.सं.१११
2. श्रीमद्भगवद्गीता. १८-६६
3. शून्यसंहिता
4. शून्यसंहिता
5. शून्यसंहिता

संस्थापनम्। मेरुदण्डस्य अन्तस्तिस्त्रः नाड्यस्सन्ति। मध्यभागस्य नाम सुषुम्ना। एतस्याः पार्श्वद्वये इडापिङ्गलाया अवस्थितिः। योगसाधनायाः प्रमुखा नाडी सुषुम्नेति। उच्यते यथा–

**"सुषुम्नार चक्रपरे अनेक अन्तरे।**
**अछन्ति राहासे मञ्जि अनाम अक्षरे॥**
**चौराशिसहस्त्र कोशभूमि आयतन।**
**से भूमिरे लीला करुछन्ति वेनिजने"॥** इति॥[1]

**दार्शनिकतत्त्वानां परस्परं तोलनम्–**

योगशास्त्रप्रस्थानस्य विशिष्टाङ्गभूततत्त्वमष्टाङ्गं योग इति। राजयोगः, हठयोगः इत्यादीनां विवर्णनपुरस्सरं पातञ्जलसूत्रोक्तविषयाणामपि प्रतिपादितवानयं महापुरुषः। अष्टाङ्गयोगसाधनया परब्रह्मजगन्नाथस्य सामीप्यं प्राप्नोति मानवः। मानवस्य कलुषाणां पापानां वा विनाशो भवति। तदेव योगदर्शनस्य बहिरङ्गसाधनायां प्रतिपादितं वर्त्तते।

**अनुसन्धानदिशा तेषाञ्च तत्त्वानां समीक्षणम्–**

महापुरुषाच्युतानन्दस्य शून्यसंहितायां योगस्याष्टाङ्गानि समन्वितानि सन्ति। महर्षिपतञ्जलिना प्रतिपादिते योगदर्शने यथा योगाङ्गानां परिव्याप्तता, यथा च तेषां प्रायोगिकता विद्यते तथैव अच्युतानन्देनापि स्वशून्यसंहितायां प्रत्यपादि। योगस्यापूर्वाङ्गत्वं मानवजीवनेऽस्तीति कविमतम्।

**ग्रन्थऋणम्**

1. शून्यसंहिता – श्री अच्युतानन्ददासः, धर्मग्रन्थ ष्टोर्
2. श्रीमद्भगवद्गीता – गीताप्रेस, गोरखपुर
3. योगसूत्रम् – भगवान् पतञ्जलिः, चौखम्बा प्रकाशन, दिल्ली
4. मणिप्रभा – चौखम्बा प्रकाशन, दिल्ली

✦✦✦

1. शून्यसंहिता

 ISSN : 0975-1769

# विवेकविलासे प्रतिपादितानाम् आयुर्वेदतत्त्वानां समीक्षणम्

**डॉ. भवानी शंकर शर्मा***

विवेकविलासस्य उल्लाससंक्षेपेषु दृष्टः अयं ग्रन्थः मनुष्यस्य बाल्यात्प्रभृति मरणपर्यन्तं कीदृशं जीवितं विहितव्यमिति। अयन्तु आयुर्वेदशास्त्रेणापि सम्बद्धो वर्तते। अत एव ग्रन्थेऽस्मिन् जीवितोपयोगीनि आयुर्वेदतत्त्वानि सन्ति। तत्र दिनचर्या ऋतुचर्या च साक्षात् आयुर्वेदेन सम्बद्धा विद्यते। जन्मचर्यायामपि तत्र-तत्र आयुर्वेदतत्त्वानां प्रतिपादनमस्ति। तेन चास्मिन्नध्याये विवेकविलाासे प्रतिपादितानाम् आयुर्वेदतत्त्वानां समीक्षणं विधीयते।

आयुः यत्रोक्तं सः आयुर्वेदः। आयुषो वेदः आयुर्वेदः इत्यर्थः। वेद इत्यत्र विदधातुः ज्ञानार्थे प्रयुक्तः। इदञ्च् आयुः हिताहितं सुखं दुःखमिति चतुष्प्रकारम्। तस्य आयुषः हिताहितस्य प्रमाणस्य च यत्र प्रतिपादनं वर्तत स आयुर्वेदः। तदुक्तं चरकसंहितायाम् -

**हिताहिंत सुखं दुःखमायुस्तस्य हिताहितम्।**
**मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते।। इति**[1] ।।

चतुर्विधस्य आयुषः प्रतिपादनम् दशमहमूलीये ''तत्र शरीरमानसाभ्याम्'' इत्यतः आरभ्य ''अहितमतोविपर्ययेण'' इत्यन्तेन ग्रन्थेन वक्ष्यति।[2] एवञ्च आयुर्वेदयतीत्यायुर्वेदः उच्यते। तत्र आयुरिति शब्देन कोऽर्थः निर्दिष्टश्चेदुच्यते -

**शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम्।**
**नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते।। इति**[3] ।।

शरीरं पञ्चमहाभूतविकारात्मकम् आत्मनो भोगायतनम् भवति। सुखदुःखभोगायतनं शरीरमिति वेदान्तशास्त्रेऽपि प्रसिद्धं वर्तते। इन्द्रियाणि चक्षुरादीनि। सत्त्वं मनः,

---

* अनुदेशकः, केन्द्रीयसंस्कृत विश्वविद्यालय, नवदेहली

1. चरकसंहिता- सूत्रस्थानम् अध्याय 1, श्लोकसंख्या-41
2. दशममूलीयम् - सू.अ. 30
3. चरकसंहिता- सू-अ. 42

आत्मा च ज्ञानप्रतिसन्धाता भवति। एषां सम्यग्योगः संयोगः। सम्यगित्यस्य अदृष्टनियन्त्रित इत्यर्थः। एष एव आयुष्पदवाच्यो भवति। पुनः आयुः धारि अपि भवति। धारयति शरीरं पूतितां गन्तुं न ददातीति धारि आयुर्भवति। आयुष्पदस्य जीवितमित्यपि अर्थो भवति। जीवयति प्राणान् धारयति इति जीवितम्। नित्यं शरीरस्य क्षणिकत्वेन गच्छतीति नित्यगः। अनुबध्नाति आयुरिति अनुबन्धोऽप्युच्यते। एतादृशस्य आयुषः ज्ञानम् आयुर्वेदः। तस्य आयुषः पुण्यतमो वेदः आयुर्वेदः मनुष्याणां कृते इहामुत्र च लोके हितम् आयुर्वेदः वक्ष्यते। ऋग्वेदादयः परलोकहितमेव अर्थं वदन्ति। तेन ते पुण्याः भवन्ति। पुण्यतमश्चायमायुर्वेदः यद्मनुष्याणामुभयोरपि लोकयोः यद्धितम् आयुरारोग्यसाधनं धर्मसाधनं च तद्वक्ष्यते। कायचिकित्साशल्य-शालाक्यकौमार-भृत्यागदतन्त्र-भूतविद्या-रसायन-वाजीकरणाख्यैः अष्टभिः अङ्गैः विभक्तो भवति आयुर्वेदः।

विवेकविलासस्य प्रारम्भात् पञ्च उल्लासेषु दिनचर्या वर्णिताऽस्ति। एवञ्च प्रायः आयुर्वेदशास्त्रानुसारेणैव। अष्टाङ्गहृदये अन्येषु च आयुर्वेदग्रन्थेषु विस्तरेण वर्णिता दिनचर्या एवात्र जिनदत्तसूरिणा निरूपिता। आचार्येण ग्रन्थेऽस्मिन् मनुष्यस्य जीवने उपयोगीनि तत्त्वानि अन्यशास्त्रेभ्य उद्धृत्य प्रतिपादितानि सन्ति। एवञ्चानेन ग्रन्थस्य प्रारम्भे एवोक्तं भवति। तद्यथा -

**ब्रवीमि सर्वशास्त्रेभ्यः सारमुद्धृत्य किञ्चन्।**
**पुण्यप्रसवकृत्स्वर्गापवर्गफलपेशलम्॥ इति[1] ॥**

एवमस्य ग्रन्थस्य प्रयोजनमपि वस्तुत संसारदुःखरूपस्य रोगस्य स्वभावोपरतिः उच्यते। कर्मरूपस्य व्याधेः विनाशकोऽयं ग्रन्थः। आयुर्वेदः केवलं शरीररोगाणां विनाशकः। अयं च ग्रन्थः संसाररोगस्य समस्तस्य विनाशको भवति। अतः अत्र येऽपि सिद्धान्ताः वर्णिताः अन्ततो गत्वा ते सर्वेऽवि आयुर्वेदविषयकाः भवन्ति। तदेवोक्तं –

**अगदः पावकः श्रीदो जगच्चक्षुः सनातनः।**
**एतैरन्वर्थतां यातु ग्रन्थोऽयं पाठकैः सह॥ इति[2]॥**

प्रथमोल्लासे प्रतिपादितेषु विषयेषु बहवः आयुर्वेदसंबन्धिनः सन्ति। पुरुषार्थसिद्धयै इष्टदेवतां ध्यात्वा रात्रेः अष्टमे भाग उद्यतः पुमान् उत्तिष्ठेत् इति प्रारम्भ दिनचर्यैव सम्पूर्णा अत्र प्रतिपाद्यते। प्रभाते उत्थाय प्रथमं शरीरे यदि ददुपवादयः सन्ति तेषां

1. वि.वि 1.8
2. वि.वि 1,11

निष्ठीवनेन निघर्षणं कुर्यात्। एवमेव अङ्गदाढ्र्याय पाणिभ्यां बज्रीकरणमपि कुर्यादिति तदनु आकण्ठं जलं पेयम्। जलपानविषये अष्टाङ्गसंग्रहे उत्त्यते–

**केवलं सौषधं पक्वमामनुष्णं हितं च तत्।**
**समीक्ष्य मात्रया युक्ताममृतं विषमन्यथा।।**

**अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम्।**
**प्रयाति पित्तश्लेष्मत्वं ज्वरितस्य विशेषतः।।**

**वर्धयत्यामतृण्निद्रा तन्द्राध्मानाङ्गगौरवम्।**
**कासाग्निसादहृल्लास प्रसेकश्वासमीनसात् ।। इति[1] ।।**

एतस्य सिद्धान्तस्य अनुसारेणैव प्रभाते आकण्ठं वज्रानामकं जलं पातव्यम् इत्यनेनोक्तम्। मलमूत्रत्यागस्य स्थानं विधिरपि आयुर्वेदग्रन्थेषु यथा कथितं तथैवानेनोक्तं भवति। न वेगान् धारयेत् धीमान् ........इति अष्टाङ्हृदये यः वेगधारणनिषेधः कथितः सः शब्दतः अत्राप्युक्तः। तथाहि –

**वेगान्नधारयेद्वातविग्मूत्रतृट्क्षुतक्षुधाम्।**
**निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम् ।। इति[2] ।।**

शौचाचारः कथं निर्वहेदित्यपि वर्ण्यतेऽनेन। एवमेव क्षुत्शुक्रकृन्मूत्रविचारोऽपि क्रियते। एतषां रोधेन जनानां मतिर्भवेत्। शौचकर्म इव व्यायामोऽपि दिनचर्यायामन्तर्भवति। यस्य शरीरे श्लेष्माधिक्यं वर्तते सः कफनाशाय व्यायामं कुर्यात्। परं जठराग्नौ ज्वलिते सति व्यायामः हानिं जनयति। यावत्पर्यन्तं गात्रस्वेदः नागच्छति तावदेव व्यायामः कार्यः। आत्मनः शक्तेरर्धभाग एव व्यायामः स्यात्। प्रभाते गजाश्वादिभिः सञ्चारोऽपि आरोग्याय उचितः। तदनन्तरं दन्तधावनविधिः आयुर्वेदग्रन्थानुसारेण विस्तरेण प्रतिपाद्यते। स्मृतिषु पुराणेषु अपि एष विधिः विस्तरेण प्रतिपादितोऽस्ति। दन्तधावनकाष्ठः यदि नोपलभ्यते तर्हि द्वादशगण्ड्षः जलेन विहितोऽस्ति। दन्तधावनफलं, दन्तधावननिषेधः केषामिति च आयुर्वेदानुसारेणैव अत्रोक्तं भवति। अष्टाङ्गहृदये प्रतिपादितेन मार्गेण अत्रापि दिनचर्या विस्तरेण वर्णिता अस्ति। दन्तधावनं, नस्यविधिः, गण्डूषविधिः, केशप्रसाधनविधिः, स्नानानतरविधयः च प्रथमाल्लासे आयुर्वेदोक्ताः प्रतिपादिताः। द्वितीयोल्लासेऽपि दिनचर्यैव प्रतिपाद्यते। तत्रादौ स्नानविधिः अभ्यङ्गस्नानविधिः च वर्ण्यते। तृतीयोल्लासे भोजनविधिः वर्ण्यते। आयुर्वेदानुसारेण कदा भोजनं कर्तव्यमित्युक्तं भवत। तदेवात्राप्याह। तद्यथा –

---

1. अष्टाङ्गसङ्गहः– सूत्रस्थानम् 6–32–34
2. वि.वि 1.52

**अग्नावुदीर्णे जातायां बुभुक्षायां च भोजनम्।**
**आयुर्बलं च वर्णश्च संवर्धयति देहिनाम्।। इति[1] ।।**

अजीर्णे जाते पुनरपि भुज्यते चेत् त्रिदोषकोपः अवश्यं भविष्यति। अजीर्णादेव रोगोत्पत्तिर्भवति। स चाजीर्णः रसशेषः, आमः, विष्टब्धः, विपक्वः इति चतुर्विधः भवति। तत्र के के प्रयासाः भवन्तीत्युच्यते –

**रसशेषे भवेज्जृम्भा समुद्गारस्तथामके।**
**अङ्गभङ्गश्च विष्टब्धे धूमोद्गारे विपक्वतः ।। इति[2] ।।**

रसशेषे अजीर्णे जाते सति भोजनात्पूर्वं सुषुप्यात्। आमाजीर्णे सति वमनं विधेयम्। विष्टब्धाजीर्णे स्वेदः क्रियते। विपक्वाजीर्णे जलपानश्च विहितमस्ति। दोषाः यदि स्वस्थानस्थाः भुक्तस्य पाचने जाते च शरीरस्थो वायुः अनुलोमो भवति। तेन च मलमूत्रादीनां स्वाभाविकः मोक्षः भविष्यति। पूर्णतया सहजतया च मलमूत्रत्यागे जाते सति नासिकादिषु छिद्रेषु लाघवत्वप्रतीतिः जायते। भोजनविधिरपि आयुर्वेदानुसारेणैवोक्तमस्ति। अतिप्रभाते सन्ध्यायां रात्रौ अन्ननिन्दां कुर्वन्, गच्छन्, सव्ये पादे करं विन्यास्य, सव्ये हस्ते भोज्ज्यं गृहीत्वा भोजनं निषिद्धं वर्तते। कदापि मुक्ताकाशे, आतपे, अन्धकारे, वृक्षस्याधः, तर्जनीमूर्ध्वं कृत्वा वा भोजनं न कुर्यात्। अधौतमुखहस्थाङ्घ्रिः, नग्नः, मलिनवस्त्रः, वामहस्त अन्नभाजनं गृहीत्वा वा भोजनं न कुर्यात्। एकवस्त्रान्वितः, आर्द्रः, वेष्टितमस्तकः, अपवित्रः न भुज्यात्। उपानत्सहितः व्यग्रचित्तः, केवलभूस्थितः, पर्यङ्कस्थः, विदिड्याम्याननो वा भोजनं न कुर्यात्। कूर्मपुराणे मार्कण्डेयपुराणेऽपि आयुर्वेदानुसारेण भोजनविधिरुक्तो अस्ति। तदनुसारेणैव अत्रापि वर्णितः। तत्र कूर्मपुराणे भोजननिषेधो यथा –

**नान्धकारे न चाकाशे न च देवालयादिषु।**
**नैकवस्त्रस्तु भुञ्जीत् न यानशयनस्थितः।।**

**न पादुकानिर्गतोऽथ न हसन् विलपन्नपि ।। इति[3] ।।**

कीदृशं भोजनं केन प्रकारेण भुज्यादित्यपि विस्तरेणास्मिन् वर्णितमस्ति।[4] विषाहारेण शरीरे के के विकाराः जायन्ते। तेषां सर्वेषामुपचारः कीदृशः इत्यादीनां विचारोऽपि अत्र कृतो वर्तते। एतच्च आयुर्वेदानुसारेणैवोक्तमिति आचार्यस्यास्य

---

1. वि.वि 3.22
2. वि.वि 3.25
3. कूर्मपुराणम्–उपरिभागः 19, 22–23
4. पश्यन्तु वि.वि 3. 42–49

आयुर्वेदवैदुष्यं स्पष्टं भवति। एवं तृतीयोल्लासे चतुर्थप्रहरार्धकृत्यस्य वर्णनसमये आयुर्वेदपरामर्शः बहुत्र लक्ष्यते। चतुर्थोल्लासे सायं सन्ध्यायां विहितस्य भोजनस्य परामर्शो विधीयते। तत्र जैनसम्प्रदायानुसारेण सूर्यास्तात् पूर्वं भोजनं विहितमस्ति। भोजनविधिरपि आयुर्वेददिनचर्यानुसारेण परामृश्यते। पञ्चमोल्लासे रात्रिविहितानां कर्मणां परामर्शः विद्यते। रात्रौ दम्पती पुत्रकाम्यया रतिं कुर्यात्। तत्र पुत्रलाभार्थं पुत्रीलाभार्थं च कथं कस्मिन् समये संभोगः कार्यः इति विस्तरेण आयुर्वेदोक्तविधिना ज्योतिषविधिना च वर्ण्यते। ऋतुकालविधिरपि वर्णितोऽस्ति।[1] मासानुसारेण गर्भस्थितिः अस्मिन् पञ्चमे उल्लासे यद्वर्ण्यते तदायुर्वेदानुसारेणैव भवति। जीवस्य गर्भकाले स्थितिः क्रमेण वृद्धिश्च वर्ण्यते। गर्भे जीवः कियान् कालः तिष्ठति इत्यादि वदति। तद्यथा –

**गर्भे जीवो वसत्येवं वासराणां शतद्वयम्।**
**अधिकं सप्तसप्ताया दिवसार्धेन च ध्रुवम् ॥ इति**[2] **॥**

सप्तसप्त्युत्तरं द्विशतं दिनानि गर्भे जीवः वसति। गर्भप्रसवनिरूपणं सर्वमेतत् आयुर्वेदानुसारेणैव वर्णितमस्ति। अतः जिनदत्तसूरिः आयुर्वेदवेत्ता आसीदित्यनुमातुं शक्यते। निशाकाले निद्रा कथमागच्छतीति आयुर्वेदशास्त्रानुसारेण अत्रोक्तं भवति। तद्यथा –

**अनादिप्रभवा जीवो तमोहेतुतुस्तमोमयी।**
**प्राचुर्यात्तमसः प्रायो निद्राप्रादुर्भवेन्निशि॥**

**श्लेष्मावृत्तानि स्त्रोतांसि श्रमादुपरतानि च।**
**यदाक्षीणि स्वकर्मभ्यस्तदा निद्रा शरीरिणाम्॥ इति**[3] **॥**

यदा इन्द्रियाणि श्रमवशात् कार्यं न कुर्वन्ति मनश्च प्रवर्तते तदा स्वप्नो भविता। अतिनिद्रा आयुषः दोषाय भवति। काले विधिविहिता निद्रा आयुषः सुखस्य च अभिवृद्धये भवति। रजन्यां जागरः दिने निद्रा च न कार्या। अयं सामान्यः नियमः। परं केषाञ्चित् दिने निद्रापि विहिता। तत्केषामित्युच्यते –

**क्रोधभीशोकमद्यस्त्री भारयानाध्वकर्मभिः।**
**परिक्लान्तैरतीसारश्वासहिक्कादिरोगिभिः॥**

---

1. वि.वि 5. 182-192
2. वि.वि 5.229
3. वि.वि 5. 247-8

**वृद्धबालाबलक्षीणैः क्षुत्तृट्शूलादिविह्वलैः।**
**अजीर्णप्रमुखैः कार्यो दिवास्वापोऽपि कर्हिचित् ॥ इति[1] ॥**

एतेषां निद्रागमात् धातुसाम्यं वपुः पुष्टिश्च भवेत्। ग्रीष्मर्तौ दिने दिवास्वापो विहितोऽस्ति। अन्यदा दिवास्वापः त्रिदाषकोपनो भवति। दिवास्वापः निरन्तानामपि पाषाणपाचको भवति। रात्रिजागरणं ये कुर्वन्ति तेषां दिवा भुक्त्वा स्वापः विहितोऽस्ति। एवम् निद्राविषये आयुर्वेदविहितान् नियमान् जिनदत्तः उल्लासेऽस्मिन् भूयसा प्रतिपादयति। षष्ठोल्लासे ऋतुचर्यां प्रतिपादयति। ऋतुचर्यायामपि आयुर्वेदविहितानां नियमानामुपयोगो दृश्यते। ऋत्वौचित्येनैव आहारविहारादिः विहितोऽस्ति। अष्टाङ्गसङ्ग्रहेऽपि ऋतुचर्या विस्तरेण वर्णितास्ति। ऋतवः षट्प्रसिद्धाः सन्ति। चैत्रवैशाखयोः वसन्तः, ज्येष्ठाषाढयोः ग्रीष्मः, श्रावणभाद्रपदयोः वर्षा, आश्विनकार्तिकयोः शरत्, मार्गशीर्षपौषयोः हेमन्तः, माघफाल्गुनयोश्च शिशिरः अनुभूयते। चरकसंहितायाम् ऋतुचर्या विहिता अस्ति। तत्र वसन्तचर्चा विवेकविलासे एवं प्रतिपादिता। तथाहि -

**वसन्तेऽभ्यधिकं क्रुद्धः श्लेष्माग्निं हन्ति जाठरम्।**
**तस्मादत्र दिवास्वापं कफकृद्वस्तु च त्यजेत्॥**

**व्यायामधूमकवलग्रहणोद्वर्तनाञ्जनम्।**
**वमनं चात्र कर्तव्यं कफोद्रेकनिवृत्तये॥**

**भोज्यं शाल्यादिचास्निदग्धं तिक्तोष्णकटुकाञ्जितम्।**
**अतिशीतं गुरुस्निग्धं पिच्छिलामद्रवं न तु ॥ इति[2] ॥**

चरकसंहितायां वसन्तचर्चा तावदेवं वर्णितास्ति। तद्यथा -

**वसन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः।**
**कायाग्निं बाधते रोगं स्ततः प्रकुरुते बहून्॥**

**तस्मात् वसन्ते कर्माणि वमनादीनि कारयेत्।**
**गुर्वम्लास्निग्धमधुरं दिवास्वप्नं च वर्जयेत्॥**

**व्यायामोद्वर्तनं धूमं कवलग्रहमञ्जनम्।**
**सुखाम्बुना शौचविधिं शीलयेत् कुसमागमे॥**

**चन्दनागुरूस्निग्धाङ्गो यवागोधूमभोजनः।**
**शारभं शाशमैणेयं मांसं लाक्कपिञ्जलम्॥**

---

1. वि.वि 5. 253-4
2. वि.वि 6, 2-4

**भक्ष्येन्निर्गदं सीधुं पिबेन् माध्वीकमेव वा।**
**वसन्तेऽनुभवेत्स्त्रीणां काननानाञ्च यौवनम् ॥ इति[1] ॥**

विवेकविलासकार जिनदत्तः जैनाचार्यः अस्ति। अतश्च अहिंसावादी असौ मांसभोजनं परिहरति। अत एव विवेकविलासे वसन्तचर्यायां चरकसंहितायामिव मांसभोजनं न विधीयते। ब्रह्मचारीति कारणेन वसन्ते यौवनमनुभवेदित्यपि न वदति। अन्यः सर्वोऽपि वसन्ताचारः चरकसंहितामेवानुसरति।

वसन्तचर्यानन्तरं ग्रीष्मचर्या सप्तभिः श्लोकैः असौ वर्ण्यति।[2] चरकसंहितायामपि अयमेव विषयः षड्भिः श्लोकैः वर्ण्यते।[3] ग्रीष्मऋतौ धारागृहे वासः उभयत्र कथ्यते। धारागृहस्य निर्माणविधिः भुवनदेवाचार्यकृतायाम् अपराजितपृच्छायां वर्णिताऽस्ति।[4]

वर्षाकाले प्राणिनां वायुः कुप्यति। अतः तत्प्रशमनोपायः चिन्त्यः। वर्षाऋतुचर्या पञ्चभिः श्लोकैः विवेकविलासे वर्णिता अस्ति।[5] सैव चरकसंहितायां अष्टभिः श्लोकैः वर्ण्यते। अत्रापि वर्षायां भोज्यस्य मांसस्य मद्यस्य च परामर्शो विवेकविलासे नोपलभ्यते। वर्षर्तौ यो नरः केशप्रसाधनासक्तः रक्तधूपितवस्त्रभृत् मिताशी च भवति तस्मै स्त्रियः स्वयं स्पृहयन्ति।[6] शरत्काले पित्तं कुप्यति। अर्कस्य रश्मिभिः तप्तस्य मनुजस्य पित्तं कुप्यति। मधुरं लघु शीतलं च अन्नं तत्र प्रशस्तं भवति। सतिक्तकटुकं भोजनमपि परिमितं स्वीकुर्यात्। ऋतावस्मिन् रक्तमोक्षणं विहितमस्ति। विरेकोऽपि प्रशस्तः। माल्यविलेपानसौ रात्रौ ज्योत्स्नां सरोवारि च समाश्रयेत्। क्षारं तैलं च अस्मिन् ऋतौ त्यजेत्।

शरत्कालचर्या ग्रन्थेऽस्मिन् पञ्चभिः श्लोकैः वर्ण्यते।[7] चरकसंहितायाम् अष्टाभिः श्लोकैः शरच्चर्या वर्ण्यते।[8]

हेमन्तचर्यापि विस्तरेण वर्णिताऽस्ति। हेमन्ते शैत्यम् अधिकं वर्तते। रजनी दीर्घा अस्ति। अतः प्रभाते एव भोजनमुचितं भवति। अम्लस्वादूष्णसुस्निग्धं क्षारं च अन्नं कालेऽस्मिन् युज्यते ।

---

1. चरकसंहिता- सूत्रस्थानम्- अध्यायः 6 श्लोकाः 22-26
2. वि. वि 6. 7-13
3. चरकसंहिता-सूत्रस्थानम्, अध्यायः 6 श्लोकाः 27-32
4. भुवनदेवकृता अपराजितपृच्छा-अध्याय 89 श्लोकाः 1-16
5. वि.वि 6. 14-18
6. चरकसंहिता-सूत्रस्थानं अध्यायः 6, श्लोकाः 33-40
7. वि.वि 6, 19-23
8. चरकसंहिता-सूत्रस्थानं- अध्यायः 6, श्लोकाः 41-48

जाड्यविधायकम् किमपि वस्तु उचितं नास्ति। अतिसुगन्धिना तिअलान् अङ्गस अभ्यङ्गं कुर्यात्। कुङ्कुमोद्वर्तनं नव्यं चित्रं वासो वसीत्। एवमेव हेमन्ततौं वातरहितं कर्पूरागरूधूपितं भासुराङ्गारशकटीभासुरं मन्दिरं नरैः सेवनीयम्। साङ्गरागा पीनोन्नतपयोधरायुवती मृदूष्णस्पर्शशलिनी शय्या च शीतं हरति। शिशिरर्तुचर्यापि हेमन्तचर्यावखवति। एवं षण्णाम् ऋतूनामपि चर्या आयुर्वेदोक्तविधिना जिनदत्तसूरिः ग्रन्थेऽस्मिन् निरूपयति। अयञ्च आयुर्वेदविधिः वाग्भटस्य अष्टाङ्गहृदये एवं चरकसंहितायां यथा प्रतिपादितं तथैव भवति। ग्रन्थस्यास्य अष्टमोल्लास एव विषचिकित्सायाः विस्तृतं प्रतिपादनं वर्तते। सर्पाः किमर्थं दशन्ति इत्यत आरभ्य विषहरोपायाः के के इत्यन्तं सर्वोऽपि विचारः अस्मिन दृश्यते। तत्रैव ज्योतिषस्य अपि प्रतिपादनं वर्तते। कस्मिन् देशे काले दण्शश्चेत् जीवोपायो भवति। कस्मिन् देशे काले दंशश्चेत् जीवोपायो न भवति इत्यादयः ज्योतिषदृष्ट्या प्रतिपाद्यते। दूतस्य लक्षणमपि अत्र वर्तते। चरकसंहितायामपि विषचिकित्सा निरूपिता अस्ति।[1] विवेकविलासे दंशविचारस्त्वेवं कृते वर्तते –

**सपयः शोणिता दंशाश्चत्वारो युगपद्यदि।**
**एको वा शोफवान् सूक्ष्मो दंश आवर्त सन्निभः॥**

**दंशः काकपदाकारो, रक्तवाही सगर्तकः।**
**त्रिरेखः श्यामलः शुष्कः प्राणसंहारकारकः॥**

**सञ्चरत्कीटिकास्पृष्ट इव वेधी च दाहकृत्।**
**कण्डूमान् सविषो ज्ञेयो दंशोऽन्यो निर्विषः पुनः॥ इति[2] ॥**

अयं च ग्रन्थकारेण विषचिकित्सायाः विस्तृतं निरूपणं यत्क्रियते तेनावगम्यते यदयं निश्चितमेव सफलो विषहारी आसीदिति। औषधानां विस्तरेण निरूपणमपि अत्र वर्तते। न केवलमायुर्वेदस्य शास्त्रीयं ज्ञानम् अपि तु प्रायोगिकं ज्ञानमपि आचार्यस्यास्य आसीदिति निश्चयेन अनुमातुं शक्यते। ग्रन्थेऽस्मिन् विषविद्याविचारः प्रायः शतं श्लोकैः कृतः अस्ति[3]। अनेनैव ग्रन्थकारस्यास्मिन् विषये विशिष्टा अभिरुचिः अभिलक्ष्यते।

दशमोल्लासे सुभाषितवचनानां मध्येऽपि आयुर्वेदः अनेन प्रतिपादितः। तद्यथा–

---

1. पश्यन्तु चरकसंहिता–चिकित्सास्थानम्–अध्यायः 23
2. वि.वि 8, 158–60
3. पश्यन्तु– वि.वि. 6, 145–244

**रसासृङ्मांसमेदोऽस्थिमज्जशुक्रमये पुरे।**
**नवस्रोतः परीते च शौचं नास्ति कदाचन॥ इति[1] ॥**

इदं शरीरं कदापि शुचि न भवति। यतो हि सप्तधातुभिः निर्मितं तत् भवति। रसादयः सप्तधातवः मलाः भवन्ति। तदुक्तं चरकसंहितायाम् -

"पुण्यन्ति त्वाहाररसाद्रसरूधिरमांसभेदोऽस्थिमज्जशुक्रौजांसि पञ्चैन्द्रियद्रव्याणि धातुप्रसादसंज्ञकानि शरीरसन्धिबन्धपिच्छादयश्चावयवाः। **ते सर्व एव धातवो मलाख्याः प्रसादाख्याश्च रसमलाभ्यां पुण्यन्तः स्वं मानमनुवर्तन्ते यथावयः शरीरम्**'' ॥ इति[2]॥

शोधपत्रेऽस्मिन् विवेकविलासे प्रतिपादितानामायुर्वेदतत्त्वानां समीक्षणं कृतमस्ति। ग्रन्थकारोऽयं प्रायः सर्वेषु शास्त्रेषु विद्वान् आसीत्। ग्रन्थेऽस्मिन् अन्येषामपि शास्त्राणां ग्रन्थकारस्य वैदुष्यं प्रकटितमस्ति।

✦✦✦

1. वि.वि 105-36
2. चरकसंहिता सूत्रस्थानम् अध्यायः 28

 ISSN : 0975-1769

# विंशशताब्दीयबलभद्रप्रसादशास्त्रिविरचिते सिन्धुराजवधमहाकाव्ये रसाभिव्यञ्जना

-पूजा *

रसशब्दः संस्कृतवाङ्मयस्य अत्यन्तप्राचीनशब्देषु अन्यतमः। यस्य प्रयोगः वेदेष्वप्युपलभ्यते। ऋग्वेदे गदितं यत्- **''दधानः कलसे रसाम्''** इति। वेदेषु रसप्रयोगः सोमरस-जल-दुग्धादीनां कृते वर्तते। यद्यपि तत्र रसस्य शास्त्रीयविवेचनं नास्ति तथापि विभिन्नरसानामुदाहारणानि वेदेषु सन्ति। उपनिषत्सु रसः सारभूतं तत्त्वं स्वीक्रियते- **''रसः सारः चिदानन्दप्रकाशः'' ''रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति।''**[1] उपनिषद्युगं यावत् रसशब्दः सूक्ष्मार्थस्य द्योतकोऽभवत् तथा एषः प्राणस्वरूपेऽपि स्वीकृतः। यथा- **''प्राणो वा अङ्गानां रसः''**[2]

इत्थं वेदेभ्यः उपनिषद् यावत् रसस्यार्थविकासः भौतिकतायाः आध्यात्मिकं प्रति स्थूलात् सूक्ष्मं प्रति चाभवत्, किन्तु काव्यशास्त्रीयार्थे रसशब्दस्य प्रयोगः एतेषु ग्रन्थेषु नाभवत्। रस इति शब्दोऽयं **चुरादिगणस्य आस्वादनार्थकरसधातोः घञि प्रत्यये** कृते निष्पद्यते। **'रस्यते आस्वाद्यते इति रसः'** अथवा **रसतीति रसः**। आचार्यराजशेखरानुसारं नन्दिकेश्वरः ब्रह्मोपदेशात् सर्वप्रथमं रसतत्त्वस्य निरुपणं कृतवान् परन्तु नन्दिकेश्वरस्य रसविषयकसिद्धान्तस्य ग्रन्थ सम्प्रति नोपलभ्यते। उपलब्धरससिद्धान्तो भरतमुनिना सम्बद्धोऽस्ति एवं आचार्यभरतः रससम्प्रदायस्य प्रथमः सर्वश्रेष्ठश्च आचार्योऽस्ति। रसस्य स्वरूपविषये विचारं कुर्वन् आचार्यभरतमुनिः पाकरसस्य दृष्टान्तमुपस्थापितवान्- **''रस इति कः पदार्थः?''** उच्यते आस्वाद्यत्वात्। **कथमास्वाद्यते रसः? यथाहि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जानां रसानास्वादयन्ति हर्षादींश्चाधिगच्छन्तीति सुमनसः पुरुषा इत्यभिव्याख्याताः तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्वोपेतान् स्थायिभावान् आस्वादयन्ति हर्षादींश्चाधिगच्छन्तीति प्रेक्षकाः ''सुमनसः'' इत्यभिव्याख्याताः।**[3]

---

* शोधच्छात्रा, राष्ट्रिय संस्कृत संस्थान, (मानित विश्वविद्यालय) नई दिल्ली

1. तैत्तरीयोपनिषद्- 2.7.1
2. बृहदारण्यकोपनिषद्- 1.3.19
3. हिन्दी अभिनवभारती-479.6

भरतमुनिना नाट्यशास्त्रस्य षष्ठे सप्तमे चाध्याये रसभावयोः यादृशं निरुपणं प्रस्तुतमस्ति तत् साहित्यसंसारे एकमपूर्वं वस्तु वर्तते। एतौ द्वावपि अध्यायौ रसविकल्पः तथा भावव्यञ्जकः इति नाम्ना प्रसिद्धौ वर्तेते। किञ्च भरतस्य समये नाट्यस्य प्राधान्यमासीत् ततो भरतेन नाट्यरसस्यैव विस्तृतं व्यापकं मार्मिकञ्च विवेचनं प्रस्तुतं यदस्य रससम्प्रदायस्य मूलभूतसूत्रमस्ति– **''विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिरिति''** सूत्ररचनापूर्वं मुनिना स्पष्टतया रसमहिमा स्वीकृता **"नहि रसादृते कश्चिदर्थः प्रवर्तते''**[1]

अनेन भरतवचनेन रसमुख्यप्रयोजनेन काव्येन भवितव्यमिति निश्चितं भवति। यथा परवर्तिभिः आचार्यैः विश्वनाथादिभिः काव्यलक्षणविधाने प्रतिपादितम्। भरतमुनिः स्वरचनायां सर्वत्र काव्यस्थाने नाट्यपदमेव प्रयुक्तवान्। तत्र केषाञ्चिन्मतं यत् नाट्यमेव पूर्वं कविकर्म आसीत् पश्चात्काव्यपदं व्यवहृतम्। अतः भरतकृतं नाट्यशास्त्रं भामहादिविरचितं काव्यालङ्कारादिकमस्ति। किन्तु परवर्तिभिराचार्यैः कविकर्म द्विधा विभक्तं दृश्यं श्रव्यञ्चेति। दृश्यवर्गे नाट्यं श्रव्यवर्गे च काव्यमिति व्यवह्रियते एकस्यैव प्रणेता उभयमासाद्यते। तद्यथा कालिदासस्य नाट्यं काव्यञ्च। तथापि व्यवहारे पृथक्तया परिगण्यते नाट्यकर्ता काव्यप्रणेता इत्यादिकं किन्तु उभयत्र रससत्ता समानतया समादृता आलोचिता आलङ्कारिकैः।

आचार्यः विश्वनाथानुसारं रसस्य स्वरुपम् –

**''सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।''**[2]

काव्यादर्शेऽपि रसपरिभाषाविषये लिखितमस्ति यत्– **"रसः तस्यालौकिकस्य चमत्कारिणः आनन्दविशेषस्य बोधकोऽस्ति यस्यानुभूतिः सहृदयस्य हृदयं द्रुतं मनस्तन्मयं हृदयव्यापाराणामेकतानतां नयने जलाप्लुते शरीरं पुलकित समद्गदां वचनरचनां च कर्तुं क्षमास्ति। अयमेवानन्दः काव्यस्योपादेयतत्त्वं तथा अस्योद्गतिः वाङ्मयस्य प्रकारान्तरविलक्षणस्य काव्यनामपदार्थस्य प्राणप्रतिष्ठां करोति।''**[3]

यः काव्यात्मभूतं रसतत्त्वमचार्यभरतेन सूचितं अभिनवगुप्तपादादिभिः व्याख्यातं, ध्वन्यालोके ध्वनेरात्मरुपेण विकसितः पुनः काव्यप्रकाशे काव्यशरीरभूतयोः स्फुटालङ्काररहितयोरपि शब्दार्थयोः रससखावादेव यः कौमारहरः इत्यादौ पद्ये[4]

1. नाट्यशास्त्र–06
2. साहित्यदर्पण–3.2
3. काव्यादर्श–43
4. काव्यप्रकाश–1.1

काव्यत्वाङ्गीकारात् स्फुटीकृतः स एव साहित्यदर्पणे काव्यात्मरुपेण स्वीकृतः[1] तथा चायं रसगङ्गाधरे रमणीयार्थतया लोकोत्तराह्लादस्वरुपतया चमत्कारापरपर्यायतया च महिमान्वितः काव्यलोके विख्यातिं प्राप्तवान्। आनन्दवर्धन-मम्मट- विश्वनाथ-जगन्नाथादीनाम् आलङ्कारिकाणां मतेन काव्यस्य परं तत्त्वं रस एवास्ति।

रसस्य मुख्यत्वेन चत्वारि अङ्गानि सन्ति। विभावानुभावव्यभिचारिस्थायिभावाश्च। एतेषां संयोगात् रसस्य निष्पत्तिर्भवति। यथा

**विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।**
**आनीयमानः स्वाद्यत्वं स्थायिभावो रसःस्मृतः।।**[2]

अर्थात् विभावैरनुभावैः सात्विकभावैः व्यभिचारिभावैश्च यदा स्थायिभावः आस्वाद्यो भवति तदा सः ''रसः'' इति उच्यते। अत्र विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिणश्च सहकारिणः, एषां संयोगात् रसनिष्पत्तिः उक्तं मम्मटेन –

**कारणान्यथ कार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।**

**विभावानुभावास्तत् कथ्यन्ते व्यभिचारिणः।**
**व्यक्तः सः तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः।।**[3]

भरतमुनिः स्वनाट्यशास्त्रे अष्टरसानां गणनां कृतवान्। महाकविः कालिदासोऽपि स्वविक्रमोर्वशीये अष्टरसानां संकेतं कृतवान्। ते अष्टरसाः सन्तिश्रृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-अखुत-वीभत्साश्च। उखटादिकाव्याचार्याः नवरसानां कल्पनां कृतवन्तः। केचित् विद्वांसः स्नेह-वात्सल्य-भक्त्यादिरसानपि स्वीकुर्वन्ति।

महाकाव्यस्य लक्षणमध्ये अङ्गिरसनिर्देशने **"श्रृङ्गारवीरशान्तानामेकोऽङ्गीरस इष्यते''** इत्यनुसारं बलभद्रप्रसादशास्त्रिविरचितसिन्धुराजवधमहाकाव्ये वीररसस्य प्राधान्यमस्ति।

वीररसः दया-युद्ध-दानादिभेदात् अनेकधा भवति। यथा –

**वीरः प्रतापविनयाध्वसायसत्त्व-**
**मोहाविषादनयविस्मयविक्रमाद्यैः।**

---

1. वाक्यं रसात्कं काव्यं-1.3
2. दशरुपक, भोलशंकर व्यास-4.1
3. काव्यप्रकाश-4/25-27

**उत्साहभूः स च दयारणदानयोगात्**
**त्रेधा किलात्र मतिगर्वधृतिप्रहर्षाः[1]**

सिन्धुराजवधमहाकाव्ये युद्धवीररसस्य प्राधान्यमस्ति उत्साहो वीररसस्य स्थायिभावः "कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते"।[2]

तथा श्रृङ्गार-करुण-रौद्रादिरसाः अस्यैवाङ्गरुपे विद्यमानाः सन्ति। महाकाव्येऽस्मिन् आद्योपान्तं वीररसस्यैव प्रवहमानस्वच्छसलिलायाः दिग्दर्शनं भवति। यथा–

**यश्चन्द्रहासे विनिमज्जयन् रिपून**
**जयश्रियं वै वृणुते महाहवे।**
**तत् केवलं बाहुबले च साहसे**
**न कूटनीतौ न कुले विराजते।।[3]**

अर्थात् खड्गे शत्रून् विनिमज्जयन् संग्रामे या जयश्रीः प्राप्यते सा केवलं भुजबलेन शौर्येण च सिद्ध्यते कूटनीत्या अथवा कुलेन न। षोडशवर्षदेशीयं कुलस्य बीजं वंशवर्धनः कुमाराभिमन्युः यदाह तत्तस्य लोकोत्तरां वीरतामेव प्रकटयति। यथा–

**मृत्युर्यदा कवलयत्यरिमित्रबन्धून्**
**आदाय कालविकरालमुखं समन्तात्।**
**हित्त्वा विमोहमयशस्करमाहवान्ते**
**चेया तदा बुधवरैरसुभिः सुकीर्तिः।।[4]**

यदा मृत्युः मुखं व्यादाय परितः शत्रु-मित्र-बान्धवादीन् निगलति तदा मोहं परित्यज्य ज्ञानीपुरुषाः स्वप्राणैः सुकीर्तिं चिन्वन्ति।

**देशो यदा विजयगर्वसमुद्धतेन।**
**केनापि दुर्णयपरेण पराजितः स्यात्।**
**वीरा भवन्ति जननीमवलोक्य दीनां**
**किं व्यापृता विचरणे च रणे रणे न।।[5]**

---

1. दशरुपक–4.72
2. साहित्यदर्पण–3/178
3. सिन्धुराजवधमहाकाव्यम्–3.16
4. सिन्धुराजवधमहाकाव्यम्–4.33
5. सिन्धुराजवधमहाकाव्यम्–4.36

अर्थात् यदा राष्ट्रः विजयगर्वोद्धतस्य कस्यापि अन्यायिनः आक्रमणात् पराजितः स्यात् तदा स्वमातृभूमेः दीनां दशामवलोक्य वीरयुवाः युद्धे संलग्नाः न भवन्ति किम्? अर्थात् अवश्यमेव भवन्ति।

महाकाव्येऽस्मिन् न केवलं पुरुषाः एव वीररसेन ओतप्रोताः सन्ति अपितु नार्योऽपि उज्ज्वलस्त्रीणामादर्शं प्रस्तुतवन्ती आचरण-मन्तःकरणे धारयन्ती उदीयमानक्षत्रियभावनायाः अनुरुपमेव वीरभावैः युक्ताः सन्ति। मत्स्येन्द्रसुता उत्तरा स्वपत्युः अभिमन्योः युद्धप्रयाणं श्रुत्वा स्वयमपि युद्धाय सज्जिता अभूत्। यथा –

**अन्तःपुराचारकुलागतानि विहाय रत्नाभरणानि सद्यः।**
**अबालसत्वोत्कषणान्यधासीदङ्गेषु लौहावरणानि बालाः।[1]**

अन्तःपुरे आचारेण वंशपरम्परया च सम्बद्धानि अखिलनि रत्नाभूषणानि अवतार्य सा बाला उत्तरा पौरुषस्य शक्तेश्च उत्कषणानि लौहकवचानि धृतवती। वीरतायाः माहात्म्यमत्यन्तसुन्दररीत्या महाकविना वर्णितम् –

**अधर्मनीतिश्छलनासमेधिता**
**प्रभावयेदाजितले जयाजयौ**
**विरोद्धुमातङ्कमथाततायिनाम्,**
**उपार्जितां प्राणपणैर्न वीरताम्।।[2]**

युद्धे छद्मपूर्णा अधर्मनीतिः जयं पराजयं वा प्रभावयितुं शक्नोति किन्तु आततायिनां विरोधाय प्राणपणेनार्जितां वीरतां न। सिन्धुराजवधमहाकाव्ये रौद्र-करुण-श्रृङ्गारादि-अङ्गरसानामपि अत्यन्तसुन्दरवर्णनं वर्त्तते। यस्यात्यन्तसंक्षेपेण निदर्शनमात्रं प्रस्तूयते।

रौद्ररसस्योदाहरणं यथा–

**युद्धोन्मादे प्रवृत्ते प्रबलरिपुनदीमातितीर्षुः समन्ता**
**दाक्रोशेनाक्षिपद् वै बलिनमरिबलं द्वन्द्वयुद्धे प्रसक्तम्।।**
**गामावेगेन विष्वक् चलचपलरथैः कम्पयन्तो नरेन्द्राः**
**चक्रुः कूराभिषेकं रिपुरुधिर्जलैराहवे चण्डिकायाः।।[3]**

युद्धोन्मादे प्रारम्भे सति प्रबलरिपुनदीं तितीर्षुः परितः आक्रोशेन एकः बलशाली

---

1. सिन्धुराजवधमहाकाव्यम्-5.4
2. सिन्धुराजवधमहाकाव्यम्-7.55
3. सिन्धुराजवधमहाकाव्यम्-3.44

अपरं शत्रुबलं आह्वयन् द्वन्द्वयुद्धे संलग्नः आसीत्। समन्ताद् चलायमानैः चपलरथैः धरां प्रकम्पयन् राजानः तस्मिन् युद्धे अरीणां शोणितेन रणचण्डिकायाः क्रूराभिषेकं चक्रुः।

करुणरसस्योदाहरणं यथा –

**सहसा पतिघातमुत्तरा विषवज्जीवहरं निशम्य सा।**
**ननु वज्रहतेव वल्लरी विलपन्ती न्यपतद् धरातले।।**[1]

अर्थात् गरलवत् प्राणहरं पतिवधं श्रुत्वा उत्तरा व्रजपातेन पीडित लतया इव विलपन्ती भूमौ पपात।

श्रृङ्गाररसस्योदाहरणं यथा –

**कोपारुणं मुखमचञ्चलचारुनेत्र-**
**मालोलकुण्डललसन् मकरं तदीयम्।**
**ग्रीष्मातपे विकचमन्तरितद्विरेफ़-**
**मासन्नपत्रमरविन्दमिवाधिरेजे।।**[2]

अर्थात् उत्तरायाः स्थिरनेत्रं तथा शनैः शनैः आलोलमकरकुण्डलैः शोभमानं क्रोधारुणं मुखं तथैवाशोभत यथा ग्रीष्मघर्मैः षड्पदैः पत्रैश्च युक्तं विकसितं सरसिजं शोभते।

इत्थं बलभद्रप्रसादशास्त्रिणः सिन्धुराजवधमहाकाव्ये वीररसस्य शुभगं आस्वाद्यरूपञ्च विद्यमानमस्ति। रसस्य प्रसंगानुकूलः प्रयोगो महाकाव्ये अपूर्वलावण्यस्य सृष्टिं करोति। सहृदयपाठकस्य अन्तःकरणं काव्यश्रवणेन वीरभावैः परिपूर्यते। अङ्गरसानां अपि मनोरमं स्वरूपं महाकाव्यस्यास्य शोभां वर्धयति। वस्तुतः बलभद्रप्रसादशास्त्री काव्यशास्त्रस्य प्रयोगधर्ममर्मज्ञः उत्कृष्टमनीषी चासीत्। सः स्वरचनाकौशलेन वाग्देव्याः भव्यप्रासादस्याभिरामं अलङ्करणं कृतवान्।

✦✦✦

---

1. सिन्धुराजवधमहाकाव्यम्-8/18
2. सिन्धुराजवधमहाकाव्यम्-5/7

# प्राच्यपाश्चात्त्यमते व्यक्तित्वविमर्शः

**डॉ.मदनकुमारझा***

मनोविज्ञाने प्राणभूतेषु विषयेषु व्यक्तित्वम् अन्यतमं भवति। व्यक्तित्वम् इति पदस्य अर्थः अत्यन्तं सङ्कीर्णो वर्तते। बहवो हि मनोवैज्ञानिकाः व्यक्तित्वम् इति इमं विषयमधिकृत्य गवेषणमकुर्वन् कुर्वन्ति च। तथापि नैकः किमिति अस्य स्वरूपं स्पष्टयितुम्। व्यज्यते अनया इति व्यक्तिः इति व्युत्पत्त्या व्यक्तिः इति शब्दः **Personality** इत्यस्मिन् अर्थे संस्कृतवाङ्मये प्रयुक्तः दरीदृश्यते। किन्तु व्यक्तिरिति शब्दः आकृतिमत्पदार्थेऽपि (जीववाची) व्यवह्रियते। तादृशव्यक्तेः भावः व्यक्तित्वमिति (Personality) इत्यस्मिन् अर्थे व्यक्तित्वम् इत्यपि शब्दः प्रयुज्यते। प्रयोगारूढत्वात् व्यक्तित्वम् इत्येव शब्दः अत्र Personality इत्यस्मिन् अर्थे परिभाष्यते।

## पाश्चात्त्यदृष्ट्या व्यक्तित्वम् -

**Personality** इति पदोऽयं द्विसहस्रवर्षेभ्यः पूर्वमेव प्रयुक्तो वर्तते। अस्य पदस्योत्पत्तिः persona इति (Latin) लाटिन् पदात्। "लाटिन्" भाषायां "मुखावरणमित्यर्थः" (Mask)। तदानींतनकाले नाटकादिषु अभिनेतारः आत्मानं गोपयितुं पात्ररूपं धर्त्तुञ्च मुखावरणस्य उपयोगम् अकुर्वन्। अधुनापि पौराणिकदृश्यकलामाध्यमेषु, केरलीय "कथकल्लि" आदिषु नृत्यनाटकेषु मुखावरणानां प्रयोगो सन्दृश्यते एव। मुखावरणप्रयोगस्य उद्देश्यमप्यनुकरणमेव यदा कश्चित् मुखावरणं धृत्वा स्वस्वव्यक्तित्वं परित्यज्य पात्रव्यक्तित्वं द्योतयति। यथा - हनुमद वेषधारिणं दृष्ट्वा "हनुमान्" इत्येव कथ्यते न तु वेषधारिणः नाम। एवञ्च "व्यक्तौ यत्किञ्चित् वर्तते तस्य समग्रता नाम व्यक्तित्वम्" इति सामान्यतया वक्तुं शक्यते। व्यक्तित्वं किञ्चिदौपथिकेन तिष्ठति, तच्च परिवर्तनयोग्यञ्च। व्यक्तेःइदम् इति व्युत्पत्त्या व्यक्तित्वशब्दः व्यक्तिनिष्ठानां सर्वेषामपि बोधको भवति। ते च मनः- शरीरम्- स्वाभावः- चरित्रम् अन्यैः साकं व्यवहारशैली च एतस्मिन् अन्तर्भवन्ति। मनुष्यस्य ज्ञानं, व्यवहारः, संवेदनाः, मूलप्रवृत्तयः, प्रत्यक्षज्ञानम्, संवेगाः, कल्पना, स्मृतिः, बुद्धिः, विवेकचित्तवृत्यादीनां सङ्कलितरूपं सर्वं व्यक्तित्वे समाविष्टं भवति।

---

* सहायकाचार्यः, शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, कोट-भलवालः, जम्मूः

ईदृशस्य च व्यक्तित्त्वस्य निर्धारणं तु सामान्यतः जनाः व्यवहारेण कुर्वन्ति। अत एव अयमेकः कृपालुः इति वदति तमेव अन्यः कृपणः इति वदेत्, यतः तस्य द्वाभ्यां सह व्यवहारे तादृशः भेदः अवलोक्यते। अत एव व्यक्तित्वनिर्धारणे समानता न भवति। व्यक्तित्वशब्दस्य नैके अर्थाः अवधारिताः आङ्गलसंस्कृतशब्दकोशे **रामानुजदेवनाथ**महोदयेन– **Personality** (Individuality) व्यक्तिता– त्वं व्यक्तिः पृथक्त्वं, पृथगात्मिका, स्वत्वं, (Reflection on an individual) विशेषजनोद्देशः, शकता, विशेषव्यक्तिदुद्देशकत्वं, विशेषसंस्पर्शिताः, (A personal remark) विशेषोद्देशकवाक्यं, व्यक्तिनिर्देशकभाषणं, विशेषस्पर्शकवाक्यम्।

**व्यक्तित्त्वस्य परिभाषाः**– व्यक्तित्वशब्दस्य अनेकाः परिभाषाः सन्ति। **आलपोट्** (G.W. Allport) महोदयानां प्रसिद्धा परिभाषा एवं भवति –"व्यक्तित्वं नाम व्यक्तेः मनोदैहिकगुणानां तद्गत्यात्मकसंघटनं भवति यत् व्यक्तेः वातावरणं प्रति अपूर्वं संयोजनं निर्धारयति।"

(Personality is the dynamic organization within the individual of those psycho-physical system that determine his unique adjustment of his environment.)

**मन्** महोदयस्य अभिप्रायेण–"व्यक्तिस्थितसंरचनायाः, व्यवहारमार्गस्य, रूचीनाम्, अभिवृत्तीनां, क्षमतायाः, योग्यतायाश्च अत्यन्तं विशेषतापूर्वकसंघटनमेव व्यक्तित्वम्" इति।

**आर. एस. वुडवर्थ** महोदयः एवम् अभिप्रैति– "व्यक्तित्वं व्यक्तेः व्यवहाराणां संपूर्णविशेषता भवति यस्य सम्बन्धः व्यक्तेः विचारस्वभावानाम् अभिव्यक्त्या तस्य अभिवृत्तिभिः रूचिभिः, तस्य व्यवहारमार्गेषु तथा व्यक्तिगतजीवितनिदर्शनेन सह तिष्ठति" इति।

**वुडवर्थ**महोदय एवमभिप्रैति– "व्यक्तित्वं व्यक्तेः व्यवहारस्य समग्रविशेषता-रूपमस्ति" इति (Personality is the total quality of an individuals.)

**व्यक्तित्वस्य तत्त्वानि -**

तत्र किं शोभनं व्यक्तित्वमिति विचार्यते चेत् शोभनव्यक्तित्वे एतानि तत्वानि आवश्यकानि इति वक्तुं शक्यते। यथा - सुन्दरं स्वास्थ्यम्, तीव्रबुद्धिः, धैर्यम्, एकाग्रचित्तता, व्यवहारकौशलम् , उत्साहः, सौम्यता, मौलिकता, परिपक्वनिर्णयशक्तिः आत्मसंयमः, चारित्र्यम्, सामाजिकाभिवृत्तिः, सन्तुलित्वं, स्वाभाविकता, संस्कृतिः, विनयशीलता, उदारता इत्यादि। विलियं मैकडागल् महोदयस्याभिप्रायानुसारं

व्यक्तित्वनिर्धारणतत्वानि पञ्चधा विभक्तानि–

(1) मनसः प्रवृत्तिः (Disposition)

(2) मनसः स्थितिः (Temper)

(3) स्वभावः (Temperament)

(4) मेधा (Intellect)

(5) चरित्रम् (Character)

व्यक्तित्वस्य यद्यपि अनेकानि तत्त्वानि मनः शरीरसम्बन्धीनि वर्तन्ते। तथापि प्रधानानि अङ्गानि अत्र उल्लिखितानि। यथा –

(1) पुरूषस्य स्वरूपम् (or) शरीररचना

(2) पुरूषस्य बुद्धिः

(3) स्वभावः संवेगशीलता च

(4) सङ्कल्पः चरित्रं च

(5) सामाजिकता

(6) शक्तिः दृढता च

**शरीररचना**

प्रथमतत्त्वं हि व्यक्तित्वस्य शरीरसंरचना भवति। ह्रस्वोन्नतस्थूलकृशादिभः शरीरे भेदः भवति। एवमेव श्यामकृष्णगौरादिभिः च भेदाः अवलोक्यन्ते। प्रथम परिचये च ईदृशभेदानामेव गणना भवति। तदनु नेत्रनासिकोष्ठादीनां रचनायामपि अन्तरं भवति। वेषभूषा अपि व्यक्तित्वनिर्धारणे मुख्यगण्यमेव। तदुक्तं सुभाषितेषु–

**विद्यया वपुषा वाचा वस्त्रेण विभवेन च।**
**वकारैः पञ्चभिः युक्तो नरो भवति पूजितः॥**

**किं वाससैवं न विचारणीयं, वासः प्रधानं खलु योग्यतायाः।**
**पीताम्बरं वीक्ष्य ददौ तनूजां, दिगम्बरं वीक्ष्य विषं समुद्रः॥**

अत एव यदि तस्य किञ्चिदव्यङ्गविकृतमपरूपं वा भवति तर्हि तस्य मनसि तस्य विशिष्टः प्रभावो जायते। सः आत्मनो हीनतामनुभवति। तद्वशात् तस्य उद्वेगाः, चरित्रं बुद्ध्यादयश्च विशेषरूपेण परिवत्र्यन्ते। भाषणादिव्यवहारमपि व्यक्तित्वस्य

निर्धारणे निमित्ततामुपयाति।

मानवस्य व्यक्तित्वे शरीरापेक्षया बुद्धिः महत्वपूर्णं भवति। शरीरमिव बुद्धिरपि जन्मसिद्धा एव। प्रयत्नेन शिक्षया च तस्याः विकासः भवति। मनोविकासोऽपि बुद्धिविकासेन साकं सम्पद्यते। संवेदनानां प्रकाशने, सामाजिकव्यवहारेषु चापि बुद्धेः प्रभावो भवति। व्यक्तित्वस्य मानसिकलक्षणानि यथा निरीक्षणम्, अवधानम्, चिन्तनम्, स्मृतिः, निर्णयतर्कादयोऽपि अनया (बुद्ध्या) एव प्रभाविताः भवन्ति।

**स्वभावः संवेगशीलताश्च -**

व्यक्तित्वनिर्माणे महत्वपूर्णस्थानं वहति संवेगशीलता। अस्याः द्वौ पक्षौ- प्रीतिकरः, अप्रीतिकरश्चेति। काश्चन प्रवृत्तयः प्रीतिकराः भवन्ति, काश्चन अप्रीतिकराः। सांवेगिकव्यक्तित्वं हि चतुर्विधम् ते च -

(1) **प्रफुल्लः** - सदा सन्तुष्टः हसन्मुखश्च भवति। सोल्लासं तिष्ठति। अस्य आत्मविश्वासः कर्मसु प्रकटीभवति।

(2) **खिन्नः** - प्रफुल्लता विरोधिगुणमेव खिन्नता। निराशा अस्य मुखमुद्रा भवति। ईदृशाः प्रायः अलसाः किमपि कर्तुं न प्रयतन्ते। दुःखपूर्णमेव अस्य जीवनं भवति।

(3) **क्रोधी** - सदा अयं कलहप्रियः। शान्तां स्थितिं नेहते सः। स्वयमिमे दुःखिनः। क्रोधप्रकाशनाय यदा अन्यन्न लभते तदा समीपस्थवस्तुष्वेव क्रोधमुद्भावयन्ति। क्रोधीजनः अन्याभावे आत्मशरीरे एव कदाचित् क्रोधं प्रकटयति। शिरोवक्षं च ताडयति उपोषितस्तिष्ठति च।

(4) **चञ्चलः** - चञ्चलव्यक्तेः मनः सदा इतस्ततः चलन्नास्ते। कदापि कस्मिन्नपि केन्द्रीकृतं न भवति। अत एव उच्यते गीतायां - **चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।** अस्थिरचित्तस्य एतस्य प्रसादोऽपि भयङ्करो भवति। आत्मनः संवेगान् नियन्तुं स कदापि शक्तो न भवति। अत अयं जीवने साफल्यं न प्राप्नुयात्।

**चरित्रं सङ्कल्पश्च-**

कर्तृत्वशक्तिरेव सङ्कल्पः। चरित्रं सङ्कल्पश्च व्यक्तित्वस्य अङ्गे भवतः। सङ्कल्पः इच्छानियन्त्रकः भवति। तद्धि आत्महिताय समाजहिताय च भवति। नियतं क्रियमाणानि कर्माणि एव स्वभावः। अग्निहोत्रिणः वचसि - "स्वभावेनाचरणम्, आचरणेन च चरित्रं भवति, तत्र च सामाजिकानां, नैजानां च आदर्शानां समन्वय

आवश्यक:" इति।

**सामाजिकता -**

बाल्यावस्थायां व्यक्तेः प्रवृत्तयः वैयक्तिक्यः भवन्ति। क्रमेण तेषां रूचिः अन्येषु पदार्थेषु बन्धुमित्रादिषु च वर्धमाना दृश्यते। आदानप्रदानपरिशीलनमपि क्रमेण प्रवर्धते। एकस्य व्यक्तेः अन्यं प्रति या प्रतिक्रिया सा आक्रमिका, पलायनशीला वा सगर्वो वा विनम्रो वा, सहानुभूतिरस्ति वा न वा इत्यादयः सामाजे व्यक्तित्वं निर्धारयन्ति।

**भारतीयदृष्ट्या व्यक्तित्वम् -**

मनसः अस्तित्वविकासादयः भारतीयानां आप्राक्कालतः परिचितः आसीत्। षड्दर्शनेषु न्याय-वैशेषिक-सांख्य-योग-मीमांसावेदान्तेषु मनसः वैज्ञानिकचर्चा दरीदृश्यते। योगशास्त्रे पातञ्जले अस्य बाह्यान्तरिकाः चर्चिताः। व्यक्तित्वं हि व्यक्तीनां वैय्यक्तिकभिन्नता। स च प्रत्येकं व्यक्तिनिष्ठः। तस्य च **बाह्यान्तरिकभेदेन द्विविधो भेदः** सन्दृश्यते। बाह्यव्यक्तित्वे शारीरिकविशेषाः आकारचेष्टादयः अन्तर्भवन्ति। आन्तरिकव्यक्तित्वं संवेदनादिमनोवृत्तीनाम् आन्तरिकसत्तानां समाहारः भवति। जनाः आभ्यां भेदाभ्यां भिन्नाः भवन्ति। अनयोः एव व्यक्तित्वस्य अन्तर्भवनम्।

आत्मा एव व्यक्तिः भवतीति भारतीयदार्शनिकानां मतम्। अतः आत्मस्वरूपमेव व्यक्तित्वम्। व्यक्तित्वस्य पूर्णरूपता तु तदैव भवति यदा सः स्वात्मानं जानाति अथवा आत्मसाक्षात्करोति। तदा तस्मिन् व्यक्तित्वं पूर्णतया प्रतिफलति। अन्यथा तत्तु आंशिकफलनमेव भवति। तादृशपूर्णताप्राप्त्यर्थं यः श्रमः स एव व्यक्तित्वविकासः। स च आत्मसाक्षात्कारसोपानः। तदर्थमेव अस्माकं जीवनम्। यदा सः स्वात्मानं जानाति। आत्मसाक्षात्करोति तदा सः पूर्णो भवति तृप्तः भवति। तदा व्यक्तित्वं विकसितं भवति। तादृशपूर्णावस्था एव सर्वेषां लक्ष्यम्।

यद्यपि व्यक्तिशब्देनान्ततः आत्मा एव निर्दिश्यते इत्यत्र न कस्यापि विप्रतिपत्तिः भारतीयाचार्याणां तथापि आत्मनः स्वरूपविषये ते भिन्नमतयः दृश्यन्ते। आदिशङ्कराचार्याः **आत्मानं चिद्रूपं वदन्ति।** रामानुजाचार्याणां मते **विज्ञानन्दादिगुणवान् आत्मा** इति। बौद्धाः **धारावाहिकविज्ञानमेव आत्मनः अस्तित्वेन स्वीकुर्वन्ति।** सफायामहोदयस्तु **आत्मानं व्यक्तित्वस्य सारांशं** मनुते। एवमन्येऽपि भिन्नमतयः विषयेऽस्मिन्। व्यक्तित्वविकासलक्ष्येऽपि सर्वे दार्शनिकाः ऐकमत्यं प्रकटयन्ति। पुरुषार्थेषु परमपुरुषार्थः मोक्षः। तदेव साध्यं समेषां मते। तच्च आत्मस्वरूपज्ञानेन भवति, तदर्थञ्च व्यक्तित्वविकासः। आत्मस्वरूपज्ञातरि व्यक्तित्वं पूर्णतया प्रतिफलति। स च गुणातीतः

भगवद्गीतायां विषयेऽस्मिन् चतुर्दशाध्याये वर्णितमस्ति। तत्र हि सत्त्व-रज-तमोगुणसन्निवेशेन विविधाः क्रियाः जायन्ते।

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।**
**निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।। इति।**।भगवद्गीता-14.5।।

एते गुणाः देहिनमात्मानं देहे शरीरे अत्ययं बध्नाति। एतस्मात् त्रिगुणबन्धान्मुक्तिः देहिज्ञानेन आत्मज्ञानेनैव सम्भवति। ज्ञानं हि सत्त्वगुणातिरेकेन सम्भवति।

**सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।।** ।।भगवद्गीता-14.17।।

इति ज्ञानप्राप्तया तु मनुष्यः गुणातीतः भवति। ततः बन्धन ज्ञानेन ततो मुक्तिः इति।

**गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्।**
**जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते।।** ।।भगवद्गीता-14.20।।

इत्यादिना गुणातीतः परमतत्त्वज्ञः सर्वदुःखातीतश्च भवति। स च द्वन्द्वातीतः जीवनं यापयति। एवं रूपेण व्यक्तित्वसम्पन्नस्य लक्षणानि गीतायामन्यत्रापि दरीदृश्यन्ते। स्थितप्रज्ञाख्येन सः पूर्णव्यक्तिरूपेण प्रशस्तः। स्थितप्रज्ञलक्षणं गीतायाः द्वितीयेऽध्याये वर्णितम्। स हि आत्मनि तुष्टः। सुखदुःखे तस्य समे भवतः। शुभाशुभानयं नाभिनन्दति न वा द्वेष्टि। अयं कूर्मवत् इन्द्रियाणि संहरति विषयेभ्यः। स एव हि स्थितप्रज्ञः यस्य इन्द्रियाणि वशीभूतानि। उक्तञ्च यथा -

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।**
**स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्।**।भगवद्गीता-2.54।।

अत्र शङ्कायाः परिहारः भगवता श्रीकृष्णेन एवमुच्यते। यथा-

**प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।**

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।**

**यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।**
**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।**

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥**
(गीता.2.54,55,56,57,58)

स्थितप्रज्ञस्य निशा सर्वभूतानां दिवा भवति, सर्वभूतानां निशा स्थितप्रज्ञस्य दिवा भवति।

तद्यथा-

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी।**
**यस्यां जाग्रर्ति भूतानि सा निशा पश्यतो मुनेः॥**भगवद्गीता-2.69॥

व्यक्तित्वविकासस्य परमोच्चं सोपानं गीतायां द्वितीयाध्यायस्य अन्तिमश्लोके सुव्यक्तं प्रादर्शि भगवता यत् **तदेषा ब्राह्मी** स्थितिःइति। तथा च-

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥** गीता. 6.17॥

इति भगवान् गीतायां शोभनव्यक्तेः स्वरूपं निरूपयति। तैत्तरीयोपनिषदि व्यक्तित्वविकासस्य प्रक्रिया सुस्पष्टं प्रतिपादिताऽस्ति। पञ्चकोश प्रस्तावोऽपि अत्रैव दृश्यते। जीवात्मा पञ्चकोशान्तः स्थितः। **अन्नमयकोशः** बाह्यतमः। तदन्तः **प्राणमयकोशः**, तदनु **मनोमयकोशः** ततः **विज्ञानमयकोशः।** सर्वान्ततः **आनन्दमयकोशः** तत्रैवात्मस्थितिः। **तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमयः** इति उपनिषद्वाक्यम्। अत्र स्थितस्यैव चैतन्यस्य जीवात्मरूपस्य साक्षात्कारः लक्ष्यपूर्तिः तदा एव व्यक्तित्वविकासः पूर्णः भवति। आधुनिकेषु श्रीअरविन्दो महर्षिः चैतन्यपुरूषः अपि पूर्णव्यक्तित्ववानेव। तन्मते भौतिकसत्तायाः प्राणसत्ता प्रवेशः ततः मानसिक-सत्ताप्राप्तिः। ततश्च आध्यात्मिकसत्ता। ततः मननिदिध्यासनादिना चैतन्यपुरुषप्राप्तिः। "अतिमानसिकचेतनायां न कोऽपि प्रश्नः अवशिष्यते। प्रश्नाः केवलं मनसः सृष्टिः। अतिमानसः व्यक्तिः केवलं सत्यमेव पश्यति। एकात्मके पूर्णे वस्तुनि अन्यत् सर्वं विलीनं भवति" इति तेषां मतम्।

**उपसंहारः-**

भारतीयाः व्यक्तित्वविकासाय बहून् मार्गान् परिकल्पितवन्तः। तत्र षोडश संस्काराः वर्णाश्रमधर्माश्च प्रधानाः। एषु व्यक्तित्वविकासाय मार्गः निर्दिष्टः। आत्मसाक्षात्कारपर्यन्तं व्यक्तित्वविकासः एव मानवजीवनलक्ष्यम्। तदर्थमेव अन्ते संन्यासाश्रमप्रवेशः। ब्राह्मचर्य-गार्हस्थ्य-वानप्रस्थाद्याश्रमैः विकसन् व्यक्तिः संन्यसे पूर्णतमेति। एवमेव वर्णव्यवस्थापि कर्मकौशलावाप्त्यर्थं प्रयुक्तमस्ति।

**सन्दर्भग्रन्थसूची-**


1. आधुनिक मापन एवं मूल्यांकन, गुप्ता एस.पी. इलाहाबाद, शारदा पुस्तक भवन 2001
2. बालमनोविज्ञान, योगेन्द्रजीत, आगरा, बिनोद पुस्तक मंदिर, 1985
3. भारद्वाज, दिनेश चन्द्रा, भारतीय शिक्षा की आधुनिक समस्यायें, आगरा, बिनोद पुस्तक मंदिर, 1964
4. शुक्लयजुर्वेदः, चौखम्बा, नव-देहल्ली
5. ऋग्वेदः, चौखम्बा प्रकाशनम्, नव-देहल्ली
6. चरकसंहिता, चौखम्बासुरभारती, प्रकाशनम्, नव-देहल्ली
7. वेदान्तपरिभाषा, चौखम्बाप्रकाशनम्, नव-देहल्ली
8. श्रीमद्‌भगवद्‌गीता, गीताप्रेस, गौरखपुर
9. न्यायसूत्रम्,
10. ईशादि नौ उपनिषद्, गीताप्रेस, गौरखपुर
11. सिंह कुमार अरुण, शिक्षामनोविज्ञान
12. पाठक, पी.डी. शिक्षामनोविज्ञान
13. भट्टजयन्तः, न्यायमञ्जरी
14. Aadhunik Maapan Evam Mulyankan, Gupta S.P., Allahabad, Sarada Pustak Bhavan, 2001
15. Amarakosa, Sharma Vishvanatha, Delhi, Motilal Banarsidass, 1992
16. Bala Manovijnan, Yogendrajit, Agra, Vinod Pustak Mandir, 1985
17. **Bharadwaj, Dinesh Chandra,** Bharatiya Shiksha ki Adhunika Samasyaye, Agra, Vinod Pustak Mandir, 1964
18. **Bista Abharani,** Pragata Shiksha Manovijanan, Agra, Vinod Pustak Mandir, 1998


✦✦✦

 ISSN : 0975-1769

# पण्डित मधुसूदन ओझा विरचित अपरवाद में सृष्टिमूलक चतुर्वाद मीमांसा

**डॉ. मङ्गलाराम***

ऋग्वेद के दार्शनिक सूक्तों में एक प्रसिद्ध सूक्त है नासदीय सूक्त। उसमें परमेष्ठी प्रजापति ने प्रलय अवस्था में स्थित इस जगत् के मूलकारण के विषय में जिज्ञासा प्रकट करते हुए कहा है कि उस समय न असत् अर्थात् नामरूपादि रहित अवस्था थी, न सत् अर्थात् नामरूपात्मक अवस्था ही थी, न कोई लोक था, न आकाश ही था जो ऊपर है। इस जगत् को किसने, कहाँ तथा किसकी सुरक्षा में आवृत्त किया था? क्या उस समय गम्भीर जल था? तब मृत्यु नहीं थी, अमृतत्व भी नहीं था। रात्रि तथा दिन का भेदात्मक ज्ञान भी नहीं था एक तत्त्व वायु के बिना भी अपनी इच्छाशक्ति से साँस ले रहा था। उससे बढ़कर अलग पहले कुछ भी नहीं था -

**नासदासीन्नो सदासीत्तदानीं**
**नासीद्रजो नो व्योमा परो यत्।**

**किमावरीवः कुह कस्य शर्म-**
**न्नम्भः किमासीद् गहनं गभीरम्॥**

**न मृत्युरासीदमृतं न तर्हि**
**न रात्र्या अह्न आसीत्प्रकेतः।**

**आनीदवातं स्वधया तदेकं**
**तस्माद्धान्यन्न परः किं च नास॥**[1]

पण्डित मधुसूदन ओझा ने भी इसी वैदिक अवधारणा को गति देते हुए अपने अपरवाद नामक ग्रन्थ में सृष्टि के मूलकारण के विषय में चार वाद प्रस्तुत किये हैं। वे हैं - स्वभाववाद, यवृच्छावाद, नियतिवाद तथा प्रकृतिवाद।

---

* आचार्य, संस्कृत विभाग, जयनारायण व्यास विश्वविद्यालय, जोधपुर-342 001

1. ऋग्वेद, 10.129.1-2

**स्वभाववाद** – स्वभाववाद के अनुसार यह सब कुछ स्वभाव से ही प्रवृत्त हुआ है, जो जैसा है उसे वैसा ही समझना चाहिये – **स्वभावतः सर्वमिदं प्रवृत्तं यथास्ति यत्तद्धि तथा प्रतीयात्।**[1] वायु, तेज, जल और पृथिवी ये चार तत्त्व हैं। इनसे भिन्न अन्य कोई तत्त्व नहीं है। इन चारों के संयोग और वियोग में हेतु स्वभाव ही है, स्वभाव से ही यह सब कुछ है। परस्पर मिले इन चारों तत्त्वों से ही किसी समय विज्ञानघन परमात्मा उठकर जगद्रूप में आता है और उन्हीं के पीछे नष्ट भी हो जाता है। देह के अतिरिक्त कोई आत्मा नहीं है, न कोई अन्य लोक है और न ईश्वर ही है। हम प्रत्यक्ष रूप में जो पाते हैं, वही वास्तव में है। जो काल्पनिक है वह सत् नहीं है –

**देहातिरिक्तश्च न कश्चिदात्मा लोकान्तरं नास्ति न चेश्वरोऽस्ति।**
**प्रत्यक्षमत्रोपलभामहे यत्तदस्ति यत्काल्पनिकं न तत्सत्।।**[2]

इसी विचारणा को भारतीय दर्शन में लोकायतवाद या चार्वाक सिद्धान्त कहा गया है।

स्वभाव स्वतः गति या परिणाम वाला है। सभी भाव स्वभाव से होते हैं, जैसे अग्नि की ज्वाला से ताप तथा प्रकाश का होना, जल में शीतता होना, अन्न तथा जल से तृप्ति होना, काँटों में तीखापन होना, बेर में दो तीखे काँटें साथ-साथ लगना जिसमें एक काँटे का बिल्कुल सीधा होना तथा दूसरे का मुड़े हुए होना, बेर के फल का गोल होना, बेर के फल में कृमि का लगना, हँसों का सफेद होना, तोतों का हरा होना तथा मयूरों का चितकबरा होना स्वाभाविक है।

वास्तव में स्वभाव अनतिक्रमणीय होता है – **स्वभावोऽनतिलङ्घनीयः।**[3] पौरुष प्रयत्न इस विश्व के मूल में नहीं है, विश्व का विभिन्न भावों में परिणमन स्वभाव से ही होता है।

**यदृच्छावाद** – यदृच्छावाद के अनुसार इस जगत् की उत्पत्ति में कोई नियति नहीं है, न कोई हेतु है और न हेतुमान्। यह सब कुछ पूर्णतया आकस्मिक है तथा निश्चित कार्य-कारण के अभाव में सब से सब कुछ हो जाता है –

---

1. ओझा, पण्डित मधुसूदन, अपरवाद (सम्पादक-दयानन्द भार्गव, पण्डित मधुसूदन ओझा शोध प्रकोष्ठ, संस्कृतविभाग, जयनारायण व्यास विश्वविद्यालय, जोधपुर, प्रथम संस्करण, 1992) विषयावताररूप लोकायतवाद अधिकरण, 1
2. वही, लोकायतवाद अधिकरण, 4
3. वही, परिणामवादाधिकरण, 5

**अथो यदृच्छाऽनभिसन्धिपूर्वार्थप्राप्तिर्नियतिर्हि नास्ति।**
**हेतुर्न वा हेतुमदस्ति किश्चाप्याकस्मिकं सर्वत एव सर्वम्।।**[1]

बार-बार दर्शन तथा मनन के आधार पर कार्य-कारण-भाव की कल्पना भ्रान्तिपूर्ण है। मिट्टी से जल होता है या जल से मिट्टी होती है अथवा भूमि से जल प्राप्त होता है या जल से भूमि प्राप्त होती है, इस विषय में किसी एक को कारण तथा अन्य को कार्य मानना मात्र मानसिक कल्पना है, वस्तुस्थिति नहीं। जिस प्रकार ताल फल से कौए को लगा आघात आकस्मिक होता है, उसी प्रकार यह समस्त जगत् आकस्मिक हुआ है। यहाँ कर्तृत्व का अभिमान झूठा है। स्वच्छ आकाश में बादलों का घिर आना, मेघ में बिजली का चमकना, वायु का चलना, आँधी का आना, आकाश से कभी-कभी लोह आदि धातु, पत्थर तथा सर्प का बरसना इत्यादि घटनाएँ यादृच्छिक हैं, अर्थात् फलविशेष की प्राप्ति के उद्देश्य से की जाने वाली प्रवृत्ति के बिना फलप्राप्ति होना है। तात्पर्य यह है कि उपर्युक्त घटनाओं के होने में कोई कारण नहीं है। कारण है नहीं, कार्य है ही, इस कारण यह शंका ही नहीं करनी चाहिये कि यह कैसे हुआ? जो जैसा है उसे उसी रूप में ही अतर्कित भाव से मान लेना चाहिये–

**न कारणं कार्यमिहास्ति तस्मादिदं कुतो नेति न शंकनीयम्।**
**अतर्कितं भावय यद्यथेदं यदृच्छयैवेदमुदेति सर्वम्।।**[2]

**नियतिवाद** - नियतिवाद के अनुसार जब भी जो जितना जिससे हुआ है, वह तब भी उतना उससे वैसे ही होता है। इस जगत् में सब कुछ नियति से आक्रान्त है। सभी भाव नियत रूप से होते हैं। ईश्वर हो, अणु हो अथवा अन्य भी कोई हो, सभी नियति के वश में ही हैं –

**रूपेण सर्वे नियतेन भावा भवन्ति तस्मान्नियतिं पृथग्वत्।**
**मन्यामहे कारणमीश्वरो वाऽणुर्वेतरे वा नियतेर्वशे स्युः।।**[3]

तात्पर्य यह है कि जिस प्रकार प्राचीन काल में भी तिलों से तेल प्राप्त होता था, वैसे ही आज भी होता है और भविष्य में भी होता रहेगा। जैसे तिलों से तेल एक नियत सार्वभौम सनातन तथ्य है जिसके साथ कालविशेष और देशविशेष का सम्बन्ध नहीं है, यह नियति है और विश्व इस नियति से नियत है।

---

1. वही, यदृच्छावादाधिकरण, 1
2. वही, यदृच्छावावाधिकरण, 5
3. वही, नियतिवादाधिकरण, 3

**प्रकृतिवाद** - प्रकृतिवाद के अनुसार यह संसार पुरुष और प्रकृति से बना है। यहां यह बताना आवश्यक है कि पण्डित ओझा द्वारा प्रस्तुत प्रकृति-पुरुष-विषयक अवधारणा सांख्यदर्शन से कतिपय अर्थों में भिन्न तथा मौलिक है।

सांख्यदर्शन यह मानता है कि मूलप्रकृति अविकृति है तथा चेतन पुरुष न प्रकृति है न विकृति है। त्रिगुणत्व, अविवेकित्व, विषयत्व, सामान्यत्व, अचेतनत्व तथा प्रसवधर्मित्व प्रकृति के धर्म हैं, जबकि पुरुष में ये एक भी धर्म नहीं है –

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥**[1]

कार्यों का सीमित परिमाण होने से कार्य-कारण में समानरूपता रहने से, कारणनिष्ठ शक्ति से कार्य की प्रवृत्ति होने से, कार्य-कारण में भिन्नता रहने से तथा नानाविध कार्यों के साथ कारण की अभिन्नता रहने से महदादि समस्त व्यक्त पदार्थों की कारणभूत अकेली अव्यक्त प्रधान प्रकृति की सिद्धि होती है।

महदादि समुदाय अपने से भिन्न के लिये होने से, पुरुष में सत्त्वादि त्रिगुण का अत्यन्ताभाव रहने से, अधिष्ठेयों का अधिष्ठाता होने से, भोग्यों का भोक्ता होने से तथा कैवल्य प्राप्त्यर्थ प्रवृत्त होने से जड़भिन्न चेतन तत्त्व पुरुष की सत्ता सिद्ध होती है। प्रत्येक शरीर में जन्म-मरण एवं अन्तः-बाह्य इन्द्रियों की पृथक्-पृथक् व्यवस्था रहने से, तत्तत् कार्यों के प्रति संसार के यच्चयावत् प्राणियों की एक साथ प्रवृत्ति न होने से तथा प्रत्येक शरीरधारी में त्रैगुण्य की विलक्षणता दिखलाई पड़ने से पुरुषबहुत्ववाद सुस्थिर होता है। पुरुष साक्षित्व, केवलत्व, मध्यस्थत्व, द्रष्टृत्व तथा अकर्तृत्व स्वरूप है। त्रिगुणात्मक परिणामशील महत् के कर्ता होने पर और अत्रिगुण अपरिणामी पुरुष के अकर्ता होने पर भी उन महत् और पुरुष के असाधारण संयोग के फलस्वरूप जड़ 'महत्' चेतनवत् प्रतीत होता है और कर्तृत्व-धर्म त्रिगुणात्मक पदार्थों का होने पर भी उदासीन, द्रष्टा तथा साक्षिमात्र 'पुरुष' कर्ता की तरह अवभासित होता है। पुरुष के द्वारा ही प्रकृति का दर्शन हो सकने के लिये तथा प्रकृति के द्वारा ही पुरुष का कैवल्य हो सकने के लिये प्रकृति-पुरुष का संयोग होता है और उसी संयोग से सृष्टि होती है।

पण्डित मधुसूदन ओझा ने पुरुष के स्वरूप को वर्णित करते हुए कहा है कि पुरुष स्वयम्भू तथा गुणाकर है। गुण के बिना यह पुरुष तथा पुरुष के बिना गुण नहीं रहते हैं। पुरुष में गुण अयुतसिद्ध माने गये हैं। पुरुष का यह गुणभोग ही प्रकृति का रूप बताया गया है –

---

1. ईश्वरकृष्ण, सांख्यकारिका (चौखम्भा ओरियण्टालिया, द्वितीय संस्करण, दिल्ली, 1984), 11

**अस्ति स्वयम्भूः पुरुषो गुणाकरो गुणं विना नैष न तं विना गुणाः।**
**गुणोऽयमत्रायुतसिद्ध इष्यते स चास्य भोगः प्रकृतिर्निरूप्यते।।**[1]

जो आध्यात्मिक पुरुष है, वही आधिदैविक पुरुष हैं। उसमें सम्पूर्ण सर्ग (सृष्टि) है। उन आध्यात्मिक तथा आधिदैविक पुरुषों का अवच्छेद आधिभौतिक नामक तीसरा पुरुष है। ये आध्यात्मिक, आधिदैविक तथा आधिभौतिक नामक तीसरा पुरुष है। ये आध्यात्मिक, आधिदैविक तथा आधिभौतिक पुरुष एक-दूसरे के आश्रय वाले हैं, किसी एक से पृथक् होकर शेष अन्य पुरुष अवस्थित नहीं रह पाते, किन्तु आधिदैविक के अलग होते ही ये तीनों परस्पर पृथक् हो जाते हैं। इन तीनों का समन्वित रूप ही 'पर पुरुष' है।

गुण के योग से यह जो पुरुष का विशिष्ट रूप है उसमें कर्तृत्व भाव आता है। गुण ही उस पुरुष में विकास भाव लाता है। गुण का आश्रय पुरुष विकृत नहीं होता। गुण का आश्रय रूप जो शुद्ध आत्मिक स्वरूप पुरुष है, वह गुण से पृथक् है। गुण और कर्म से पृथक् दृष्ट वह पुरुष रूप न तो विक्रिया को प्राप्त होता है और न ही कर्तृत्वभाव को –

**गुणस्य योऽत्राश्रयभाग इष्यते स शुद्ध आत्मा पुरुषः पृथङ्मतः।**
**रूपं हि तत्कर्मगुणातिरेकतो दृष्टं न तद्विक्रीयते न कर्तृ तत्।।**[2]

संसार में प्रकृति के गुणों से ही सम्पूर्ण कर्म विवशतया किये जाते हैं, तो भी अहंकारविमूढ आत्मा "मैं कर्ता हूँ" इस प्रकार गहरा अभिमान रखता है। आत्मा में आकस्मिक रूप से काल, स्वभाव और कर्म उत्पन्न हो जाते हैं। काल से गुणों की व्यतिक्रिया होती है, स्वभाव से गुणपरिणाम होता है। इनमें जो कर्म हैं, उनसे महदादि सर्ग होते हैं। इस संसार में जो कुछ भी है, वह गुणों में अनुषक्त है। निर्गुण पुरुष में तो स्वभाव, काल और कर्म कुछ भी नहीं हैं –

**यत्कर्म तस्मिन् महदादयस्ततः सर्गा भवन्तीति यदस्ति तत्त्रयम्।**
**गुणेऽनुषक्तं पुरुषे तु निर्गुणे न स स्वभावो न च कालकर्मणा।।**[3]

निर्विशेष में विशेषता उत्पन्न करने वाला गुण क्रमशः तीन प्रकार का स्वरूप धारण करता है। इनमें सत्त्व गुण सर्वाधिक निकट है। इसके पश्चात् रजोगुण है तथा फिर तमोगुण है। वे तीनों गुण ही समुदित रूप में प्रकृति है।

---

1. अपरवाद, प्रकृतिवादाधिकरण, 1
2. वही, 5
3. वही, 8

स्थिति का हेतु सत्त्व गुण है, प्रवृत्ति का हेतु रजोगुण है तथा निवृत्ति है तथा निवृत्ति का हेतु तमोगुण है। प्रवर्तमान, निवर्तमान तथा स्थित विश्व को 'पुरुष' समझना चाहिये। सत्त्व गुण भूमा तथा सुख स्वरूप है, रजोगुण अल्पता तथा दु:खस्वरूप है एवं तमोगुण स्तम्भन तथा मोहनस्वरूप है। सांख्याचार्यों ने सत्त्व गुण को हल्का तथा प्रकाशक, रजोगुण को उत्तेजक तथा चंचल एवं तमोगुण को भारी तथा अवरोधक माना है। प्रदीप की तरह मिलकर तीनों गुणों का व्यापार एक ही प्रयोजन के लिये होता है –

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥**[1]

**समीक्षा** – उपर्युक्त विवेचन से यह निष्कर्ष निकलता है कि सांख्य-दार्शनिक जहां त्रिगुणात्मिका प्रकृति से ही समस्त सृष्टि की उत्पत्ति मानते हैं और पुरुष को मात्र साक्षिरूप तथा चेतन तत्त्व मानते हैं, वहाँ पण्डित ओझा ने पुरुष के दो भेद किये हैं, गुणी पुरुष तथा निर्गुणी पुरुष। गुणी पुरुष को हम विशिष्ट पुरुष अथवा कर्तृत्वभावापन्न पुरुष भी कह सकते हैं। निर्गुणी पुरुष को गुणाश्रय पुरुष अथवा पर पुरुष कह सकते हैं। यह निर्गुणी पुरुष ही सांख्यदर्शन वाला साक्षिपुरुष है। समस्त कर्मों का कारण पण्डित ओझा ने प्रकृति के गुणों को माना है, सांख्यदार्शनिक त्रिगुणात्मिका प्रकृति को परिणामशील मानते हुए उसे सृष्टि का हेतु मानते हैं।

प्रकृति से होने वाली सृष्टि के क्रम तथा सर्ग भेदों के बारे में भी पण्डित ओझा की अवधारणा तथा सांख्याचार्यों का अवधारणा में पर्याप्त अन्तर है।

सांख्यदार्शनिकों का कहना है कि प्रकृति से महान्, महान् से अहंकार, अहंकार से एकादश इन्द्रियाँ तथा पञ्च तन्मात्राएँ एवं पञ्च तन्मात्राओं से पञ्च महाभूतों का आविर्भाव होता है –

**प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः।**
**तस्मादपि षोडशकात् पञ्चभ्यः पश्चभूतानि॥**[2]

सांख्याचार्यो ने मुख्यतया त्रिसर्ग की चर्चा की है बुद्धिसर्ग, अहंकारसर्ग और पञ्चतन्मात्रसर्ग।

---

1. सांख्यकारिका, 13
2. वही, 22

**बुद्धिसर्ग** – महान् का दूसरा नाम बुद्धि है, जो निश्चयात्मक व्यापार वाली है – **अध्यवसायो बुद्धिः।**[1] बुद्धि के दो रूप हैं सात्त्विक और तामसिक। सात्त्विक बुद्धि में धर्म, ज्ञान, वैराग्य और ऐश्वर्य की प्रधानता रहती है, जबकि तामसिक बुद्धि में अधर्म, अज्ञान, अवैराग्य और अनैश्वर्य की प्रधानता रहती है।

**अहंकार सर्ग** – अहंकार का धर्म है अभिमान करना – **अभिमानोऽहंकारः**[2]**।** इससे दो प्रकार का सर्ग उत्पन्न होता है इन्द्रियात्मक सर्ग तथा पञ्चतन्मात्रात्मक सर्ग। इन्द्रियात्मक सर्ग के तीन भेद हैं-ज्ञानेन्द्रिय सर्ग, कर्मेन्द्रिय सर्ग और ज्ञानकर्मोभयेन्द्रिय सर्ग। ज्ञानेन्द्रियाँ पाँच हैं चक्षु, श्रोत्र, घ्राण, रसना तथा त्वक्। कमेन्द्रियाँ भी पाँच हैं- वाक्, पाणि, पाद, पायु और उपस्थ। मन ज्ञानकर्मोभयेन्द्रिय है जिसका धर्म है संकल्प-विकल्प करना। शब्द, स्पर्श, रूप रस और गन्ध ये पंचतन्मात्राएँ हैं, जिन्हें अविशेष कहा जाता है।

**पञ्चतन्मात्र सर्ग** – अविशेष पञ्च तन्मात्राओं से आकाश, वायु, अग्नि, जल और पृथिवी ये पञ्चमहाभूत उत्पन्न होते हैं जिन्हें 'विशेष' भी कहते हैं, क्योंकि ये महाभूत शान्त, घोर और मूढ रूप होते हैं – **एते स्मृताः विशेषाः शान्ता घोराश्च मूढाश्च।**[3]

पण्डित मधुसूदन ओझा ने सृष्टिक्रम को प्रस्तुत करते हुए कहा है कि जब तक सत्त्व, रजस् और तमस्, ये तीनों गुण एक-दूसरे को विक्षुब्ध न करते हों और साम्यावस्था में हों, तब तक ये प्रकृति कहलाते हैं। जब ये तीनों गुण विषमभाव को प्राप्त हो जाते हैं, तब ये महत् कहलाते हैं –

**विक्षुब्धमन्योन्यमिदं न यावता यावत्समं सा प्रकृतिस्तु तावता।**
**वैषम्यमायान्ति यदा त्रयो गुणास्तदा त्रयस्ते महदुच्यते गुणाः॥**[4]

पण्डित ओझा ने कुल दस सर्गों की चर्चा की है। महत् सर्ग, अहंकार सर्ग, भूत सर्ग, इन्द्रिय सर्ग, देवसर्ग, महाभूत सर्ग, मुख्य सर्ग, तिर्यक् सर्ग, सुकृत सर्ग तथा कुमार सर्ग।

(अ० १-१-३) परिभाषासूत्रं यत्र गुणपदं भवति, वृद्धिपदं वा भवति तत्र सूत्रमिदं गच्छति। तथैव पूर्वत्रासिद्धमिति परिभाषासूत्रस्यापि पूर्वस्मिन् कर्तव्ये परमसिद्धं भवत्ययमर्थः जातः। तर्हीदं सूत्रं कुत्र गतमिति पृच्छायां 'मय उञो वो वा' (अ० ८-३-३३) इत्यत्र गतमिति वक्तव्यम्। अतो 'मोऽनुस्वार' (अ० ८-३-२३) इति कर्तव्ये 'मय उञो वो वे' ति असिद्धं भवति। एवमेव सर्वत्र पूर्वत्रिपादीकर्तव्ये परत्रिपादी असिद्धा। सपादसप्ताध्याय्यामपि अस्य प्रवृत्तिः सञ्जाता, एवं त्रिपाद्यामपि। तर्हि परिभाषत्वमस्तु। परन्तु परिभाषत्वस्वीकारेऽपि दोषः। त्रिपादीष्वपि यथास्य प्रवृत्तिः तथैव सपादसप्ताध्यायीष्वपि अस्य प्रवृत्तिः स्यादेव। एवञ्च सपादसप्ताध्याय्यामपि पूर्वसपादीशास्त्रं प्रति परसपादीशास्त्रमसिद्धं भवति। इदं सूत्रं बोधयति यत् पूर्वशास्त्रेण विधीयमानं कार्यं यत्र प्राप्तमस्ति तत्रैव यदि परशास्त्रेण विधीयमानमपि कार्यं प्राप्तं भवति तत्र पूर्वकार्यं प्रति परशास्त्रस्यासिद्धत्वं वर्तते। एवञ्च यत्र 'शविप्रतिषेधे परं कार्यमिश्त्यस्य स्थितिः वर्तते, तत्र पूर्वमपि प्राप्तं भवति, परमपि प्राप्तं भवति, तत्र परं वलवद्भवतीति तत्सूत्रं बोधयति। तथैव यस्मिन् कस्मिंश्चिदपि लक्ष्ये पूर्वशास्त्रमपि प्राप्तं भविष्यति अथ च परशास्त्रमपि प्राप्तं भविष्यति, तत्रेदं सूत्रं गत्वा कथयिष्यति यत् पूर्वस्मिन् कर्तव्ये परमसिद्धं भवति।एवञ्च सपादसप्ताध्यायीस्थशास्त्रेष्वपि अस्य सूत्रस्य प्रवृत्तिः स्यादिति परिभाषत्वे दोषोऽस्ति।एवञ्च बहवो दोषा भविष्यन्ति। अतो नेदं परिभाषासूत्रम्।

तर्हि किमिदमसिद्धत्वविधायकं विधिसूत्रम्? यदि विधिसूत्रं तर्हि विधिसूत्रं स्वस्थान उपविशति। तत्रैव उपविश्य सर्वाणि कार्याणि कुर्वन्तीदं सूत्रमत्रैवास्ति। अस्य सूत्रस्य अर्थोऽपि सञ्जातोऽस्ति यत् सपादसप्ताध्यायीस्थं शास्त्रं प्रति त्रिपादीस्थं शास्त्रमसिद्धं भवतीति। तर्हि अग्रे यल्लिखितं त्रिपाद्यामपि पूर्वं प्रति परमसिद्धं स्यादिति अर्थो न भविष्यति, यतो ह्ययमर्थस्तदैव भवति यदेदं सूत्रं त्रिपादीष्वपि गच्छति। एवञ्च पूर्वपदेन पूर्वत्रिपादीनामपि ग्रहणं भवति। एवञ्च पूर्वत्रिपादीं प्रत्यपि परत्रिपादी असिद्धा भवत्ययमर्थ अधिकारत्वे सत्येव सम्भवति। यस्मिन् स्थाने इदं सूत्रमस्ति तत्र स्थित्वा पूर्वपदेनास्माभिः सपादसप्ताध्यायीस्थानामेव ग्रहणं कर्तुं शक्यते। परपदेन त्रिपादीनां ग्रहणं कर्तुं शक्यते। एवञ्च सपादसप्ताध्यायीस्थशास्त्रं प्रति त्रिपादीस्थं शास्त्रमसिद्धं भवत्ययमर्थः सम्भवति। त्रिपाद्यामपि पूर्वं प्रति परमसिद्धं भवति- अयमर्थो भवितुं नार्हति, यतो हि पूर्वपदेन त्रिपादीनां ग्रहणं कर्तुं न शक्यते। अस्तु, न वदिष्यामो वयम्। तर्हि 'किम्वुक्तम्', 'मनोरथ' चेत्यादीनां रूपाणां सिद्धिः नैव भवेत्। किम्वुक्तमिति 'किमु उक्तमि'ति दशायां वकारादेशादनन्तरं किम्वुक्तमिति जातम्। अधुना कश्चिद् वदिष्यति यद् 'मोऽनुस्वार' इति सूत्रेण मकारस्य स्थाने अनुस्वारः कथं न? किम्वुक्तमित्यत्र मकारघटितं रूपं भवन्तो लिखन्ति।तर्हि किमुत्तरम्?

तस्मात्तत्र सिद्धान्तकौमुद्यां लिखितमस्ति–'वस्यासिद्धात्वान्नानुस्वार' इति। वकारोऽसिद्धोऽस्तीति कृत्वा 'मोऽनुस्वार' इति सूत्रेण अनुस्वारो नैव भवति। तर्हि कथमसिद्धमित्याकाङ्क्षायां वक्तव्यं– 'मोऽनुस्वार' अष्टमाध्यायस्य द्वितीयपादस्य द्वात्रिंशत्तमं सूत्रम्, अथ च 'मय उञो वो वे' ति त्रयत्रिंशदस्ति तस्यैव पादस्य। उभयं सूत्रद्वयं त्रिपादीति कृत्वा त्रिपादीषु पूर्वं प्रति परमसिद्धं न भवति। एवञ्च 'मोऽनुस्वार' इति शास्त्रदृष्ट्या 'मय उञो वो वे'ति शास्त्रमसिद्धं न भवति। तर्हि 'वस्यासिद्धत्वान्नानुस्वार' इति कथं वदति भट्टोजिदीक्षितः? कथं वकारासिद्धः? सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा भवति, त्रिपादीष्वपि पूर्वं प्रति परमसिद्धं न भवति। एवञ्च वकारोऽसिद्धो न भविष्यतीति कृत्वा अवश्यं तत्रानुस्वारेण भवितव्यम्, तथापि अनुस्वारो न भवति। अतः अस्माभिर्वक्तव्यं यन्नेदं विधिसूत्रम्। विधिसूत्रं स्यात् तदानीं अर्थः स्यात्– सपादसप्ताध्यायीं प्रति त्रिपाद्यासिद्धा भवतीति। परन्तु त्रिपाद्यामपि पूर्वं प्रति परमसिद्धं भवत्ययमर्थो विधिसूत्रपक्षे नैव स्यात्। तथा च किम्वुक्तमिति रूपस्य सिद्धिर्न स्यात्। एवञ्च बहूनि तथाविधानि लक्षणानि सन्ति। केवलं विधित्वपक्षे तत्तल्लक्ष्याणां सिद्धिर्भवितुं नार्हति। अतः केवलं विधिसूत्रमेतदिति वक्तुं न शक्यते, यतो हि त्रिपादीष्वपि अस्य सूत्रस्य प्रवृत्तिः इष्टा वर्तते।

नियमसूत्रमपि इदं नास्ति, यतो हि शास्त्रान्तरेण परशास्त्रस्य असिद्धत्वं केनापि सूत्रेण न क्रियते। यथा कृत्तद्धितसमासाश्चेत्यस्मिन् सूत्रे समासग्रहणं नियमार्थम्। यतो हि समासस्य प्रातिपदिकसंज्ञा अर्थवत्सूत्रेणैव सिद्धा। एतस्मात्पूर्वं किमपि सूत्रान्तरं नास्ति येन परशास्त्रस्य असिद्धत्वविधानं स्यात्। अतः सिद्धस्यार्थस्य अप्रतिपादकत्वादिदं नियमसूत्रमपि भवितुं नार्हति।

अस्तु तर्हि अतिदेशसूत्रम्। अतिदेशसूत्राणामपि सर्वत्र प्रवृत्तिः भवति। यथा 'स्थानिवदादेश अनलविधौ' इति अतिदेशसूत्रं सर्वत्र गच्छति। सपादसप्ताध्यायीं प्रति त्रिपादीस्थसूत्राणि असिद्धानि भवेयुः, अथ च त्रिपादीष्वपि पूर्वं प्रति परमसिद्धं भवेदित्येव तात्पर्यमस्ति अस्य सूत्रस्य। तस्मादतिदेशसूत्रमिदम्। परन्तु अतिदेशपक्षेऽपि स दोषोऽस्ति, यो दोषः परिभाषापक्षेऽस्ति। अतो नेदमतिदेशसूत्रम्।

एवञ्च, परिशेषादिदमधिकारसूत्रम्। अधिकारसूत्रं इतः पूर्वं गन्तुं न शक्नोति। अधिकारसूत्रस्योत्तरोत्तरसम्बन्धो भविष्यति। अस्मात्सूत्रात् उत्तराणि यानि सूत्राणि सन्ति तेषु अस्य सूत्रस्य सम्बन्धो भवेत्। यदा तत्र सम्बन्धो भवति तदा तत्र कोऽर्थः– इति चिन्तनीयमस्ति। यथा 'हो ढः' (अ० 8-2-31) इति सूत्रे अस्य सूत्रस्य उपस्थितिः सञ्जाता। 'हो ढः' इति सूत्रं त्रिपादीस्थं सूत्रं वर्तते। एवञ्च 'हो ढः' इति सूत्रे पूर्वत्रासिद्धमिति सूत्रं गतम्। तदा वाक्यभेदेन अन्वयो भवति। प्रतिसूत्रं

वाक्यद्वयं भवति। एकं वाक्यं भवति– ह्रस्य ढ स्यात् झलि पदान्ते चेति। द्वितीयं वाक्यं भवति– इदञ्च सूत्रं पूर्वत्र कर्तव्येऽसिद्धं भवतीशति। एवमेव 'संयोगान्तस्य लोपः' (अ० 8-2-23) इति सूत्रेऽपि अस्य सूत्रस्य प्रवृत्तिः भवति। तत्र संयोगान्तं यत्पदं तदन्तस्य लोपो भविष्यति, इदञ्च सूत्रं पूर्वत्र कर्तव्ये असिद्धमस्ति। एवं प्रकारेण 'रो रि' (अ० 8-3-14) इत्यत्रापि गमिष्यति। अनेन प्रकारेण वाक्यभेदेन समेषां सूत्राणामर्थबोधः। यद्यपि वैयाकरणा वाक्यभेदेन दोषमुद्भावयन्ति, तथापि एकवाक्यत्वे अन्यत्र दोषो भवेदिति एकवाक्यत्वं विहाय वाक्यद्वयमस्माभिः स्वीकरणीयम्। एवञ्च सपादसप्ताध्यायीस्थशास्त्रं प्रति त्रिपादीस्थं शास्त्रन्तु असिद्धं भवत्येव। पूर्वत्रिपादीस्थं प्रत्यपि परत्रिपादीस्थमसिद्धं भविष्यति। अत एव इदं सूत्रमधिकारसूत्रमित्येवास्माभिः अङ्गीकृतम्।

एतदेवाभिप्रेत्य भट्टोजिदीक्षितेन लिखितं– 'सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा', त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादिशति। अत्र असिद्धं भवतीत्यस्यार्थो भवति असिद्धवद्भवति, यतो हि शास्त्रं यदि अस्ति तर्हि तदसिद्धं न भवति। यथा 'सिंहो माणवक' इति कथनेन माणवकः सिंहो न भवति, अपि तु सिंहसदृशो माणवकः। तथैव परशास्त्रमसिद्धं भवतीत्युक्ते असिद्धवद्भवति। वस्तुस्थितौ तदसिद्धम्। अतस्मिन् तद्बुद्धिः आरोपो भवति। यथा 'शुक्तौ इदं रजतमि'ति ज्ञाने शुक्तिः रजतवत्प्रतिभाति। तर्हि तया रजतवत्प्रतिभासमानया शुक्त्या किमपि रजतसम्बन्धि कार्यं भवति खलु? अनाहार्यज्ञानेनैव कार्यस्य सम्पादनं भविष्यति, आहार्यज्ञानेन कार्यस्य सम्पादनं न भवति। प्रमादत्मकेन ज्ञानेन किमपि न भवति। प्रमादात्मकं यदा ज्ञानमिदं रजतं तदैव तेन कार्यासिद्धिः। अस्मिन् सूत्रे असिद्धवत्प्रमादात्मकं ज्ञानमस्ति। अतस्मिन् तद्बुद्धिः कृता। यद्यपि परशास्त्रमसिद्धं नास्ति, तथापि असिद्धवदित्यनेन सूत्रेण प्रतिपाद्यते। एवञ्च लोके यथा प्रमादात्मकेन ज्ञानेन किमपि कार्यं न भवति, तथा अत्रापि किमपि कार्यं न भविष्यति। तर्हि अनेन सूत्रेण विधीयमानत्वमसिद्धत्वं व्यर्थम्। असिद्धत्वविधानमिदं व्यर्थं सत् ज्ञापयति यदस्मिन् शास्त्रे प्रमादात्मकेन ज्ञानेनापि प्रवृत्तिः भवति। अत एव एतत्सूत्रारम्भसामर्थ्याद् भ्रमात्मकं ज्ञानमादायापि अस्माभिः लक्ष्यसिद्धिः कर्तव्या।

(ग) पूर्वत्रासिद्धमिति शास्त्रे विप्रतिषेधे परं कार्यमिति शास्त्रं प्रवर्तते न वा?

इदानीं प्रश्न उदेति अस्माकं मनसि यत् पूर्वत्रासिद्धिविषये विप्रतिषेधशास्त्रं प्रवर्तते न वा? अस्याः शङ्काया उत्तररूपेणास्माभिर्वक्तव्यं – 'विप्रतिषेधे परं कार्यमि'त्यस्यार्थोऽस्ति तुल्यबलविरोधे परं कार्यं भवति। तर्हि युगपदुभयोः शास्त्रयोः समावस्थानमावश्यकं भवति। परन्तु न हि पूर्वत्रासिद्धविषये परशास्त्रं तिष्ठत्येव।

परशास्त्रं पूर्वशास्त्रं पश्यति एव न हि। यदि न पश्यति तर्हि तुल्यबलविरोधो नास्ति। अतस्तुल्यवलविरोधाभावात् पूर्वत्रासिद्धविषये विप्रतिषेधशास्त्रं न प्रवर्तते। अस्मिन् प्रसङ्गे भाष्यस्य काचित्पङ्क्तिः संस्मर्तव्या- 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावा-दुत्तरस्ये'ति।

(घ) कार्यासिद्धत्वपक्षशास्त्रासिद्धत्वपक्षयोः कतरः पक्षोऽत्र युक्तः?

अस्मिन् सूत्रविषये अपरोऽपि एकः प्रश्नोऽस्ति- कार्यासिद्धत्वं वा? शास्त्रासिद्धत्वं वा? किमनेन सूत्रेण पूर्वस्मिन् कर्तव्ये परशास्त्रमसिद्धं भवतीति प्रतिपादनं क्रियते, अथवा पूर्वस्मिन् कर्तव्ये परशास्त्रविहितं कार्यमसिद्धं भवतीति अनेन सूत्रेण प्रतिपाद्यत इति पक्षद्वयं विचारणीयमस्ति। पूर्ववर्त्तिनो ये व्याख्याकाराः सन्ति ते कार्यमसिद्धं भवतीति प्रतिपादयन्ति। परन्तु भट्टोजिदीक्षितप्रभृतयो वदन्ति यत् शास्त्रमसिद्धं भवति। अर्थात् भट्टोजिदीक्षितस्य मतमस्ति यत्पूर्वशास्त्रं प्रति परशास्त्रमेव असिद्धं भवति। केषाञ्चिन्मतमस्ति यत्पूर्वशास्त्रं प्रति परशास्त्रविहितकार्यमसिद्धं भवतीति पक्षद्वयम्। तर्हि उभयोः पक्षयोः कः पक्षो युक्त इत्यस्माभिः विचारणीयमस्ति। शास्त्रस्य कार्यविधानत्वात्, कार्यमेव असिद्धं भवतीत्येव पक्षः अस्माभिः अङ्गीक्रियते। परन्तु कार्यासिद्धत्वपक्षो यदि अस्ति तदा 'मनोरथ' इति रूपस्य सिद्धिर्नैव भवेत्। 'मनस् रथ' इत्यस्यां स्थितौ 'ससजुषो रुः' (अ. 8-2-66) इत्यनेन सूत्रेण 'मन रु रथ' इत्यवस्था प्राप्ता। अनन्तरमुकारस्य लोपो भवति। इदानीं 'मर्नरथ' इत्यस्यामवस्थायां 'हशि चे'ति (अ० 6-1-114) सूत्रस्यापि प्रसक्तिः अस्ति, 'रो रि' इत्यस्यापि प्रसक्तिः अस्ति। तथा हि वर्तते पङ्क्तिः लघुकौमुद्यां- 'हशि च इत्युत्वे रो रि इति लोपे च प्राप्ते' इति। 'हशि चे'ति सूत्रेण उत्वं प्राप्तमस्ति, 'रो रि' इत्यनेन लोपः प्राप्तो भवति। तर्हि अत्र को भवेदिति जिज्ञासायां लिखितमस्ति यद् 'विप्रतिषेधे परं कार्यमि'ति सूत्रेण 'रो रि' इत्यनेन लोप एव भविष्यति। तदनन्तरमुत्वस्यासिद्धत्वात् 'हशि चे'त्यनेन उत्वमेवेति मनोरथः।

इदानीं यदि कार्यासिद्धत्वपक्षस्तदानीमस्य रूपस्य सिद्धिर्भवितुं नार्हति। कथमित्याकाङ्क्षायां वक्तव्यं 'मर्नरथ' इति स्थितिः अस्ति। पूर्वस्मिन् कर्तव्ये परशास्त्रविहितं कार्यमसिद्धं भवतीति पूर्वत्रासिद्धमित्यस्य सूत्रस्यार्थोऽस्ति। तर्हि पूर्वं लक्ष्ये परशास्त्रविहितकार्यं सम्पादनीयमस्ति। तदानीमेव तस्यासिद्धत्वमनेन सूत्रेण भविष्यति। यतो हि आरोपः साधिष्ठानो भवति। यदा रज्जुः अस्ति तत्रैव सर्पारोपः। यदि रज्जुरस्त्येव न हि तर्हि सर्पारोपः कथम्? एवञ्चानेन सूत्रेणासिद्धवत्क्रियते तर्हि परशास्त्रविहितं यत्कार्यं तदसिद्धवद्भवति। अतः पूर्वं परशास्त्रं विहितं कार्यं यदा स्यात्तदानीमेव तस्यासिद्धत्वं वक्तुं शक्यते। अतो लक्ष्ये पूर्वं परशास्त्रविहितं कार्यमस्माभिः कर्तव्यम्। एवञ्च 'मर्नरथ' इत्यस्यामवस्थायां परशास्त्रविहिते कार्ये लोपे सम्पादिते

श्मन रथश इति जातम्। अत्र लोपरूपं कार्यं 'रो री'त्यनेन सूत्रेण विहितम्। तदनन्तरं ष्हशि चेषति सूत्रं गमिष्यति। सूत्रमिदं तत्र गत्वा कथयिष्यति पूर्वस्मिन् कर्तव्ये परशास्त्रविहितकार्यं यल्लोपरूपं कार्यं तदसिद्धवद्भवति। परन्तु तस्यासिद्धवत्कथनेनापि 'देवदत्तहन्तृहतन्यायेन' रेफस्योज्जीवनं भवितुं नार्हति। यथा, देवदत्तस्य हन्तुः हननेन देवदत्तः पुनर्नागच्छति, तथैव भवतु नाम रेफलोपोऽसिद्धः, तस्माद् रेफेन आगन्तुं न शक्यते। एवञ्च यदि कार्यासिद्धत्वपक्षः स्यात्तदानीं पूर्वं लक्ष्ये कार्यसम्पादनमावश्यकम्। तदनन्तरमनेन सूत्रेण तस्यासिद्धत्वं भविष्यति। एवञ्चासिद्धत्वप्रतिपादनेऽपि तस्य वर्णस्य पुनरुज्जीवनं भवितुं नार्हति 'देवदत्तहन्तृहतन्यायेन'। एवं कृत्वा रेफाभावात् 'हशि चे'त्यनेन सूत्रेण उत्वं विधातुं न शक्यते। तर्हि 'मनोरथ' इति रूपस्य सिद्धिप्रतिपादनाय अस्माभिरवश्यमस्मिन् शास्त्रे शास्त्रासिद्धत्वपक्ष आश्रयणीयः। शास्त्रासिद्धत्वपक्षे च पूर्वस्मिन् कर्तव्ये परशास्त्रमेव असिद्धं भवति। एवञ्च 'मर्नरथ' इत्यस्यामवस्थायां उभयोः प्रसक्तिरस्ति। पूर्वस्मिन् कर्तव्ये नाम 'हशि चे'ति कर्तव्ये 'रो री'ति शास्त्रमेव असिद्धं भवति। इदं शास्त्रं यदा असिद्धं भवति, तदा तस्य प्रवृत्तिरेव न सञ्जाता। अनन्तरं रेफस्य स्थाने उकारादेशे गुणे कृते सति 'मनोरथ' इति रूपस्य सिद्धिर्भवति। अत एव 'मनोरथ' इति रूपसिद्ध्यर्थमस्माभिः कार्यासिद्धत्वपक्षं परित्यज्य शास्त्रासिद्धत्वपक्षमेव ग्रहणीयम्।

(ङ) भगवता पाणिनिना 'पूर्वत्र न' इत्येव सूत्रं किमर्थं न क्रियते?

अस्मिन् सूत्रविषये अन्तिमः प्रश्नस्तावद् भगवता पाणिनिना कथं 'पूर्वत्र ने'ति सूत्रमकृत्वा 'पूर्वत्रासिद्धमि'त्येव सूत्रं विहितम्? ष्पूर्वत्र नेष्त्येव सूत्रमस्तु। अस्य सूत्रस्यार्थो भविष्यति– पूर्वस्मिन् कर्तव्ये परशास्त्रं न प्रवर्तते। यथा 'मनोरथ' इत्यत्र 'मनस् रथ' इति स्थितौ 'ससजुषो रुः' इत्यनेन रुत्वे जाते 'मर्नरथ' इत्यस्यामवस्थायां पूर्वस्मिन्नित्युक्ते 'हशि चे'ति कर्तव्ये परशास्त्रं' 'रो री'ति शास्त्रं न प्रवर्तते। अनन्तरमुत्वे गुणे कृते 'मनोरथ' इति रूपस्य सिद्धिर्भविष्यति, किमर्थमसिद्धत्वविधानम्? तर्हि 'पूर्वत्र ने'त्येव सूत्रमस्त्विति केषाञ्चन प्रश्नोऽस्ति, परन्तु नायं तेषां प्रश्नः साधुः। यतो हि एवं सूत्रे स्वीक्रियमाणे दोषद्वयमुदेति। प्रथमतोऽस्य सूत्रस्यार्थः को भविष्यति? यदि भवान् कथयिष्यति यत् 'पूर्वस्मिन् शास्त्रे कर्तव्ये परं न प्रवर्तत' इत्ययमर्थः अस्य सूत्रस्य वर्तते, तर्हि 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' (अ० ८-२-२) इति सूत्रं व्यर्थं स्यात्। कथम्? 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रं नियमसूत्रमस्ति। एष्वेव न लोपः असिद्धो भवेद्, नान्यत्र। तेन 'राजाश्व' इत्यादौ सवर्णदीर्घसिद्धिः। 'राज्ञः अश्व' इति विग्रहे षष्ठीतत्पुरुषसमासे कृते सति 'राजन् ङस्' इति स्थितौ 'नलोपः प्रातिपदिकान्तस्ये'ति (अ० 8-2-7) सूत्रेण नकारस्य लोपो भवति। अनन्तरम्

'अकः सवर्णे दीर्घः' (अ० 6-1-101) इति सवर्णविधायकं सूत्रं प्रवर्तते। परन्तु 'नलोपः प्रातिपदिकान्तस्ये'ति सूत्रम् 'अकः सवर्णे दीर्घ' इति सूत्रदृष्ट्या असिद्धमस्ति। अतो 'नलोपः प्रातिपदिकान्तस्ये'ति सूत्रमसिद्धं स्यात्। ततश्च सवर्णे दीर्घे कृते सति 'राजाश्व' इति रूपं न भवेत्। परन्तु 'राजाश्व' इति रूपन्तु भवत्येव। कथं तस्य सिद्धिः? तर्हि वक्तव्यं 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रं यदा नियमसूत्रं भवति, तदा 'राजाश्व' इति रूपसिद्धिर्भवेत्। नियमत्वं कथमस्तीति ज्ञानतृष्णानिवृत्तये वक्तव्यं नलोपविधायकं 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रं त्रिपादीस्थं सूत्रं वर्तते। एवञ्च संज्ञाविधौ, स्वरविधौ, कृति, तुग्विधौ च सर्वत्र पूर्वत्रासिद्धमिति सूत्रेणैव 'नलोपः प्रातिपदिकान्तस्ये'ति सूत्रस्यासिद्धत्वं वर्तते। एवञ्च नलोपः स्वयमेव असिद्धोऽस्तीति कृत्वा 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रस्य काचिदावश्यकता नास्ति। एवञ्च 'सिद्धे सति आरभ्यमाणो विधिर्नियमाय कल्पत' इति नियमानुसारं 'न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रं नियमसूत्रं वर्तते। यदेदं सूत्रं नियमसूत्रं भवति तदानीं सुब्विधौ, स्वरविधौ, कृति, तुग्विधावेव नलोपः असिद्धो भवति, नान्यत्र, अपि तु सिद्ध एव। एवञ्च सवर्णदीर्घादेशे कर्तव्ये नलोपः सिद्ध एव तिष्ठति, असिद्धो न भवतीति 'राजाश्व' इत्यत्र सवर्णदीर्घो दीर्घो भवत्येव। 'राजभ्यामि'त्यत्र 'सुपि चे'त्यनेन (अ. 7-3-102) दीर्घो न भवति, यतो हि सुब्विधौ नलोपः असिद्धो भवति। परन्तु 'अकः सवर्णे दीर्घ' इति सूत्रदृष्ट्या नलोपः सिद्ध एव वर्तत इति कृत्वा 'राजाश्व' इत्यत्र सवर्णदीर्घः सिद्धः।

अधुना 'पूर्वत्र ने'ति यदि सूत्रमस्ति तर्हि 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रस्य काचिदावश्यकता नास्ति, यतो हि अस्माभिः 'पूर्वत्र ने'त्यस्यार्थः सम्पादितोऽस्ति 'पूर्वस्मिन् शास्त्रे कर्तव्ये परं न प्रवर्तत' इति। अधुना 'राज्ञः अश्व' इति विग्रहे षष्ठीतत्पुरुषसमासे सुब्लुकि सति 'राजन् अश्व' इत्यस्यामवस्थायां कस्यचिदपि सपादसप्ताध्यायीस्थशास्त्रस्य प्रवृत्तिर्न भवति। इदानीं कस्यचिदपि पूर्वशास्त्रस्य प्राप्तिर्नास्ति। एवञ्च पूर्वं ष्नलोपः प्रातिपदिकान्तस्येषति सूत्रेण नलोपो जातः। अनन्तरम् 'अकः सवर्णे दीर्घ' इति सूत्रमागमिष्यति।तदनन्तरं सवर्णदीर्घो भूत्वा 'राजाश्व' इति रूपस्य सिद्धिः। 'पूर्वत्र ने'ति सूत्रं यदा भविष्यति तदैवासिद्धत्वमनेन सूत्रेण भविष्यति यदा उभयोरेकस्मिन् एव समये प्राप्तिः स्याद्, यतो हि अर्थः कृतः पूर्वस्मिन् शास्त्रे कर्तव्ये परं न प्रवर्तते। यथा 'मर्नरथ' इत्यस्यामवस्थायां 'हशि चे'ति सूत्रमपि प्रवर्तनीयमस्ति, 'रो री'ति सूत्रमपि प्रवर्तनीयमस्ति। तर्हि पूर्वस्मिन् कर्तव्ये 'हशि चे'ति सूत्रेण उत्वे कर्तव्ये परं 'रो री'ति सूत्रं न प्रवर्तते। अतो 'मर्नरथ' इत्यस्यामवस्थायां 'रो री'ति शास्त्रस्य अप्रवृत्तौ 'हशि चे'ति सूत्रस्य प्रवृत्तौ 'मनोरथ' इति सिद्धम्। परन्तु यत्र पूर्वशास्त्रस्य परशास्त्रेण साकं प्रवृत्तिरेव नास्ति, तत्र 'पूर्वत्र

ने'ति सूत्रं न गमिष्यति। यथा 'राजन् अश्व' इत्यत्र कस्यचित्पूर्वशास्त्रस्य प्राप्तिर्नास्तीति हेतोः परशास्त्रस्य 'नलोपः प्रातिपदिकान्तस्ये'त्यस्य प्रवृत्तिर्भविष्यति। एतस्य प्रवृत्त्यनन्तरं पूर्वशास्त्रस्य प्राप्तिरस्ति, तदपि प्रवर्तते। प्रवृत्तेरनन्तरमपि नलोपः असिद्धो भविष्यतीति वक्तुं न शक्यते। यतो हीदानीमसिद्धत्वमस्माभिः न विधीयते। प्रवृत्तौ प्राप्तिः निषेधो वा क्रियते। यदि पूर्वशास्त्रस्य प्राप्तिरस्ति, तर्हि परं न प्रवर्तते। यदि पूर्वशास्त्रस्य प्राप्तिरेव नास्ति तर्हि परमवश्यमेव प्रवर्तते। एवञ्च 'राजन् अश्व' इत्यस्यामवस्थायां परशास्त्रस्य 'नलोपः प्रातिपदिकान्तस्ये'त्यस्य प्रवृत्तिर्भविष्यत्येव। प्रवृत्तेरनन्तरं 'राज अश्व' इत्यवस्थायां यदा नलोपः सञ्जातः, तदानीं नलोप आगमिष्यतीत्यपि वक्तुं न शक्यते, यतो हि इदानीमसिद्धत्वविधानं न क्रियते। एवं न लोपे कृते सति 'राज अश्व' इति स्थितौ 'अकः सवर्णे दीर्घ' इत्यस्य प्राप्तिरस्ति। इदानीमेतदपि वक्तुं न शक्यते यन्नलोपो न प्रवर्तते। नलोपस्तु पूर्वमेव जातोऽस्ति। अतो 'भुक्तवन्तं प्रति मा भुङ्क्ष्व, किं तेन कृतं स्यादिशति न्यायमाश्रित्य 'राजाश्व' इति रूपस्य स्वयमेव सिद्धिः जाता। तर्हि 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रस्य न काचिदावश्यकतेति सूत्रं व्यर्थं भविष्यति।

तर्हि भवान् वदिष्यति यदस्तु नाम भवेद् व्यर्थं, लाघवं भविष्यति यदि सूत्रं विनैव कार्यसिद्धिरिति तत् सूत्रं परित्यज्यताम्। तस्य सूत्रस्य परित्यागः कर्तुं न शक्यते, यतो हीदानीं 'राजभ्यामि'ति रूपस्यापि सिद्धिर्न स्यात्। 'राजन् भ्यामि'ति स्थितौ 'नलोपः प्रातिपदिकान्तस्ये'ति सूत्रं परित्यज्य अन्यस्य कस्यचित्सूत्रस्य प्रसक्तिर्नास्ति। अतः पूर्वशास्त्रस्य कर्तव्यता इदानीं नास्ति। केवलं 'नलोपः प्रातिपदिकान्तस्ये'त्यस्यैव कर्तव्यता वर्तते। अतो 'नलोपः प्रातिपदिकान्तस्ये'ति सूत्रेण नलोपो भविष्यति। अनन्तरं 'सुपि चे'त्यस्य प्रसक्तिरस्ति। तदनन्तरं दीर्घो भविष्यति। अतो 'राजभ्यामि'ति रूपापत्तिः। अतो यदि 'पूर्वत्र ने'ति न्यासं कृत्वा पूर्वस्मिन् शास्त्रे कर्तव्ये परं न प्रवर्तत इत्यर्थो यदि भविष्यति, तदा 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रस्य भाष्यसम्मतनियमत्वस्यापि खण्डनमिदानीं स्यात्, किञ्च श्राजभ्यामिश्त्यादौ ष्सुपि चेष्त्यनेन दीर्घापत्तिः। अतः 'पूर्वस्मिन् शास्त्रे कर्तव्ये परं न प्रवर्तत' इत्यर्थोऽस्य सूत्रस्य कर्तुं न शक्यते।

अस्तु तर्हि 'पूर्वशास्त्रस्य सम्भावनायां परं न प्रवर्तत' इत्यर्थोऽस्य सूत्रस्य वयं कथयिष्यामः। एवञ्च 'राजन् अश्व' इत्यत्र पूर्वशास्त्रस्य 'अकः सवर्णे दीर्घ' इति शास्त्रस्य सम्भावनास्ति, यतो हि यदि नलोपः स्यात्तदा सवर्णदीर्घः स्यादिति सम्भावना वर्तते। तर्हि अस्यां सम्भावनायामेव परं 'नलोपः प्रातिपदिकान्तस्येषति शास्त्रस्य प्रवृत्तिः न स्यात्। परन्तु 'राजन् अश्व' इत्यत्र 'नलोपः प्रातिपदिकान्तस्ये'ति सूत्रस्य प्रवृत्तिर्भवेदित्येतदर्थं 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति शास्त्रस्य नियमत्व-

मङ्गीकर्तव्यम्।नियमे अङ्गीकृते च सति सन्धिविधौ नलोपः सिद्ध एव तिष्ठतीति कृत्वा नलोपे कृते सति 'राजाश्व' इति रूपस्य सिद्धिः भविष्यति। सुब्विधौ च नलोपः सिद्धो न तिष्ठतीति कृत्वा 'राजभ्यामि'त्यत्र दीर्घो न भविष्यति–परन्तु इदमपि वक्तुं न शक्यते, यतो हि 'राजन् भ्यामि'त्यवस्थायां पूर्वशास्त्रस्य सम्भावनायां परं न प्रवर्तते अयमर्थः कृतः। तर्हि श्राजन् भ्यामिश्त्यत्रापि यदि नलोपः स्यात्तदानीं 'सुपि च'त्यनेन दीर्घः स्यादिति सम्भावना वर्तते। अतः पूर्वशास्त्रस्य सम्भावनायां सत्यां नलोपविधायकस्य शास्त्रस्य पूर्वमेव प्रवृत्तिर्न स्यात्। तदानीं 'राजन् भ्यामि'त्यत्र नलोपो न करिष्यामः, तदा राजन्भ्यामिति प्रयोगापत्तिः। अतः 'पूर्वत्र ने'ति सूत्रं कर्तुं न शक्यते। तस्मात् 'पूर्वत्रासिद्धमि'त्येव सूत्रं कृतं सूत्रकारेणेति शिवम्।

**सहायकग्रन्थावली–**

1. बालमनोरमातत्त्वबोधिनीसमेता वैयाकरणसिद्धान्तकौमुदी।
2. नागेशकृतलघुशब्देन्दुशेखरः।
3. नागेशभट्टकृतपरिभाषेन्दुशेखरः।
4. प्रदीपोद्द्योतयुतं महाभाष्यम्।
5. श्रीसभापतिशर्मोपाध्यायविरचितया लक्ष्मीव्याख्ययोपेता श्रीबालकृष्णशर्मपञ्चोलिना सम्पादिता वैयाकरणसिद्धान्तकौमुदी, प्रथमसंस्करणं 1966, मोतीलालबनारसीदास, वाराणसी।

✦✦✦

संस्कृतविमर्शः ( जनवरी-जून 2021 ) अङ्कः-20 ISSN : 0975-1769

### वररुचिकृते

# प्रयोगविवेकसंग्रहे तिङ्कृत्प्रयोगौ

देवानन्द शुक्ल*
प्रीति शुक्ला*

वररुचिकृते प्रयोगविवेकसंग्रहे तिङ्कृत्प्रयोगयोः

॥अथ तिङ्प्रयोगः॥

लट् च लङ् च तथा लोट् च लिङाशीर्लिङ्लिटस्तथा।
लुङ्लुटौ लृङ्लृटौ चैव लकारा दश कीर्तिताः॥४७॥

धातोः सकर्मकाज्ज्ञेया लकाराः कर्तृकर्मणोः।
अकर्मकात्तथा धातोर्भावे कर्तरि च स्मृताः॥४८॥

भूते लुङ्लङ्लिटो नान्ये लृङ्लृटौ लुड्भविष्यति।
लिङ्लोटावाशिषि विधौ वर्तमाने लडुच्यते॥४९॥

भवतीत्यादि लड्रूपमभवत्प्रमुखं तु लङ्।
भवत्वित्यादि लोड्रूपं भवेदित्यादि लिङ् तथा॥५०॥

भूयादित्यादि चाशीर्लिङ् बभूवेत्यादिकं तु लिट्।
अभूदित्यादि लुङ्रूपं भवितेत्यादि लुट् तथा॥५१॥

अभविष्यन्मुखं लृङ्स्याद्भविष्यत्यादिकं तु लृट्।
एतत्परस्मै रूपं स्याद्भूप्राप्तावात्मने यथा॥५२॥

भवते इति लड्रूपं लङस्त्वभवतादिकम्।
भवतां लोट् लिङ् भवेत भविषीष्ट लिङाशिषि॥५३॥

---

* संस्कृतसंवर्धनप्रतिष्ठानम्, दिल्ली
* उपनिदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली-58

**लिट् बभूवे चाभविष्ट लुङ् लुट्स्याद्भवितादिकम्।**
**अभविष्यत लृङ्रूपं लड्रूपं तु भविष्यते॥५४॥**

**तिबादयोऽष्टादश च शतृक्वसुरिमौ तथा।**
**शानच् कानजिति द्वौ च लादेशाः परिकीर्तिताः॥५५॥**

**तिङां नव च पूर्वार्धं लादेशावपरौ द्विधा।**
**परस्मैपदमाख्यातं तङानावात्मनेपदम्॥५६॥**

तद्धितप्रयोगमभिधाय तिङ्प्रयोगाभिधानं विधास्यामः। तिङ् कतमः ? तिप् तस् झि। सिप् थस् थ। मिस वस् मस्। त आतां झ। थास् आथाम् ध्वम्। इट् वहि महिङ् इत्यष्टादशधा तिङ् वेदितव्यः। तत्र तिङ्समूहे दशधा संज्ञा प्रत्ययसंज्ञा; विभक्तिसंज्ञा, परस्मैपदसंज्ञा आत्मनेपदसंज्ञा प्रथमपुरुषसंज्ञा मध्यमपुरुषसंज्ञा उत्तमपुरुषसंज्ञा एकवचनसंज्ञा द्विवचनसंज्ञा बहुवचनसंज्ञा चेति। केषां प्रत्ययसंज्ञा? सर्वेषामष्टादशानां तिङां प्रत्ययसंज्ञा। तेषामेव विभक्तिसंज्ञा। परस्मैपदमिति। तिङां नव पूर्वाणि वचनानि यौ द्वावपरौ लादेशौ शतृक्वसू च इत्येकादशधा परस्मैपदमुक्तम्। तङ् च आनश्च तङानौ। तङ् इत्यनेन तिङामुत्तराणि नव वचनानि गृह्यन्ते। आन इति शानच्कान-चोरुत्सृष्टानुबन्धयोर्ग्रहणम्। एवमात्मनेपदमेकादशधा।

**तिङ् तिप् तस् झि सिप् थस्थमिब्वस्मसिति ये नव।**
**शतृक्वसू च ते सर्वे परस्मैपदसंज्ञकाः॥५७॥**

**तथा तातां झ थासाथां ध्वमिड्वहिमहिङ् नव।**
**शानच् कानच्च कथिता आत्मनेपदसंज्ञकाः॥५८॥**

**परस्मै चात्मने भागे वचनानि त्रिधा त्रिधा।**
**त्रयस्ते पुरुषा ज्ञेयाः प्रथमोत्तममध्यमाः॥५९॥**

परस्मै इति। उभयपक्षेऽपि प्रथममध्यमोत्तमपुरुषा वेदितव्याः। परस्मैपदपक्षे आत्मनेपदपक्षे च परस्मैपदात्मनेपदसंज्ञानां त्रीणि त्रीणि वचनानि प्रथमपुरुषमध्यम-पुरुषोत्तमपुरुषसंज्ञकानि भवन्ति।

**प्रथमः पुरुषो ज्ञेयस्तिप्तस्झिवचनत्रयम्।**
**सिप् थस् थ मध्यमो ज्ञेयो मिब्वस्मसिति चोत्तमः।**
**पुरुषत्रितयं ज्ञेयमेवमेवात्मनेपदे॥६०॥**

परस्मैपदभागे तावत् तिप् तस् झि इति प्रथमपुरुषः। सिप् थस् थ इति मध्यमः। मिप् वस् मस् इत्युत्तमः। एवमात्मनेपदेऽपि।

**एकद्विबहुसंज्ञानि पदान्येकैकशस्तिङाम्।**
**परस्मै कर्तरि ज्ञेयं न भावे नापि कर्मणि॥६१॥**

एकेति। यानि कानि तिङां पदानि तान्येकैकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति। परस्मैपदं कर्तर्येव प्रयोक्तव्यम्। न भावकर्मणोः। ननु यदि परस्मैपदं कर्तर्येव प्रयोक्तव्यं तर्हि कथं लोके पच्यति क्रियति पुरुषसुखमनुवर्तयन्ति ताभ्यामिति। पच्यति क्रियति एते द्वे शब्दरूपे परस्मैपदसंज्ञके न भवतः। अपि तु तङ्व्यत्ययेन तिङ्पदमिति शास्त्रकारवचनप्रामाण्यादात्मनेपदस्थाने परस्मैपदं कर्तव्यम्। तस्मात् सत्यपि परस्मैपदश्रवणे आत्मनेपदं ज्ञातव्यम्।

**आत्मने तु त्रिषु ज्ञेयं भावे कर्तरि कर्मणि।**
**धातोरकर्मकाद्भावे प्रथमैकवचस्तथा॥६२॥**

**तिबेकवचनं तस्द्विवचनं झि बहु स्मृतम्।**
**एवमन्यदपि ज्ञेयमेकद्विबहुसंज्ञितम्॥६३॥**

**गृहे वसति गोविन्दः स्थीयते मधुवैरिणा।**
**मुदं दत्ते मुरारातिः सेव्यते रमया हरिः॥६४॥**

भूयतेऽर्थेन भूयेते भूयन्त इति वा नवा। आत्मन इति। आत्मनेपदं भावे कर्तरि कर्मणि च भवति। तत्र भावे प्रथमपुरुषैकवचनमेव भवति। यथा स्थीयते देवदत्तेन, न कदाचित् स्थीयन्ते इति।

**सकर्माकर्मकाद्धातोः कर्तरि स्मृतमात्मने।**
**यत्तु कर्मणि निर्दिष्टं क्रियते तत्सकर्मकात्॥६५॥**

सकर्मेति। यदा आत्मनेपदं कर्तरि भवति तदा सर्वस्मादपि धातोर्भवति सकर्मकादकर्मकाच्चेति। सकर्मकात्तावत् कटं कुरुते देवदत्तः। **स्वरितञितः०** (अ. १/३/७२) इत्यात्मनेपदम्। शेते देवदत्तः। **अनुदात्त०** (अ.१/३/१२) इत्यात्मनेपदम्। यदिति। यत्पुनरात्मनेपदं कर्मणि निर्दिष्टं तत् सकर्मकादेव धातोर्भवति नाकर्मकात्। यथा – कटः क्रियते राजपुरुषेण। **भावकर्मणोः** (अ.१/३/१३) इत्यात्मनेपदम्। **सार्वधातुके यक्** (अ.३/१/६७) इति यक्।

**श्रेयांसि कुरुते विष्णुः शेतेऽनन्ते जगत्पतिः।**
**क्रियते देवदत्तेन कट इत्याद्युदाहृतिः॥६६॥**

प्रथमपुरुषः केन सह प्रयुज्यते? नाम्नैव स नियोक्तव्यः प्रथमः पुरुषो भवेत्। नाम्नैवेति। नामपदैरेव भवदादिभिः प्रथमपुरुषो युज्यते न युष्मदस्मत्पदाभ्यामिति।

यथा - जयति ब्राह्मणः।मध्यमपुरुषः केन सह प्रयुज्यते। युष्मत्पदैरेव। न नामपदैः, नाप्यस्मत्पदैः। सर्वविभक्त्यन्तैर्युष्मत्पदैर्वा नेत्याह -

**त्वं युवां यूयमित्येभिस्त्रिभिरेव तु मध्यमः।**
**त्वं जयसि। युवां जयथः। यूयं जयथ।**
**प्रथमः पुरुषो नाम पदैः स्याद्भवदादिभिः॥६७॥**

**नृपो भाति नृपौ भातो नृपा भान्तीत्युदाहृतिः।**
**भासि त्वं च युवां भाथो यूयं भाथेत्युदाहृतिः॥६८॥**

उत्तमस्तु केन सह प्रयुज्यते अत आह - अहं आवामिति।

**अहमावां वयं त्वेभिरुत्तमो नान्यथा मतः।**
**अन्यथा च प्रहासे स्यात् त्वं मन्येऽहं च भोक्ष्यसे॥६९॥**

इत्येतदुक्तं भवति - उत्तमो न नामपदेन सम्प्रयुज्यते न युष्मत्पदेन च। किं तर्हि? अस्मत्पदेनैव। यथा - अहं जयामि, आवां जयावः, वयं जयामः। किमस्मत्पदैरेवोत्तमः प्रयुज्यते उतान्यथापि प्रयुज्यते। अत आह - अन्यथेति। तथा हि प्रहासः परिहासः। 'एहिमन्ये भोक्ष्यसे' इति परिहासे प्रयोगः कर्तव्यः। मन्ये त्वं भोक्ष्यसे अहमिति मध्यमोत्तमपुरुषयोर्व्यत्यासः कर्तव्यः नान्यत्र।

उक्तं हि तिङ्स्वरूपमात्रम्। तिङ्प्रयोगस्तु कश्चिद्विस्तरेण वक्ष्यते। अस्ति स कश्चित् प्रयोगः यस्य कर्मणि प्रथमा। यथा वृक्षः छिद्यते तक्षकेण। कदाचिद् द्वितीया स्यात्। यथा - वृक्षं छिनत्ति तक्षकः। क्वचित् षष्ठी - वृक्षस्य रुजति रोगः। **रुजार्थानां भाववचनानामज्वरेः** (अ.२/३/५४) इति षष्ठी। शत्रूणां पिनष्टि राजा। **जासिनि०** (अ.२/३/५६) इतिषष्ठी। कदाचिच्चतुर्थी - ग्रामाय व्रजति पुरुषः। **गत्यर्थ०** (अ.२/३/१२) इति चतुर्थी द्वितीया च। द्विकर्मको णिजन्तप्रयोगो विज्ञेयः। यस्मात्तिङ्प्रयोगो विषमो द्विकर्मणिजन्तः तस्मात्प्रदर्शयिष्यामः। णिजन्तेभ्यो धातुभ्यः कर्मविवक्षायां द्वे कर्मणी अभिधीयेते प्रधानमप्रधानं चेति। तत्र तिङन्तेन पदेन प्रधानकर्माभिधीयते। यतो भाष्यकार एवमाह -

**प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।**
**अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः॥**

कोऽर्थः? द्विकर्मकेषु धातुषु कर्मविवक्षायां तिङा प्रधानकर्माभिधीयते। अभिहितत्वाच्च कर्मण प्रथमैव भवति। अप्रधाने पुनरनभिहितत्वाद् द्वितीयैव भवति। कर्तर्यनभिहिते तृतीया भवति। किमुदाहरणम्। नीयते देवदत्तेन अजा ग्रामम्। आकृष्यते गौर्गोपालेन व्रजम्। दुहादीनां धातूनां प्रयोगे कर्मविवक्षायामप्रधानकर्माभिधीयते तिङ्पदेन। के पुनर्दुहादयः?

**दुहियाचिरुधिप्रच्छिभिक्षिचिञा-**
**मुपयोगनिमित्तमपूर्वविधौ।**
**ब्रुविशासिगुणेन च यत्स च ते**
**तदकीर्तितमाचरितं कविना॥७०॥**

द्विकर्मकवचनं नीवहिहरतिगत्यर्थानाम्। दुहिर्यथा – दुह्यते गौर्देवदत्तेन क्षीरम्। याचिर्यथा – याच्यते राजा ब्राह्मणेन धनम्। रुध्यते गौर्देवदत्तेन व्रजम्। पृच्छयते भिक्षुको वानप्रस्थेन ग्रामम्। **ग्रहिज्यावयि०** (अ.६/१/१६) इति सम्प्रसारणम्। भिक्ष्यते पालको माणवकेन क्षीराणि। चीयते तरुर्देवदत्तेन फलानि। **अकृत्सार्वधातुकयोः०** (अ.७/४/२५) इति दीर्घः। उच्यते यजमानो धर्ममृषिणा। शिष्यते शास्त्रं गुरुणा शिष्यः। ण्यन्तेभ्यो धातुभ्यो यः कर्ता कर्मभूतः स एवाभिधीयते। किमुदाहरणम्।गच्छति भृत्यो ग्रामम्। गमयति भृत्यं ग्रामं गुरुः। गम्यते भृत्यो राज्ञा ग्रामम्। बुध्यते शास्त्रं शिष्यः। बोधयति शास्त्रं शिष्यं गुरुः। बोध्यते शास्त्रं शिष्यो गुरुणा। ओदनं भुङ्क्ते ब्राह्मणः। भोजयति ब्राह्मणमोदनं देवदत्तः। भोज्यते ब्राह्मणओदनं देवदत्तेन। पठति माणवकः शास्त्रम्। पाठयति माणवकं शास्त्रं देवदत्तः। पाठ्यते माणवकः शास्त्रमुपाध्यायेन। आस्त आसन अतिथिः। आसयत्यासन अतिथिः नागरिकः। आस्यत आसन अतिथिर्नागरिकेण। नीवह्योः प्रतिषेधो वाच्यः। **गतिबुद्धि०** (अ.१/४/५२) इत्यादिना नीवह्यादीनामण्यन्तानां यः कर्ता स णावपि सति कर्मसंज्ञो मा भूत्। देवदत्तो ग्रामं नयति गाम्। नाययति गां देवदत्तेन यज्ञदत्तः। कर्तर्यनभिहिते तृतीया। कर्मणि पुनरभिहिते यज्ञदत्ते नीयते गौर्ग्रामं देवदत्तेन। वहति भारं देवदत्तो ग्रामम्। वाहयति भारं देवदत्तेन ग्रामं यज्ञदत्तः। वाह्यते भारो देवदत्तेन यज्ञदत्तेन ग्रामम्। सर्वत्र प्रत्यवसानार्थे अदेर्ण्यन्तस्य प्रतिषेधो वाच्यः। किमर्थम् ? णिजन्तस्यादेः **निगरणचलनार्थेभ्यश्च** (अ.१/३/८७) इत्यनेन सूत्रेण परस्मैपदं प्राप्तम्। तन्मा भूत्। **गतिबुद्धि०** (अ.१/४/५२) इत्यादिना यः कर्ता पूर्वः तस्य कर्मसंज्ञा मा भूत्। यथा – अत्ति पायसं देवदत्तः। आदयति पायसं देवदत्तेन यज्ञदत्तः। आद्यते पायसं देवदत्तेन यज्ञदत्तः। तस्य कर्मसंज्ञाप्रतिषेध इति यदि वक्तव्यो नास्ति एवं प्रतिषेधो भविष्यति। आदयति पायसं देवदत्तं यज्ञदत्तः। ण्यन्तस्येति किम्। इदमेषां जग्धम्। **क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः** (अ.३/४/७६) इति क्तः। **अदो जग्धिर्ल्यप्ति किति** (अ.२/४/३६) इति जग्धिरादेशः। अत्र षष्ठीप्रतिषेधो मा भूत्। क्तवति पर्युदासो न स्यात्। किञ्च स्यात्। **अधिकरणवाचिनश्च** (अ.२/३/६८) इत्यनेन क्तप्रत्ययस्य योगे षष्ठी स्यात्।

भक्षेरहिंसायाम् (वा)। भक्षेर्धातोरहिंसायामर्थे कर्तुः कर्मसंज्ञाप्रतिषेध। भक्षयति पिण्डं देवदत्तः। अयं णिच् चुरादिलक्षणः। न पुनः **हेतुमति च** (अ.३/१/२६)

इत्यनेन णिज्विधीयते। हेतुमति लक्षणे विधीयमाने एवं प्रयोगः। भक्षयति पिण्डं यज्ञदत्तेन देवदत्तः। 'अहिंसायाम्' इति किम्। भक्षयति बलीवर्दान् सस्यानि देवदत्तः। न कर्मसंज्ञाप्रतिषेधः।

**वहेरनियन्तृकर्तृकस्य** (वा) वहेर्धातोरनियन्तृकर्तुकस्याण्यन्तस्य यः कर्ता तस्य ण्यन्तस्य कर्मसंज्ञाप्रतिषेधो वाच्यः। वहति बलीवदी भारम्। वाहयति बलीवर्देन भारं यज्ञदत्तः। अनियन्तृकर्तृकस्येति किम्। वहति बलीवर्दो भारम्। वाहयन्ति बलीवर्दान् भारं पथिकाः। बलीवर्देषु भारं नीयमाना इत्यर्थः।

**अहं भामि तथैवावां भावो भामो वयं तथा।**
**मन्ये त्वं भोक्ष्यसेऽहं चेत्येवं व्यत्ययतो भवेत्।।७१।।**

**शब्लुकौ श्लुश्यनौ श्नुश्शश्नमुश्नाणिजिति क्रमात्।**
**प्रत्यया भ्वद्धुदिव्सुञ्तुद्रुधतन्क्रीचुरादिगाः।।७२।।**

**भवतीत्यादयः शब्विकरणस्थितधातवः।**
**अत्त्याद्या लुग्विकरणा जुहोत्याद्याः श्लुसंश्रिताः।।७३।।**

**दीव्यत्याद्याः श्यन्पठिता सुनोत्याद्याः श्नुसंयुताः।**
**तुदत्याद्याः शपठिताः रुणद्ध्यानोद्याः श्नमन्विताः।।७४।।**

**तनोत्याद्या उपठिता श्ना क्रीणातिमुखास्तथा।**
**णिच्चोरयतिमुख्यास्तु दशैते कर्तरि स्मृताः।।७५।।**

**यग्भावकर्मणोर्ज्ञेयं भूयते क्रियते मया।**
**लडादिषु चतुर्ष्वेव शबाद्याश्चिण् लुङि स्मृतः।।७६।।**

**स्यतासी लृलुटोर्ज्ञेयौ लुङि चिण्भावकर्मणोः।**
**सुखेनाभावि कृष्णेन जयोऽकारीति चिण् भवेत्।।७७।।**

**कर्मणि प्रथमा ज्ञेया द्वितीया कुत्रचिद्भवेत्।**
**षष्ठी क्वचित् क्रियायोगे चतुर्थी च कदाचन।।७८।।**

**तक्ष्णा सम्भिद्यते वृक्षस्तक्षा वृक्षं छिनत्ति च।**
**वृक्षस्य रोगो रुजति चैत्रो ग्रामाय गच्छति।।७९।।**

**प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।**
**अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।८०।।**

।।उक्तोऽयं तिङ्प्रयोगः।।

## ।।अथ कृत्प्रयोगः।।

**एवं तिङ्प्रयोगमभिधाय कृत्प्रयोगमवसरप्राप्तं वक्ष्यामः।**
**कृतस्त्रिष्वपि वर्तन्ते भावे कर्तरि कर्मणि।**
**अजब्ल्युक्तिन्घञो भावे युजकाराङ् श एव च।।८१।।**

यथा तिङ्प्रत्यया भावकर्मकर्तृषु भवन्ति तथा कृत्प्रत्यया अपि। भावे तु अच् अप् ल्युट् क्तिन् घञे युच् अ अङ् शः एते भवन्ति, न कर्मणि, नापि कर्तरि।

**अज्यथा** - पुण्यानां चयः। क्रयणं क्रयः। **एरच्** (अ.३/३/५६) इत्यच्। **अप् यथा**-शराणां निकरः। भवः। प्रभवः। उपद्रवः। उपप्लवः। प्रणवः।; **दोरप्** (अ.३/३/५७)। इत्यप् निग्रहः। **ग्रहवृदृनिश्चिगमश्च** (अ.३/३/५८) इत्यप्।

अजबन्तास्सर्व एवैते पुंसि भवन्ति। ल्युट् यथा - ओदनस्य पचनम्। आचमनम्। वचनम्। शरणम्। वरणम्। गरणम्। आसनम्। यानम्। वाहनम्। शासनम्। गानम्। **ल्युट् च** (अ.३/३/११५) इति ल्युट्। पचनम्। भरणम् विभर्त्यनेनेति। शृणोत्यस्मिन्निति श्रवणम्। करणम्। चरणम्। अधिकरणम्। **करणाधिकरणयोश्च** (अ.३/३/११७)। ल्युडन्तं नपुंसकम्।

**क्तिन् यथा** -पुण्यस्य कृतिः। **कर्तृकर्मणोः कृति** (अ.२/३/६५) इति षष्ठी। गतिः मतिः सृतिः बुद्धिः सिद्धिः भित्तिः उदितिः ऋद्धिः पुष्टिः उष्टिः प्राप्तिः। **स्त्रियां क्तिन्** (अ.३/३/९४)। स्थानं स्थितिः। **स्थागापापचो भावे** (अ.३/३/९५) **घुमास्था०** (अ.६/४/६६) इतीत्वम्। घञ् यथा -ओदनस्य पाकः। यामः वादः भावः वेदः। **भावे** (अ.३/३/१८) इति घञ्।

**युच् यथा** -कारणा चेतना छेदना वेदना यातना योजना शोषणा एवमादि। **ण्यासश्रन्थो युच्** (अ.३/३/१०७)। अकारो यथा -चिकीर्षा। जिगमिषा। चिकित्सा। जिघत्सा। बुभुक्षा। तितिक्षा। जिज्ञासा। **अ प्रत्ययात्** (अ.३/३/१०२) इत्यप्रत्ययः। ईक्षा। **गुरोश्च हलः** (अ.३/३/१०३) इत्यप्रत्ययः। अङ् यथा -उपदा। अभिख्या। **आतश्चोपसर्गे** (अ.३/३/१०६) इत्यङ्। भिदा। जरा। तृषा। **षिद्भिदादिभ्योऽङ्** (अ.३/३/१०४)। **ऋदृशोऽङि गुणः** (अ.७/४/१६)। शो यथा - क्रिया। **कृञः श च** (अ.३/३/१००) इति शः। **रिङ्शयग्लिङ्क्षु** (अ.७/४/२८) इति रिङादेशः।

**चयो गरश्च वचनँ कृतिः पाकश्च धारणा।**
**चिकित्सा चोपदा चैव क्रियेत्येषामुदाहृतिः।।८२।।**

उक्ताः केवलभाववाचिनः। मिश्रवाचकाः कृत्प्रत्यया उच्यन्ते - सकर्मेति।

**सकर्माकर्मकाद्धातोः क्तो भवेत्कर्मभावयोः।**
**कृत्याश्चैव खलर्थाश्च तयोरेवानुवर्णिताः॥८३॥**

यदा क्तप्रत्ययः कर्मणि भवति तदा सकर्मकादेव धातोर्भवति। यदा पुनः क्तो भावे तदाकर्मकात् धातोर्भवति। यदा सकर्मकेभ्यो धातुभ्यः क्तो भवति तदा कर्मण्येव वर्तते। यदाकर्मकेभ्यो धातुभ्यो भवति तदा भावे वर्तते। न कर्तरीत्यर्थः। यदा भावे वर्तते तदा सकर्तृका विभक्तिरुपादीयते। षष्ठी चोपादीयते। भावे यथा - देवदत्तेन भूतमिति। **नपुंसके भावे क्तः** (अ.३/३/११४)। सकर्मके यथा -देवदत्तस्य गतमिति। **क्तस्य च वर्तमाने** (अ.२/३/६७)। **अनुदात्तोपदेश०** (अ.६/४/३७) इत्यादिना अनुनासिकलोपः। तृतीया कदाचिदिष्यते। देवदत्तेन भुक्तम्। **कर्तृकरणयोः** (अ.३/३/१८) इति तृतीया। यदा पुनः कर्मणि क्तो भवति तदा तस्य कर्मणि प्रथमा। कर्तरि तु तृतीयैव। नान्या विभक्तिरुपादीयते। यथा देवदत्तेनावतीर्णः समुद्रः। **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** (अ.८/२/४२) इति निष्ठातस्य नः। कृत्याश्चेति। तयोरेव भावकर्मणोरेव कृत्याः खलर्थाश्च भवन्ति।

**तव्यत्तव्यानीयरो यत् क्यप् ण्यत् खल् युच् तथैव च।**
**इत्येते प्रत्ययाः कृत्याः खलर्थाश्च प्रकीर्तिताः॥८४॥**

**तव्यत्तावत्** -भोक्तव्य ओदनो देवदत्तेन देवदत्तस्य वा। **कृत्यानां कर्तरि वा** (अ.२/३/७१) यदा षष्ठी न, तदा तृतीयैव।तव्यो यथा - कर्तव्यः। हर्तव्यः। भवितव्यम्। हसितव्यम्। गन्तव्यम्। दातव्यम्। भोक्तव्यम्। श्रोतव्यम्। यथा तव्यतोरूपं तथा तव्यस्यापि। स्वरे भेदः। **अनीयर् यथा** -देवदत्तेन हरणीयो धर्मः। स्पृहणीयं रूपम्। **तव्यत्तव्यानीयरः** (अ.३/१/९६) **कृत्याः** (अ.३/१/९५) इति प्राङ्ण्वुलः कृत्यसंज्ञा।

**यद्यथा** -पेयमुदकं देवदत्तेन। प्राप्यम्। नेयम्। ज्ञेयम्। **अचो यत्** (अ. ३/१/९७) इति यत्। **ईद्यति** (अ.६/४/६५) इतीकारः। क्यप् यथा -स्तुत्यो देवः। शिष्यो बालः। **एतिस्तुशास्वदृजुषः क्यप्** (अ.३/१/१०९)। कृत्यः। **विभाषा कृवृषोः** (अ.३/१/१२०)। भृत्यः। **भृञोऽसंज्ञायाम्** (अ.३/१/११२)। ण्यद्यथा -कार्यो धर्मः। भेद्यम्। भोज्यम्। योग्यम्। इत्यादि। **ऋहलोर्ण्यत्** (अ.३/१/१२४)।

**खल् यथा** -ईषत् क्रियते ईषत्करः। दुष्करः। सुकरः। सुलभः। दुस्तरः। सुदरः। सुगमः। ईषद्बोधः। दुर्बोधः। सुबोधः। **ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्** (अ.३/३/१२६) **कर्तृकर्मणोः०** (अ.२/३/६५) इति प्राप्ते न **लोकाव्यय०** (अ. २/३/६९) इति षष्ठीनिषेधः।युच् यथा -कृच्छ्रेण दीयते दुर्दानम्। सुदानम्। सुपानम्। **आतो युच्** (अ.३/३/१२८)।

**यदा भवेत्कर्मणि क्तस्तदा धातोस्सकर्मकात्।**
**यदा (तदा)[तु] भावे सर्वस्मात्सकर्माकर्मकात्तदा॥८५॥**

**[यदा भवेत्तु भावे क्तस्तदा धातोरकर्मकात्।]**
**यदा सकर्मकेभ्यः स्यात्कर्मण्येव तदा भवेत्।**
**यदा त्वकर्मकेभ्यः स्यात्तदा भावे न कर्तरि॥८६॥**

**यदा क्तो वर्तते भावे विभक्तिस्तु सकर्तृका।**
**तदोपादीयते भूतं देवदत्तस्य वा गतम्॥८७॥**

**क्वचित्तृतीया भवति देवदत्तेन भासितम्।**
**यदा क्तः कर्मणि तदा प्रथमैवास्य कर्मणि॥८८॥**

**कर्तरि स्यात्तृतीयैव कंसः कृष्णेन निर्जितः।**
**सकर्मकात्कर्मणि स्युः कृत्या भावे त्वकर्मकात्॥८९॥**

**तव्यत्तव्यानीयरो यत् क्यण्यतः खल् तथैव च।**
**युजिति प्रत्यया अष्टौ कृत्यसंज्ञाः प्रकीर्तिताः॥९०॥**

**भोक्तव्य ओदनो देवदत्तेनेति सकर्मकात्।**
**त्वया युवाभ्यां युष्माभिरेधितव्यमकर्मकात्॥९१॥**

**करणीयं शुभं ज्ञेयं स्तुत्या कार्या हरिस्मृतिः।**
**सुखेन बुध्यत इति सुबोधो विदुषा हरिः।**
**कृच्छ्रेण दीयत इति दुर्दानमिति च क्रमात्॥९२॥**

क्तप्रत्ययः किं भावकर्मणोरेव वर्तते आहोस्विन्न इत्याहत्रिष्विति।

**त्रिषु गत्यर्थकादिभ्यस्तथा चैवादिकर्मणि।**
**अकर्मकात्समुत्पन्नो वर्तते कर्तृभावयोः॥९३॥**

यः क्तप्रत्ययो गत्यर्थादिभ्यो धातुभ्यो वर्तते यश्चादिकर्मणि विहितः स त्रिषु भावकर्मकर्तृषु वर्तते। के पुनर्गत्यर्थकादयः। **गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजन-रुहजीर्यतिभ्यश्च** (अ.३/४/७२) इति। तेभ्य एव धातुभ्यः क्तो विहितस्त्रिष्वपि साधनेषु भवति। यथा **कर्मणि तावत्** – गतो देवदत्तेन ग्रामः। कर्तरि पुनः – देवदत्तो ग्रामं गतः। भावे – देवदत्तेन गतम्। धातवस्तु पुनरकर्मका अपि सोपसर्गाः सकर्मका भवन्ति। कर्मणि तावत् – अनुशुष्कस्सूर्येण ह्रदः। **कर्तरि तु** – ह्रदमनुशुष्कस्सूर्यः। भावे पुनः –अनुशुष्कं ह्रदेन। **शुषः कः** (अ.८/२/५१) इति

कः। श्लिषिर्यथा –आश्लिष्टा कन्यानेन इति कर्मणि, कन्यामाश्लिष्टोऽयं इति कर्तरि, आश्लिष्टं भवतीति भावे।

**शीङ् यथा** – अतिशयितो गुरुरनेन। **निष्ठा शीङ्०** (अ.१/२/१९) इत्यकित्त्वाद्गुणः। कर्तरि यथा – गुरुमतिशयितोऽयम्। भावे – अतिशयितमनेन।स्था यथा –उपस्थितो गुरुर्देवदत्तेन इति कर्मणि। **द्यतिस्यतिमास्था०** (अ.७/४/४०) इत्याकारस्येत्त्वम्। कर्तरि तु उपस्थितो गुरुं शिष्यः। [भावे] उपस्थितं शिष्येण। **आस यथा** –उपासितो गुरुरनेन कर्मणि। कर्तरि उपासितोऽयं गुरुम्। भावे उपासितमनेन। **वस् यथा** – अध्युषितोऽनेन गुरुः इति कर्मणि। अध्युषितो गुरुमयमिति कर्तरि। अध्युषितमनेनेति भावे। **वचिस्वपि०** (अ.६/१/१५)इतिसम्प्रसारणम्।जन् यथा –उपजनितोऽयं पुत्रम्। उपजनितः पुत्रोऽनेन। उपजनितमनेन।

**रुह** –वानर आरूढो वृक्षम्। वानरेणारूढो वृक्षः। आरूढं वानरेण। **हो ढः** (अ.८/२/३१) इति ढत्वम्। **झषस्तथो०** (अ.८/२/४०) इति धत्वम्। ष्टुत्वम्। **ढो ढे लोपः** (अ.८/३/१३)। **ढ्रलोपे०** (अ.६/३/१११) इति दीर्घः। **जृष् यथा** –अपजीणी देवदत्तश्चैत्रेण। चैत्रमपजीणी मैत्रः। अपजीर्णं चैत्रेण। **ऋत इत्** (अ. ८/१/१००) इतीत्वंरपरत्वम्। **र्वोरुपधाया दीर्घ इकः** (अ.८/२/७६) **रदाभ्याम्०** (अ.८/२/४२) इति तस्य नत्वम्। आदिकर्मणि क्तः कर्मकर्तृभावेषु वर्तते। यथा – प्रभुक्त ओदनमयम्। प्रभुक्त ओदनोऽनेन। **अकर्मकात्०** (अ.१/३/२६) इति यदा क्तः अकर्मकेभ्यो वर्तते तदा कर्तृभावयोर्वर्तते। कर्तरि यथा –शरदि शुद्धा नदी। भावे –शुद्धं नद्या।

**गत्यर्थाकर्मकाश्चैव श्लिषिः शीङ्स्थास्वसिर्जनिः॥**
**रुहिर्जीर्यतिरित्येते गत्यर्थाद्याः प्रकीर्तिताः॥९४॥**

**एषां गत्यर्थकादीनां क्रमेणोदाहृतिर्यथा।**
**पुंसा गतं पुमान् ग्रामं गतः पुंसा गता पुरी॥९५॥**

**अकर्मका धातवस्तु सोपसर्गास्सकर्मकाः।**
**अनुशुष्कं भास्करेण ह्यनुशुष्को रविह्रदम्॥९६॥**

**ह्रदोऽनुशुष्कस्सूर्येण तदाश्लिष्टं वरेण च।**
**कन्यकां च वरः श्लिष्टः श्लिष्टा कन्या वरेण वा॥९७॥**

**आचार्येणातिशयितं शिष्योऽतिशयितो गुरुम्।**
**शिष्येणायीऽतिशयितः पुत्रेणोपस्थितं तदा॥९८॥**

**पुत्रैस्तूपस्थिता माता पुत्रेणोपस्थितः पिता।**
**शिष्येणोपासितं शिष्यो गुरुं चोपासितो गुरुः॥९९॥**

**शिष्येणोपासितश्चाथ, शिष्येणाध्युषितं तथा।**
**शिष्यो गुरुं चाध्युषितः शिष्येणाध्युषितो गुरुः॥१००॥**

**सुतेन चोपजनितं पितोपजनितः सुतम्।**
**सुतः पित्रोपजनितः तथारूढं वनौकसा॥१०१॥**

**आरूढः प्लवगो वृक्षमारूढः कपिना द्रुमः।**
**ओदनेनावजीर्णं चावजीर्णो ह्योदनं जनः॥१०२॥**

**तथौदनो जनेनावजीर्णमित्याद्युदाहृतिः।**
**प्रभुक्तं देवदत्तेन प्रभुक्तश्चौदनं सुतः॥१०३॥**

**प्रभुक्त ओदनो विष्णुमित्रेणेत्यादि कर्मणि।**
**शुद्धा भागीरथी शुद्धं भागीरथ्येति च क्रमात्॥१०४॥**

**इष्णुच्क्तवत् विच्तृन्क्विप्क्मरच्षाकन्ल्युणिन्यचः।**
**उकाराणावुकञ्टक्टकादयः कर्तरि स्मृताः॥१०५॥**

इष्णुजादयः प्रत्ययाः कर्तरि वर्तन्ते। कथम्।

**इष्णुच् तावत्** पुत्रमलंकरिष्णुः। **अलङ्कृञ्निराकृञ्०** (अ.३/२/१३६) इत्यादिना इष्णुच्। क्तवत् यथा –ग्रामं गतवान् देवदत्तः। 'निष्ठा' (अ.३/२/१०२) इति क्तवतुप्रत्ययः। **न लोकाव्यय०** (अ.२/३/६९) इत्यादिना षष्ठीप्रतिषेधः।

**विच् यथा** –उपयट् देवदत्तः। **विजुपे छन्दसि** (अ.३/२/७३) इति विच्। **तृन् यथा** –कटं करोतीति कटं कर्ता देवदत्तः। **न लोक०** (अ.२/३/६९) इति षष्ठीप्रतिषेधः। **आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु** (अ.३/२/१३४) **तृन्** (अ. ३/२/१३५) इति तृन्। **क्विप् यथा** –काष्ठस्य भित् देवदत्तः। **सत्सूद्विष०** (अ. ३/२/६१) इति क्विप्।

**क्मरच् यथा** –ओदनस्य घस्मरो देवदत्तः। **सृघस्यदः क्मरच्** (अ.३/२/१६०)। **षाकन् यथा** –ओदनस्य भिक्षाकः। **जल्पभिक्षकुट्टलुण्टवृङः षाकन्** (अ. ३/२/१५५)। **ल्युर्यथा** –पुत्रस्य नन्दनो देवदत्तः। **णिनिर्यथा** –शब्दस्य ग्राही देवदत्तः। **अच् यथा** –ओदनस्य पच। **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (अ.३/१/१३४) इति त्रिभ्यो गणेभ्यस्त्रयो भवन्ति। **उकारो यथा** – कटं चिकीर्षुः। **सनाशंसभिक्ष उः** (अ.३/२/१६८)। **अतो लोपः** (अ.६/४/४८)।

**अण् यथा** – कुम्भकारः। **कर्मण्यण्** (अ.३/२/१) **उपपदमतिङ्** (अ. २/२/१९) इति समासः। **उकञ् यथा** – यागं गामुकः। **लषपदपतस्थ०** (अ. ३/२/१५४) इत्युकञ्। **टक् यथा** –सीधु पिबतीति सीधुपः। सामग। **गापोष्टक्** (अ. ३/२/८) **टो यथा** –गिरिचरः। **चरेष्टः** (अ.३/२/१६)। **को यथा** –पुत्रस्य प्रियो देवदत्तः। अभितः पर्णस्य क्षिपो वायुः। **इगुपधज्ञाप्रीकिरः कः** (अ.३/१/१२५)।

**अलंकरिष्णुर्नगरीं प्रासादं गतवान्नृपः।**
**विच्छन्दसि कटं कर्ता देवदत्तो द्रुमस्य भित्॥१०६॥**

**अन्नस्य घस्मरश्चैत्रो भिक्षाकोऽन्नस्य माणवः।**
**पितुरानन्दनः कृष्णो शब्दस्य ग्राहिणी श्रुतिः॥१०७॥**

**ओदनस्य पचः स्वोपचिकीर्षुर्विजयं हरिः।**
**कुम्भं करोतीति कुम्भकारो ग्रामं गच्छति गामुकः।**
**सामगः काननचरः कुमारस्य प्रियः पिता॥१०८॥**

**भावे चोत्तरकाले ल्यप् तुमुन् क्त्वाः पूर्वकालजाः।**
**कर्मणि प्रथमा तेषां द्वितीया तु विशेषतः॥१०९॥**

भाव इति। ल्यप् तुमुन्क्त्वाः प्रत्ययाः पूर्वकालिका उत्तरकालिकाश्च भाव एव वर्तन्ते। न कर्मकर्त्रोः। तेषां कर्मणि प्रथमा विधीयते।

**ल्यप् तावत्** –कटं प्रकृत्य इष्यते देवदत्तेन। **अलंखल्वोः प्रतिषेधयोः** (अ.३/४/१८) इत्यत क्त्वा इत्यधिकृत्य **समानकर्तृकयोः पूर्वकाले** (अ.३/४/२१) **समासेऽनपूर्व०** (अ.७/१/३७) इति ल्यप्। **ह्रस्वस्य पिति कृति तुक्** (अ. ६/१/७१)। **उपपदमतिङ्ङ्** (अ.२/२/१९) इत्यधिकृत्य **कुगतिप्रादयः** (अ. २/१/१८) इति समासः। **क्त्वातोसुन्कसुनः** (अ.१/१/४०) इत्यव्ययसंज्ञा। **अव्ययादाप्सुपः** (अ.२/४/८२) इति सुपो लुक्। **तुमुन् यथा** –ग्रामो गन्तुमिष्यते। **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** (अ.३/३/१०) इति तुमुन्। **क्त्वा यथा** –कटः कृत्वा इष्यते नरेण। किं ल्यप्तुमुन्त्वाप्रत्ययानां प्रथमैव भवतीत्यत आह – द्वितीया तु विशेषतः इति।

कोऽर्थः। प्रथमामुपादाय विशेषतो द्वितीया भवतीति। ल्यप् **यथा** –ओदन प्रपच्य गतः। **तुमुन् यथा** –ओदनं भोक्तुं गतः। क्त्वा यथा –पुत्रं दृष्ट्वागच्छति पिता।

**धर्मं प्राप्य जयं गन्तुं श्रियं लब्ध्वा तमेष्यसि।**
**प्रकृत्यर्थः पूर्वकालः प्रत्ययार्थोऽत्र तूत्तरः॥११०॥**

शतृशानचौ पुनःकस्मिन् काले कतरस्मिन् कारके भवतः। वर्तमाने काले शतृशानचौ भवतः। शतृप्रत्ययः कर्तरि कारके वर्तते। शानच् कर्तरि कर्मणि भावे चेत्याह –

**वर्तमाने तु निर्देशे वर्तेते शतृशानचौ।**
**तव्यसत्संज्ञकाभ्यां च समासो न तु सिध्यति॥१११॥**

वर्तमाने त्विति। कोऽर्थः। शतृशानचौ प्रत्ययौ वर्तमाने काले भवतः इति। **शतृ तावत्** – कटं कुर्वन् देवदत्तः। **शानच् यथा** –लोकं कुर्वाणस्तिष्ठति। कर्मणि, वाच्यमानः शिष्यो देवदत्तेन। भावे, भूयमानः। शतृशानचोः **तौ सत्** (अ.३/२/१२७) इत्यनेन सत्संज्ञा विहिता। **'तव्यसत्संज्ञकाभ्यां च समासो न तु सिध्यति।** कोऽर्थः। शतृशानज्योगे समासो न सिध्यतीति। तव्य यथा –कर्तव्यं देवदत्तस्य। **शतृ यथा** –कटस्य कुर्वन्। **शानच् यथा** –कटस्य कुर्वाणः इत्यादि बोद्धव्यम्।

**वर्तमाने लटः स्थाने वर्तेते शतृशानचौ।**
**प्रवर्तमानकाले तु शतृ स्यात्कर्तृकारके॥११२॥**

**त्रिषु शानच् कर्तृकर्मभावार्थे स्यात्क्रमाद्यथा।**
**कटं कुर्वन्देवदत्तः ओदनं पचति स्वयम्॥११३॥**

**ओदनं पचमानस्तु यज्ञदत्तोऽपि तुष्यति।**
**चैत्रेणासौ पच्यमान ओदनः शोभते यथा॥११४॥**

**लोकोऽपि क्रियमाणोऽयं विष्णुमित्रेण शोभते।**
**द्रव्यसत्त्वापरत्वाभ्यां समासो न तु सिध्यति॥११५॥**

**न वा द्रव्यस्य सत्त्वाच्च परत्वाच्च समर्थयोः।**
**समास उत्तरपदस्थितयोः शतृशानचोः॥११६॥**

**कटं कुर्वन् देवदत्तः कटं कुर्वाण इत्यपि।**
**ग्रन्थनादाशयेनाहं श्लोकानां पञ्चविंशते।**
**परार्थभारमुद्वोढुं प्रभवेयं भवे भवे॥११७॥**

ग्रन्थनादिति। श्लोकानां पञ्चविंशतेः ग्रन्थनात् अहं परार्थभारं आशयेन हृदयेन उद्वोढुम् भवे भवे जन्मनि जन्मनि प्रभवेयम् इत्यन्वयः।

**॥इति श्रीवररुचिविरचिते प्रयोगमुखे**
**[प्रयोगविवेकसंग्रहे]कृदन्तपटलः समाप्तः॥**
**॥शिवमस्तु॥**

**संस्कृतविमर्शः** – यु.जी.सी. केयर-मानिता विद्वत्परिशीलिता अन्ताराष्ट्रीया षाण्मासिकी शोधपत्रिका केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रकाश्यते। प्रकाशनेच्छुभिः शोधपत्रं Unicode Font माध्यमेन 14अक्षराकारेण संस्कृतसाहित्यसंबद्धशोधलेखाः संस्कृतम्, हिन्दी आङ्ग्लम् वा भाषया विलिख्य Sanskrit.nic.in इति जालपुटे स्थापित-www.rsif.csu.co.in पोर्टलद्वारा प्रेषयितुं शक्यन्ते। साक्षात् प्रेषितः शोधलेखः प्रकाशनाय नानुमन्यते। विद्वद्भिः अनुशीलनात् परम् अनुमतानां शोधलेखानां प्रकाशनार्हता निर्धारिता भवति।

**Copyright** – केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली।

मूल्याङ्कनसमित्या निर्धारितशोधलेखेषु निहिताः सर्वोपि विषयः सत्यतथ्यरूपेणैवाङ्गीक्रियते। लेखेषु विद्यमानायाः मौलिकतायाः विषये मूललेखकः उत्तरदायी भवति। मौलिकतायाः विवादः स्यात् तर्हि लेखक एव न्यायालयस्य उत्तरदायी भवति। अधिकविवरणज्ञानार्थं विश्वविद्यालयस्य Sanskrit.nic.in द्रष्टुं शक्नुवन्ति।

संपर्कः – शोधप्रकाशनविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली
**Email : res-pub@csu.co.in**

## केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाष : 011-28524993, 28521994, 28520977

email : res-pub@csu.co.in, sales@csu.co.in
website : www.sanskrit.nic.in